संस्कृत-अकाडमी ग्रन्थमाला - 48

पण्डित-मल्लादि-सूर्यनारायणशास्त्रिविरचितम्

संस्कृतकविजीवितम्

प्रथमो भागः

सम्पादकौ
आचार्य मुदिगण्टि गोपालः
डा. वुप्पल श्रीनिवास शर्मा

संस्कृत अकाडमी
उस्मानिया विश्वविद्यालयः, हैदराबाद्
1993

संस्कृत अकाडमी ग्रन्थमाला –48

पण्डित–मल्लादि–सूर्यनारायणशास्त्रिविरचितम्

संस्कृतकविजीवितम्

प्रथमो भागः

सम्पादकौ
आचार्य मुदिगण्टि गोपालः
डा.वुप्पल श्रीनिवास शर्मा

संस्कृत अकाडमी
उस्मानिया विश्वविद्यालयः
हैदराबाद्
1993

Sanskrit Academy Series- 48

Saṃskṛta Kavi Jīvitam

By

Pandita Malladi Suryanarayana Shastry

Part-I

Edited by

Prof. M.Gopal Reddy

and

Dr.V. Srinivasa Sharma

SANSKRIT ACADEMY
Osmania University
Hyderabad - 500 007
Phone & Fax 040-27070281
Email - sanskritacademyhyd@gmail.com

1993

Sanskrit Academy Series – 48
Samskrita Kavi Jeevitam edited by Prof. M.Gopal Reddy and
Dr.V. Srinivasa Sharma

© Sanskrit Academy

First Edition : 1982
Second Edition : 1993

Copies : 700

Price : Rs/-125
$ 12

Copies can be had from:
Director
Sanskrit Academy
Osmania University Campus,
Hyderabad – 500 007
Phone & Fax: 040 - 27070281
Email: sanskritacademyhyd@gmail.com
Web: osmania.ac.in\sanskritacademy

PREFACE

It brings us great pleasure in bringing out the reprint of Samskruta Kavijivitam Part I by Sri Malladi Suryanarayana Sastri which has been out of print for many years. The book is unique in that it deals with the lives and works of the important Sanskrit poets and authors instead of giving a Chronologically arranged account of Sanskrit literature written in lucid and idiomatic Sanskrit, it is free from details which are often found boring by the general reader.

The work comprises lives of over 300 poets and authors, of which 67 are dealt with in the present volume.

In the Present reprint many of the typing errors have been corrected. It is hoped that this edition will be welcomed by both the scholars and students of Sanskrit·

I am grateful to the Vice-President of the Sanskrit Academy **Prof. M. Malla Reddy**, *Vice-Chancellor, Osmania University for the keen interest he has been taking in the affairs of the Academy.*

We also express our thanks to R. K. Printers for having brought the book in time.

Director

ABBREVIATIONS AND BIBLIOGRAPHY

अनर्घराघवम् of मुरारि : NSP 5th edition, 1913.

अवन्तीसुन्दरीकथा : TSS 172. Trivendrum 1954.

अष्टाध्यायी of पाणिनि : Shri Balamanorama Series No. 2. 1937.

अमरुशतकम् : Prof. Devadhar's edition POBA 1959.

अमरुशतकम् : NSP 2nd edition, 1929.

उ. रा. च. : NSP edition 1949.

उत्तररामचरितम्

उत्तररामचरितम्-घनश्यामटीका : Edited by Dr. P.V. Kane 1915.

ऋतुसंहार of कालिदास : NSP edition. 1946.

Epigraphia Indica vol. VI.

Aihole Inscription

Aih. Ins. : Aihole Inscription.

औ. वि. च. : of क्षेमेन्द्र Kavyamala Series I, NSP 1929.

औचित्यविचारचर्चा

C. C. : Catalogras Catalogrum.

कविरहस्य of हलायुध.

कादम्बरी of बाण	:	Poona Oriental Series 1935.
काव्यप्रकाश of मम्मट	:	Chowkhamba edition 1955.
काव्यप्रकाश of मम्मट (ch. I. II. III. X)	:	Edited by Prof. Gajendragadkar, 1959.
काव्यमाला I	:	NSP 1943.
काव्यमाला III	:	NSP 1943.
काव्यमाला VIII	:	NSP 1888.
काव्यादर्श of दण्डिन्	:	Edited by Dr. S. K. Belvalkar, POBA Series, 1924.
काव्यालंकार of भामह	:	Chowkhamba Series, 1928.
काव्यालंकारसूत्रवृत्ति of वामन	:	NSP edition 1953.
काव्यानुशासनम् of हेमचंद्र	:	Parikh's edition, 1938.
काव्यमीमांसा of राजशेखर	:	Gaikwad Oriental Series Baroda.
किरातार्जुनीयम् of भारवि	:	NSP 1953.
कुट्टिनीमतम् of दामोदरगुप्त	:	Bibliotheca Indica, Calcutta, 1944.
कुमारसंभवम् of कालिदास	:	NSP 1955.
कुवलयानन्द of अप्पयदीक्षित	:	NSP 1953.
कुवलयानन्दकारिका of आशाधर	:	NSP 1953.
गउडवहो of वाक्पति	:	Bombay Sanskrit Series.

चित्सुखी on मालतीमाधव	: by प्रत्यक्षस्वरूपभगवन्
छांदोग्य	:
छांदोग्योपनिषत्	:
जाबालोपनिषत्	:
जाम्बवतीपरिणय of पाणिनि	:
जा ह. जानकीहरणम्	: of कुमारदास, Nandargikar's edition, 1907. K.M. Joglekar's edition, 1908.
टीकासर्वस्वम्	: A commentary on अमरकोश Trivendram Sanskrit Series, 1914–17.
Des. Cat.	: Descriptive Catalogue of Skt. Manuscripts, Tanjore.
तिरुमलाम्बा	: Edited by Dr.L. Swarup 1938.
दशकुमारचरितम्	: Edited by M.R. Kale, 1926.
दशरूपकम्	: NSP 5th edition. 1941.
काशिका-विवरण-पञ्जिका (न्यास)	: A Commentary on Kasika by जिनेन्द्रबुद्धि, Rajasahi edition, 1913-25.

ध्वन्यालोक of आनंदवर्धन : Kashi Sanskrit Series, 1940.

नवसाहसांकचरितम् of पद्मगुप्त : Bombay Sanskrit Series, 1895.

नागानन्द of श्रीहर्ष : Kale's edition 1922.

नाट्यदर्पणम् : Vol. I-Gaikwad Oriental Series Baroda, 1929.

नाट्यप्रदीप of सुंदरमिश्र : Referred to in the India Office Catalogue, Vol. III.

नाट्यशास्त्र of भरत : Gaikwad Oriental Series, Baroda, 1956.

नाट्यशास्त्र of भरत : NSP edition, 1943.

निघण्टु of धनंजय : Vavilla edition, in Telugu Type Madras, 1949.

निरुक्त of यास्क : Edited by सत्यव्रत सामराज.

नीतिद्विषष्टिका : Edited by पं. सूर्यनारायण-शास्त्री. Madras, 1928.

पंचतंत्रम् : NSP edition, 1950.

पद्यचूडामणि : Edited by Dr. J. B. Chaudhari.

पद्यवेणी : Edited by Dr. J. B. Chaudhari.

पदमञ्जरी	:	Medical Hall Press Banaras. 1895.
पार्वतीपरिणय of बाण	:	NSP edition 1923.
पाणिनि	:	His times and works by Goldstucker.
पिंगलछन्दःशास्त्र	:	NSP edition, 1938.
Dr. Fleet.	:	Dr. Fleet Inscriptions.
प्रतिमानाटकम्	:	Paranjpe's edition.
प्रसन्नराघवम् of जयदेव	:	NS Panse's edition, 1894.
प्रियदर्शिका	:	of श्रीहर्ष 1941.
बा. रा	:	of राजशेखर (Medical
बालरामायणम्	:	Hall Press Banaras, 1869.
बुद्ध. च.	:	of अश्वघोष Nandargi-
बुद्धचरितम्	:	kar's edition, 1911.
बृहज्जातकम्	:	of वराहमिहिर Mysore 1929.
ब्रह्मसूत्रभाष्यम्	:	NSP edition. 1918.
भट्टबाणस्तुतिकुसुमाञ्जलिः	:	By. E. V. Vira Raghavacharya संस्कृत–साहित्य परिषत्पत्रिका 1930.
भामह	:	of भामह, Balamanorama
भामहालंकार		Press edition 1956.
भट्टिकाव्यम्	:	NSP edition, 1934.
भाऊदाजी	:	Literary Remains of Bhau Daji.

भागवतद्वैतव्याख्या	:	by भागवतद्वैतकार-विजयाचार्य
भारतचरितम्	:	of कृष्णकवि 1925.
भावप्रकाश	:	Series G. O. Baroda, 1929.
महाभारत	:	Vavilla's Nagari edition, 1932.
महाभाष्य of पतंजलि	:	NSP edition, 1942.
M. K.	:	History of Classical
M. Krishnamachariar	:	Sanskrit Literature
H. C. S. L.		by Dr. M. Krishnamachariar.
मालतीमाधवम् of भवभूति	:	NSP Edition 1936.
माहावीरचरितम् of भवभूति	:	NSP Edition 1926.
मालविकाग्निमित्रम् of कालिदास	:	NSP 1950.
मुद्राराक्षस of विशाखदत्त	:	Dhruva's edition Poona Oriental Book Agency 1930.
मृच्छकटिकम् of शूद्रक	:	NSP 1955.
मेघदूतम् of कालिदास	:	Dr. S. K. De's edition, 1957, (Sahitya Academy New Delhi)
यामुनाचार्यस्तोत्रसंग्रहः	:	
रत्नावली with टीका	:	By Nigudkar Shastri NSP edition 1925.
शङ्कराचार्यप्रकरणग्रन्थावली	:	POBA 1952.
दक्षिणामूर्तिस्तोत्रम्	:	,,
मनीषापञ्चकम्	:	,,
त्रिपुरसुन्दरीमानसपूजा	:	,,
शिवानंदलहरी	:	,,

दक्षिणामूर्तिस्तोत्रम्	:	बृहत्स्तोत्ररत्नाकर I&II NSP 1952.
रघुवंश of कालिदास	:	NSP 1949.
राघवपाण्डवीयम्	:	,,
राजतरंगिणी of कल्हण	:	Stein edition 1958.
लिंगाभट्टी	:	A Commentary on अमर-कोश.
वाल्मीकिरामायण	:	Published by N. Rama-ratnam, 1958.
बालकाण्ड		
अयोध्याकाण्ड		
अरण्यकाण्ड		,,
किष्किन्धाकाण्ड		
सुन्दरकाण्ड		
उत्तरकाण्ड		
व्यक्तिविवेक	:	Trivendrum Series 1909.
शङ्करविजयम्	:	Madras, 1954.
शाकुंतलम् of कालिदास	:	M. Williams edition,
विष्णुपुराणम्	:	1876.
H. I. L.	:	History of Indian Literature by Weber.
H. S. L.	:	History of Sanskrit Literature by Dr. A. B. Keith.
H. C. S. L.	:	History of Classical Literature by Dr. M. Krishnamachariar.
सुभाषितत्रिशती	:	NSP edition, 1957.
सेतुबंधमहाकाव्यम्	:	NSP 1935.

सौन्दरनन्द	:	Punjab Oriental Publication, 1928.
सं. वा. च. द्वि. भा.	:	संस्कृतवाङ्मयचरितम् in Telugu, Part II by म. सूर्यनारायणशास्त्री
सुभाषितरत्नभाण्डागारम्	:	NSP 1957.
सुभाषितहारावली of हरिकवि	:	
सुभाषितावली of वल्लभदेव	:	Peterson's edition 1886
सु. र. को. (सुभाषितरत्नकोश)	:	of Vidyakara. (Harvard OS 42)-1957.
सुवृत्ततिलक of क्षेमेन्द्र	:	काव्यमाला II, NSP 1932.
H.S.L C.	:	History of Sanskrit Literature (Classical Period,) Vol. I, by Dr. Dasgupta and Dr. S. K. De, 1947.
H. S. L.	:	Macdonell's History of Sanskrit Literature.
H. S. P.	:	History of Sanskrit Poetics by Dr. P. V. Kane, 1951.
Sanskrit Poets	:	Lives of, in Telugu by पं. म. सूर्यनारायणशास्त्री 1911.
हर्षचरितम्	:	NSP edition, 1914.
History of Nayaka Rajas of Tanjore (in Telugu)	:	by K. Sitaramayya 1932.

— :o: —

विषयानुक्रमणिका

		पृ.
१	वाल्मीकिः	१
२	व्यासमहर्षिः	२४
३	भागवतकर्तृकम्	३७
४	पाणिन्याचार्यः	४०
५	कात्यायनवररुचिः	४५
६	गोनन्दः	५०
७	गोपादित्यः	५२
८	धर्माशोकः	५३
९	भरतमुनिः	५५
१०	गुणाढ्यः	६१
११	चन्द्रकविः	६५
१२	भासमहाकविः	६८
१३	महाकवि-कालिदासः	८२
१४	मातृगुप्तः	९९
१५	भर्तृमेण्ठः	१०४
१६	अश्वघोषः	१०८
१७	हरिषेणः	११३
१८	भर्तृहरिः	११४
१९	वत्सभट्टिः	१२६
२०	चन्द्रगोमिन्	१२८
२१	बुद्धघोषः	१३०
२२	रणादित्यः	१३२
२६	शूद्रकः	१४६
२७	माघः	१५२
२८	दण्डयाचार्यः	१६०
२९	भट्टारहरिचन्द्रः	१६८
३०	भासः	१७२
३१	कुमारदासः	१७६
३२	हर्षदेवः	१८१
३३	मयूरकविः	१८६
३४	भट्टबाणः	१८९
३५	धर्मकीर्तिः	१९८
३६	कुमारिलभट्टः	२०२
३७	ललितादित्यः (मुक्तापीडः)	२०५
३८	यशोवर्मा	२०७
३९	भवभूतिः	२०९
४०	वाक्पतिराजः	२२३
४१	विशाखदत्तः	२२४
४२	विजयाङ्का	२२९
४३	शीलादेवी	२३३
४४	विकटनितम्बा	२३५
४५	प्रभुदेवी	२३८
४६	सुभद्रा	२३९
४७	जघनचपला	२३९

२३	सुन्दरपाण्डचः	१३४	४८	इन्दुलेखा	२४०
२४	भारविः	१३५	४९	मारुला	२४०
२५	विष्णुशर्मा	१४३	५०	मोरिका	२४१
५१	भावदेवी	२४२	६०	ज्ञानसुन्दरी	२५२
५२	प्रियंबदा	२४३	६१	पुष्पदन्तः	२५३
५३	वैजयन्ती	२४४	६२	अमरुकः	२५७
५४	गंगादेवी	२४५	६३	श्रीशंकराचार्याः	२६०
५५	तिरुमलाम्बा	२४६	६४	सुबन्धुः	२६४
५६	रामभद्राम्बा	२४७	६५	हलायुधः	२६७
५७	मधुरवाणी	२४९	६६	शिवयोगिन्	२७०
५८	लखीना	२५१	६७	मायुराजः	२७१
५९	त्रिवेणी	२५१			

— ० —

संस्कृत-कवि-जीवितम्

सर्वं ब्रह्मेति यदिदं कथ्यते तत्त्ववेत्तृभिः ।
सत्यं ज्ञानं सदानन्दं धाम ध्यायेम तत् परम् ।।
भावप्रपञ्चवैचित्रीदर्शनादर्शरूपिणे ।
नमोऽतिक्रान्तवृत्तान्तसाक्षिणे कविकर्मणे ।।
ध्यात्वा त्रयीविलासां वाणीममृतां श्रियं महर्षीणाम् ।
नत्वा गुरून् कवीन्द्रान् संस्कृत-कवि-जीवितं कुर्मः ।।

(१) वाल्मीकिमहर्षिः

यन्नाम भारतीयानां तारकं रामनामवत् ।
जीवन्तं तं कविं वन्दे श्रीमद्रामायणात्मना ।।

आद्यः कविरयं लोके वेदादन्यत्र नूतनच्छन्दोऽवतारस्य श्रीमद्रामायणस्य प्रणेता । जगदेकवन्द्यस्यास्य चरितं बहुभिर्बहुधा वर्णितम् । मया च मदीयसंस्कृतवाङ्मयचरित्रद्वितीयसम्पुटे सविस्तरं विशदीकृतम् । तदेव संक्षिप्य कथ्यतेऽत्र ।

अस्य जन्म नामानि च

महात्मनां केषांचित् पुराणपुरुषाणां जननादिवृत्तान्तः कालक्रमेणाद्भुतकथाकलितः पुराणादिषु प्रविष्ट इत्येतद्विदितमेव । तथैवास्य मुनेर्जन्मकथाऽपि विचित्रा दृश्यते। वल्मीकस्य (वामलूरोः) अपत्यं, वल्मीकाद्बहिरागतः, वल्मीकनामकमुनेरपत्यमिति च त्रिविधं वाल्मीकिसंज्ञानिर्वचनमस्ति पुराणेषु । एतादृशव्युत्पत्तीरनुसृत्य कः विश्वसिति साक्षादयं कविर्वामलूरोः सञ्जात इति ! [1]अपि च यः कश्चित् किरातः क्रूरकर्मा तापसानुग्रहवशात् रामनामजपतत्परः

....

1. T. C., pp. 4366-67; M. Krishnamachariar, p, 3.

कुत्रचिद्वनान्तरे निश्चलसमाधिनिष्ठया चिरकालमुषित्वा वल्मीक-समावृताङ्गो भूत्वा तदनन्तरमेकदा "आयाहि किरात" इति सप्तर्षिसमाह्वानं श्रुत्वा तद्वल्मीकाद्बहिरागतः, स एव ब्रह्मतेज-स्सम्पन्नः वाल्मीकिनाम्ना प्रतीत इत्यादिकं पद्मपुराणवचनमपि को नु विश्वसिति! किञ्च, वल्मीकनामकमुनिरेतोभक्षणाद् गर्भवत्यां सर्पाङ्गनायां संजातो नरशिशुरयं बाल्मीकिरित्यादिकमद्भुतमस-म्भाव्यं स्कान्दपुराणकथितं च कः शृणोति! तथा चैवंभूतेषु महत्त्वप्रतिपादकेषु विचित्रकथनेषु पर्यालोचितेषु वल्मीकनामकस्य कस्यचिद्भार्गवस्य महर्षेः पुत्रोऽयमाद्यः कविरिति प्रतिभाति। तत्त्वा-न्वेषणदृष्टेरयमभिप्रायः समुचितो भवेदिति मम मनीषा।

श्रीमद्रामायणकर्तृत्वेनास्य वाल्मीकिनामैव जगति प्रसिद्धं, तथापि त्रीणि नामान्तराणि सारस्वते दृश्यन्ते – ऋक्षः, भार्गवः, प्राचेतस इति। [1]चतुर्विंशे द्वापरे वेदविभजनाद् ऋक्षोऽभूद् व्यास-विरुदाङ्कित इति विष्णुपुराणादीनि प्रवदन्ति, यथा —

[2]ऋक्षोऽभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते।
परिवर्ते चतुर्विंशे ऋक्षो व्यासो भविष्यति॥ (वायु० २३)

तृणबिन्दुस्त्रयोविंशे वाल्मीकिस्तु ततः परः। (कूर्म०)

कृष्णयजुर्वेदप्रातिशाख्य उदाहृतेषु बहुमुनिमतेषु वाल्मीकि-मतमप्यस्ति। वाल्मीकिः प्राचेतसनाम्ना व्यवहृत इति सुप्रसिद्धमेव। श्रीमद्रामायणेतिहासकर्तुः वाल्मीकेरन्यो वाल्मीकिनामा मुनिः कुत्रापि न दृश्यते। तस्मादस्यैव वाल्मीकेर्ऋक्षः, भार्गवः, प्राचेतस इति नामा-न्तराणि सन्तीति निश्चिनुमः।

1. M. Krishnamachariar, p. 3.
2. विष्णुपुराण, 3. 3; M. Krishnamachariar, p. 3.

वाल्मीकिरद्वितीयो नाम्ना महिम्ना च। अत्रायं कतिपय-वैदिकर्षिनिर्णयविचारः। मदीये संस्कृतवाङ्मयचरित्रे सविशेषं चर्चितस्य विषयस्यायं संग्रहः।

ऋगादिमन्त्रद्रष्टृष्विन्द्राग्नियमवरुणादयः सन्ति, किं ते देवर्षयः उत मानवर्षयः? सूक्तद्रष्टृणामेकैकस्मिन् गोत्रे पितामह-नाम पौत्रस्य, तन्नाम तत्पौत्रस्य च इति क्रमप्राप्तत्वात् समाननामानः केचन सन्ति। तत्समाननामान एव केचन भिन्नगोत्रेष्वपि दृश्यन्ते। तादृशेषु ऋषिषु कः प्राचीनः? किंगोत्रः? कोऽर्वाचीनः स च किंगोत्रः? इति बहोः कालस्यातिक्रान्तत्वात् तत्सम्प्रदायविवेकस्य विकलत्वात् वेदानुक्रमणिकाऽप्यस्मिन् विषये तत्र तत्र संशयमापन्ना भाष्यकर्तारश्च भ्रान्ताः।

अत्रेमानि निदर्शनवचनानि :—

"अनुक्तगोत्रमाङ्गिरसं विद्यात्" इति शौनकानुक्रमणी। "अनुक्तगोत्रो यस्त्वत्र मण्डले लक्ष्यते मुनिः। स तु काण्व इति ज्ञेय" इति, "एषां तु गोत्रं क्वचिदप्रसिद्धम्" इति च बृहद्देवता। "प्रजापतिर्वाक्पुत्रो वा विश्वामित्रपुत्रो वा" इति भाष्याणि। "ऋजिश्ववीतहव्यौ भारद्वाजौ" इति सायणभाष्यम्। "आङ्गिरसौ" इति बृहद्देवता। "भृग्वङ्गिरसौ सहितौ बह्न्याथर्वणसूक्तानि दृष्टवन्तौ" इति तदनुक्रमणी। "प्रचेता आङ्गिरस" इति सर्वानुक्रमणी। "भृगुर्वै वारुणिः, वरुणं पितरमुपससार" इत्यादिना भृगुर्वरुणपुत्र इति तैत्तिरीयोपनिषत्। "प्रचेता एव वरुण" इति पुराणानि कोशाश्च। "ऋग्वेदसम्बन्धिनोऽङ्गिरसोऽन्योऽथर्ववेदसम्बन्ध्यङ्गिरा" इति, "तथैव प्रचेता" इति, "भृगुसंज्ञकास्त्रिचतुरा" इति च तत्तत्सूक्त-परिशीलकाः।

एवं विभिन्नेषु सन्दिग्धेष्वनुक्रमणिकादिवचनेष्वत्यन्तपुरातन-ममुं विषयं निर्णेतुं कः शक्नुयात्? तस्मात् स्थितस्य गतिश्चिन्त-

नीयेति समनुसृत्य वल्मीकमुनिसुतोऽयम् ऋक्षः, प्रचेतसो भृगोश्च गोत्रापत्यत्वेन प्राचेतसो भार्गव इति च पुरा व्यवहृत इति विश्वसिमः ।

अस्य कालः

एष विषयो मदीयवाङमयचरिते निर्णीतः । स एवात्र संक्षिप्य प्रोच्यते । तैत्तिरीयारण्यकोपनिषदाविर्भावः शालिवाहन-शकारम्भात् पूर्वस्यां पञ्चदशशताब्द्यां भवेत् । तदुपनिषद्द्रष्टा भृगुवल्ल्यां प्रतिपादितो वारुणिर्भृगुस्तत्कालात्पुरातनः, परन्तु कदा सञ्जात इति न जानीमः । तथापि तद्भृगुगोत्रसम्भवोऽयं वाल्मीकि-स्तु भृगुवल्लीप्रादुर्भावादत्यन्तमर्वाचीन एवेति प्रथमतो निश्चित्य प्रकृत-मनुसरामः ।

शालिवाहनशकारम्भात् पूर्वस्यां अष्टमशताब्द्यां वा ततोऽपि किञ्चित् पूर्वस्मिन् काले वा पाणिनिरासीदिति बहुविद्वदभिप्रायः[1] । तस्मात्पूर्वः आपस्तम्बः । तस्मात् पूर्वः स्मृतिकर्ता मनुः । अयोध्या-पुरनिर्मातेति रामायणनिर्दिष्टो मनुर्न स्मृतिकर्ता,[2] सोऽन्यः प्राचीनः । मनुस्मृतेः पूर्वा भारतसंहिता । तस्याः पूर्वं वाल्मीकिरामायणम् । तदेतत्सत्यम् । तथापि भारतरामायणाभ्यां मनुस्मृतिः पूर्वेति वादोऽत्र परिहर्तव्यः ।

रामायणे मनुस्मृत्यां च राजधर्मबोधकौ द्वौ श्लोकौ तुल्यौ दृश्यते —

राजभिर्धतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ।
शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते ।
राजा त्वशासत्पापस्य तदवाप्नोति किल्बिषम् ॥[3]

---

1. M. Krishnamachariar, pp. 83-84.
2. बाल० 5.6.
3. किष्किन्धा० 18. 32-33; मनु० 8. 316-318.

वालिने राजधर्मान् कथयतः श्रीरामस्येमानि वाक्यानि तत्प्रकरणे सुष्ठु सङ्गतानीति किष्किन्धाकाण्डपाठकानां सुविदितम् । तत्त्वविमर्शकानां च शास्यशासकभावफलबोधकाविमौ श्लोकौ राजधर्मप्रकरणयोग्याविति जानता मनुमहर्षिणा गृहीताविति, अथवा, केनाऽपि विदुषा मनुस्मृत्यां तत्प्रकरणे प्रक्षिप्ताविति चाभिप्रायः प्रस्फुटः स्यात् ।

अथापि किमनया विचारणया ? आदिकाव्यमिति सुचिरं विख्याते स्वतन्त्रे रामायणे तदनन्तरकालिकश्लोकप्रवेशः असम्भाव्यो हास्यास्पदं चेत्येकेनैवोत्तरेणालम् । यः कोऽपि मनुस्मृत्यभिमानी पूर्वोक्तरामायणश्लोकाभ्यां पूर्वं —

श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ ।
गृहीतौ धर्मकुशलैस्तत्तथा चरितं हरेः ॥[1]

इत्येकं श्लोकं प्रक्षिप्येमां भ्रान्तिं कल्पितवानित्यत्र न कोऽपि संशयः । एवमेव भारतसंहितायाः पूर्वा मनुस्मृतिरिति केषाञ्चिदभिप्रायोऽपि प्रक्षिप्तश्लोकमूलकत्वेन निरस्तः सद्विमर्शकैः ।

अथ भारतात्पूर्वं रामायणमित्यत्र कानिचित्प्रमाणानि । भारतारण्यपर्वणि रामायणकथा संक्षिप्ता । आदिपर्वणि च–

धर्मे चानवरौ राजन् सत्यतायां च भारत ।
रामाद्दाशरथेश्चैव गयाच्चैव न संशयः ॥

इत्यादिना भीष्मद्रोणौ दाशरथिरामसमाविति वर्णितौ । द्रोणपर्वणि चेत्थं युद्धकाण्डस्य वाल्मीकिश्लोक उदाहृतः —

अपि चैवं पुरा गीतः श्लोको वाल्मीकिना भुवि ।
न हन्तव्याः स्त्रिय इति यद् ब्रवीषि प्लवङ्गम ॥[2]

1. किष्किन्धा० 18. 31·
2. उद्योग० 32. 64-65.

तथा च—

अपि चैतत्पुरा राजन् मनुना प्रोक्तमादितः ।
यथोक्तमेतद्वचनं प्रागेव मनुना पुरा ॥
षडेतान् पुरुषो जह्याद् भिन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥[1]

इत्याद्ययोध्याकाण्डश्लोकाः शान्तिपर्वणि स्वीकृताः । अपि च, "वाल्मीकिश्च महातपाः, वाल्मीकिस्त्वथ काश्यप" इति[2] वाल्मीकिनाम बहुवारमुदाहृतं भारते । इत्याद्यान्तरङ्गिकप्रमाणैः पौराणिकसम्प्रदायः काव्योत्पत्तिमार्गः पूर्वमहाकविप्रशंसा चेति बहिरङ्गप्रमाणैश्च भारताद्रामायणं पूर्वमिति सिद्धकथनमेव भवति ।

[3]रामयणभारतेतितिहासौ बृहदारण्यकाद्युपनिषद्भ्यः प्राचीनतमौ, तथापि तयोः काव्यरूपत्वमर्वाचीनमेव ताभ्यः । मुख्यचारित्रकविषयोऽयं वाल्मीकिवचनेनैव ज्ञायते —

इक्ष्वाकूणामिदं तेषां राज्ञां वंशे महात्मनाम् ।
महदुत्पन्नमाख्यानं रामायणमिति श्रुतम् ॥
तदिदं वर्तयिष्यामि सर्वं निखिलमादितः ॥[4]

तस्मात्पूर्वोक्ततैत्तिरीयाख्यकोपनिषदाविर्भावकालात्परं, भारतसंहितायाः पूर्वं रामायणमजायतेति विश्वस्य, महामुनिर्वाल्मीकिः

---

1. शान्ति॰ 57. 44-45.
2. आरण्य॰ 147.11; सभा॰ 7.16; आरण्य॰ 86.120.
3. रामायण
4. बाल॰ 5. 3.

शालिवाहनशकारम्भात्पूर्वं त्रयोदशशताब्दीतो न पर इति भावयामः। परिशील्यतां तत्त्वं पाठकैः सुधीभिः । अथात्र—

संशयनिवारणम्

यद्यपि आयोध्याकाण्डे, "रामस्तु नलिनीरम्याम्" इत्यादिकः[1] षण्णवतितमः सर्गोऽधिकपाठत्वेन केषुचिन्मुद्रितपुस्तकेषु दृश्यते, तथापि तद्वदष्टोत्तरशततमनवोत्तरशततमावधिकपाठसर्गाविति यत् सन्दिह्यते कैश्चित्, तदयुक्तम् ।

अपि च तत्रत्यानि नास्तिकमतसम्बन्धीनि वचनानि प्रक्षिप्तानीति यदुच्यते कैश्चिदपरैस्तदप्यापातरमणीयम् । तदेतत्सर्वं वाल्मीकीयमेव, नान्यदीयमिति निश्चिनुमहे । तत्रेमानि जाबालिवाक्यानि —

अन्नस्योपद्रवं पश्य मृतो हि किमशिष्यति ।
यदि युक्तमिहान्येन देहमन्यस्य गच्छति ॥
दद्यात्प्रवसतः श्राद्धं न तत्पथ्यशनं भवेत् ।
प्रत्यक्षं यत्तदातिष्ट परोक्षं पृष्ठतः कुरु ॥[2]

श्रीरामभाषितानीमानि—

निन्दाम्यहं कर्म पितुः कृतं तद्यस्त्वामगृह्णाद्विषमस्य बुद्धिम् ।
बुद्ध्याऽनयैवंविधया चरन्तं सुनास्तिकं धर्मपथादपेतम् ॥
यथा हि चोरः स तथा हि बुद्धस्तथागतं नास्तिकमत्र विद्धि ।
तस्माद्धि यः शङ्क्यतमः प्रजानां न नास्तिके नाभिमुखो बुधः स्यात् ॥[3]

---

1. अयोध्या. 96.
2. अयोध्या 108. 14–17.
3. „ 109. 33–35.

पुनर्जाबालिवचनानि —

स चापि कालः समुपागतः शनै-
र्यथा मया नास्तिकवागुदीरिता ।
निवर्तनार्थं तव राम कारणात्
प्रसादनार्थं च मयैतदीरितम् ॥[1]

तदनु वसिष्ठवाक्यमिदं दशोत्तरशततमसर्गारम्भे–

जाबालिरपि जानीते लोकस्यास्य गताऽगतिम् ।
निवर्तयितुकामस्तु त्वामेतद्वाक्यमुक्तवान् ॥[2]

अस्य सम्भाषणस्य प्रकरणोचितत्वात् कस्यापि मनसीमानि प्रश्नोत्तराणि प्रक्षिप्तानीति शङ्का नोदेयात् । तदास्ताम् । प्रकृतस्य सम्भाषणस्य पुरातनो रामेतिहासो यथार्थाक्षरं मूलमिति त्रेतायुगे रामेण नास्तिकनिन्दा कृतेति च न भ्रमन्तु । किन्तु मनाक् प्रचलत् नास्तिकमतमुद्घाट्य वाल्मीकिस्तन्निराकरणं वैदिकमतरक्षणं च कार्यमिति कथानायकमुखेन विद्वल्लोकायोपादिशदित्यामनन्तु । एवमेव शततमे सर्गे लोकायतमतनिरसनं चाचरितमिति विदितं भवतां पाठकानाम् । अन्यच्च पूर्वोक्तश्लोकदृष्टौ बुद्धतथागतशब्दौ मायादेवीसुतस्य गौतमबुद्धस्य ज्ञापकाविति भ्रान्त्या तस्मात् परो वाल्मीकिरिति स्वप्नेऽपि न स्मरन्तु । किन्तु कल्यादिबुद्धपरौ तौ शब्दौ यौगिकार्थमाश्रित्य गौतमबुद्धस्य समन्विताविति तत्पर्यायपदत्वेन संगृहीतावमरसिंहेनेति च निःशङ्कं निश्चिन्वन्तु । अत्रायं विवेकः–

भगवतो नारायणस्य दशावतारवर्णनं सर्वपुराणेष्वस्ति । तेषां ग्रन्थरूपस्तु रामायणात्परः । तथापि, ऐतिहासिकसम्प्रदाय-

1. अयोध्या 109. 39.
2. „ 110. 1.2.

वशात्तद्वर्णितमवताग्पुरुषचरितादिकं तु पुराणमित्येव स्मरेम। तत्र भागवते स्थितमिदं बुद्धकल्क्यवतारवर्णनं प्रथमस्कन्धे तृतीयाध्याये —

ततः कलौ सम्प्रवृत्ते संमोहाय सुरद्विषाम् ।
बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति ।।
अथाऽसौ युगसन्ध्यायां दस्युप्रायेषु राजसु ।
जनिता विष्णुयशसो नाम्ना कल्किरतद्गुरुः ।।

अथ द्वितीयस्कन्धे सप्तमाध्याये च–

देवद्विषां निगमवर्त्मनि निष्ठितानां
पूर्भिर्मयेन रचिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमतिप्रलोभ-
वेषं विधाय बहु भाष्यत औपधर्म्यम् ।। (२.७.३७.)

स्वाहा स्वधा वषडिति स्म गिरो न यत्र
शास्ता भविष्यति कलेर्भगवान् युगान्ते ।। (२.७.३८)

एभिः कलेरादौ बुद्धोऽन्ते कल्किश्च जनिष्यतीत्युक्तम् । एतेन कल्यादौ ये सुरद्विषः वेदमार्गनिष्ठाः भूत्वा तद्बलेन दृप्ताः, सज्जनहिंसामकुर्वन् तेषां मतिभ्रंशाय, प्रलोभनाय, नाशाय च भगवान् समजनि कपटवेषधारी बुद्धात्मना सत्कर्मरक्षणद्वारा लोकोद्धरणार्थमिति ज्ञायते । सूचितवानयमाद्यः कविरमुमेवार्थं पूर्वोक्ते "यथा हि चोर" इत्यादि रामायणवाक्ये । तत्र चोर इति विशेषणस्य कपटवेषधारीत्येवार्थो वक्तव्यः । तेन वाल्मीकिना कीर्तितो बुद्धः भागवतोक्तजिनसुतः कलियुगादिबुद्धः; न तु मायादेवीपुत्रः । शौद्धोदनिस्त्ववर्चीनः साक्षाद्वैदिककर्मद्वेषी गौतमबुद्ध इति तत्त्वमवगन्तव्यमित्यलं पल्लवितेन ।

वाल्मीकेर्महत्त्वम्

सोऽयमृषिर्द्वापरयुगवर्तीत्यादिकमहिमप्रतिपादिकाः पौराणिकातिशयोक्तीरपास्य पश्यतां त्रिसहस्रवत्सरेभ्यः गङ्गातमसातीरयोरयं तपोज्ञानयोगनिष्ठो भूत्वा न्यवसदिति तत्त्वं प्रत्यक्षं भवेत्। न मन्त्रद्रष्टाऽपि मन्त्रराशिपारदृश्वायं ऋक्सामयजुर्विभजनेन वेदव्यासविख्यातिमाप्तवानिति पुराणोक्तिरपि विश्वसनीया स्यात्। किञ्च ज्ञानयोगदृष्टिरयमाश्रमवास्यपि अखिलभूभागजनपदानां विविधनदीनदपर्वतारण्यानां संवेत्ता, वैदिकधर्मनिरतोऽपि निखिलप्रपञ्चधर्मज्ञः, वैदिकशब्दपयोधिनिमग्नोऽपि लौकिकभाषास्वरूपसारज्ञः, शुचिवर्तनः, सुश्लोको, ब्रह्मनिष्ठस्तापसकुलालङ्कार इत्यस्य काव्यमेव व्यक्ती करोति।

कवितोत्पत्तिः

ऋगादिसंहिताशब्दजालं व्यवहारे क्रमशः सरलतां गतं ब्राह्मणारण्यकेषु प्रयुज्यमानमपि। तस्यच्छन्दो वेद इति च प्राथमिको व्यवहारः सिद्धः। आर्यजातिभिरादितो लौकिकव्यापारेषु व्यवह्रियमाणस्य गच्छता कालेनार्थतः स्वरूपतश्चापि विकृतिं गतस्य तस्यैव लोको भाषेति च द्वे संज्ञे निरूढे। सा लौकिकभाषाऽपि आर्यावर्ते सर्वत्र व्यवहारभेदेन कालभेदेन च रूपे चार्थे च वैकल्यमायान्ती, तात्कालिककश्यपापिशल्यादिभिः संस्कृता संस्कृतसंज्ञामलभत। सा संज्ञा वाल्मीकेः प्रागेव लोके निरूढा। तत्संस्कृतं च द्विजातिष्वेव तदा निरूढमित्यत्र रामायणमेव प्रमाणम्—

धारयन् ब्राह्मणं रूपमिल्वलः संस्कृतं वदन्॥[1]
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।

---

1. अरण्य 11. 53.

बहु व्याहरताऽनेन न किञ्चिदपशब्दितम् ॥[1]
यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ॥[2]

तादृशस्य तात्कालिकसंस्कृतस्य काव्यरूपं प्रथमोदाहरणं रामायणम् । तस्य तु जाह्नवीसमीपवर्तिनस्तमसाया अकर्दमतीर्थस्य परिसरवर्तिनो वल्कलधारिणः किरातनिहतक्रौञ्चदर्शनेन करुणाविष्टस्यास्यैव ऋषेः वाचि सद्यः सम्भूतः समाक्षरपादचतुष्टयबद्धो नूतनच्छन्दोऽवतारोऽयं श्लोकः श्रीकारः —

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

अप्रयत्नाविर्भूतेनानेन श्लोकेन विस्मितो भावितात्माऽयं महाकविः, 'कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहम्' इति प्रतिज्ञातवानित्याद्येतच्चरितं जगद्विदितमेव ।

रामायणप्रशंसा

त्रेतायुगवर्तिनो भगवदवतारस्य श्रीरामस्य महिमेति पूर्वमुनिभिः सम्भावित एकनायकत्वेन परिक्रियेति विद्वल्लोकविख्यातोऽयमितिहासः संस्कृतकाव्यकल्पवल्ल्या मूलम् । सहृदयहृदयङ्गमाया मृदुमधुरभाषाया जन्मभूमिः । कथापात्ररसौचित्यानामालवालम् । नवरसानामावासः । अखिलकाव्यगुणानामादिमं लक्षणं, लक्ष्यं च । आस्तिकानां धर्माधर्मविवेकबोधक आर्षवेदः । ऐहिकामुष्मिकविज्ञानोपदेष्टा परमगुरुः । पठतां वाग्भूषणम् । शृण्वतां श्रवणालङ्कारः । ध्यायतामात्मानन्दः । प्राचीनभारतवर्षस्य चित्रपटः । अखिलजातिमताश्रमाचाराणामादर्शः । मानवजन्मनः साफल्यम् । किम्बहुना,

1. किष्किन्धा. 3 29.
2. सुन्दर. 30. 17-18.

प्रतिदिवसं सप्तसर्गपारायणनियमेन निरन्तरायं सप्तवारमामूलाग्रं पठिते रामायणे पाठकस्येष्टार्थसिद्धिर्भवतीति पूर्वाचारविश्वासः अधुनाऽपि भक्तलोके प्रचलतीत्यनेनैवास्य महिमा ज्ञायते ।

रामायणं विनाऽर्याणां शरणं न हि दृश्यते ।
तन्नामश्रवणं वापि विनाऽनार्यो न विद्यते ।।

इति मम विश्वासः ।

ग्रन्थपरिमितिविचारः

षट्काण्डं काव्यमिदं चतुर्विंशत्सहस्रिका संहितेति काण्डान्तगद्यानि कथयन्ति, पुराणादीनि च प्रथयन्ति । तथापि बालकाण्डचतुर्थसर्गे दृष्टस्यास्य श्लोकस्यार्थोऽत्र विचारणीयो भवति —

चतुर्विंशत्सहस्राणि श्लोकानामुक्तवान् ऋषिः ।
तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरम् ।।
कृत्वाऽपि तन्महाप्राज्ञः सभविष्यं सहोत्तरम् ।[1]

वाल्मीकिः २४००० श्लोकान्, ५०० सर्गान्, ६ काण्डानि, तथैव भविष्योत्तरकाण्डञ्च निर्मितवानित्यर्थो ज्ञायते अनेन श्लोकेन । परिगणितेषु सर्गेषु श्लोकेषु च ३७ सर्गा अधिकाः, ३३०० श्लोका नष्टाश्चेत्यवगतम् । मुद्रणभिन्नेषु त्रिष्वपि पुस्तकेषु च दृश्यन्ते । एवञ्च उत्तरकाण्डग्रन्थसङ्कलने तु सर्गाः ६४८, श्लोकाः २५२०० भवन्ति । अधिकसर्गश्लोकान् विनापि षट्काण्डसर्गाः ५३७, श्लोकाः २०७००, अधिकपाठश्लोकाः ५००, उत्तरकाण्डसर्गाः १११, श्लोकाः ४५००, अधिकसर्गाः १३, अधिकश्लोकाः ११२८ । चतुर्विंशत्सहस्रिकेयं संहितेति महाजनप्रतीत्यनुरोधात् ग्रन्थपातः मुद्रणोपलब्धकुण्डलीकृताधिकपाठश्लोकानुरोधात् ग्रन्थप्रक्षेपश्चावश्यमङ्गी-

1. बाल. 4. 2.

कार्यौ। एतावुभौ प्राचीनबहुग्रन्थसाधारणौ किल। उत्तरकाण्ड-निर्माणानन्तरं द्वित्राः सर्गाः बालकाण्डे तथैवायोध्यादिषु च प्रविष्टा इति ग्रन्थरीतेर्विशेषतः विदितमेव। तथाप्यादितः प्रतिदिवसं पठन-पाठनपारायणेष्वुपयुज्यमानेऽस्मिन् ग्रन्थे तत्पाठकानामक्षिणी पिधाय तावन्तस्त्रिशदधिकाः सर्गाः प्रक्षिप्ता इति तु न विश्वसनीयम्। तस्मात् पूर्वश्लोकोक्तसर्गसंख्या स्थूलदृष्ट्या कथिता अथवा पाठन-पारायणोपयोगाय कैश्चिदतिदीर्घाः कतिपयसर्गाः द्वेधा त्रेधा विभक्ता इति सर्गाधिक्यविषयः संशयमापन्नः। तदत्र रामायण-ग्रन्थतत्त्वज्ञाः प्रमाणम्।

अथोत्तरकाण्डविषयः

यत्किञ्चिदद्भुतोदन्तावपि प्रारिप्सितग्रन्थमहिमप्रतिपादनकथा-विषयसंग्रहादिसूचकौ बालकाण्डप्रथमद्वितीयसर्गौ वाल्मीकिनैव निर्मितौ। अत एव द्वितीयसर्गान्तिमेन – "रघवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम्"[1] इत्यनेन, "सर्वापूर्वमियं येषामासीत् कृत्स्ना वसुन्धरा"[2] इत्यादिपञ्चमसर्गारम्भः सुष्ठु सङ्गच्छतीति च, सविमर्शपाठकाः जानीयुः। तेन बालकाण्डतृतीयचतुर्थसर्गौ प्रक्षिप्ताविति वक्तुं शक्यम्। अत्र कारणाणि भङ्ग्यन्तरेण पुनः कथा-विषयसूचनमप्रसक्तकुशीलवाद्युदन्तवर्णनमित्यादीनि बहूनि सन्ति। तदास्तां तावत्। "कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहम्"[3] इति द्वितीयसर्गान्ते विध्याद्यर्थकक्रियया "महदुत्पन्नमाख्यानं रामायण-मिति श्रुतम्। तदिदं वर्तयिष्यामि" इति पञ्चमसर्गारम्भे[4] भविष्य-

1. बाल. 2. 43.
2. बाल. 5. 1.
3. बाल. 2. 41.
4. बाल. 5. 3-4.

दर्थकक्रियया च प्रतिज्ञाय कविरयं ग्रन्थारम्भे प्रवृत्त इति ज्ञायते। एवं स्थिते तदारम्भात्पूर्वमेवोत्तरकाण्डे रचितमिव "वैदेह्याश्च विसर्जनम्। अनागतं च यत्किञ्चिद्रामस्य वसुधातले। तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवान् ऋषिः"[1] इति तृतीयसर्गान्तिमश्लोकस्थभूतार्थकक्रिया ज्ञापयति। कथमेतत् परस्परविरुद्धकथनमत्र सङ्गतं स्यात्? तच्चकारेति वाक्यं वाल्मीकीयमिति वक्तुं कथमुचितं स्यात्? अन्यच्च त्रेतायुगवर्तीति पुरातनेतिहासवर्णितः श्रीरामो भगवदवतारः, तदाख्यानप्रवर्तको वाल्मीकिः कलियुगवर्ती कविः। तयोः समकालवर्तित्वकथनं वा कथं युज्येत? तस्मात् आदिकाव्यपठनेन सन्तोषपरवशः कोऽपि विद्वान् भारतीयोदन्तेन कृष्णद्वैपायनस्येव रामचरितेन वाल्मीकेः सम्बन्धं कल्पयन्नुत्तरकाण्डं विरच्य तत्प्रसक्तिमाक्षिप्य, बालकाण्डतृतीयचतुर्थसर्गौ निर्माय, वाल्मीकिरेवोत्तरकाण्डं रचितवानिति प्रथामकल्पयदित्यत्र न कापि शङ्केति मन्तव्यम्। अपि च तद्भावस्थापनार्थमयोध्याकाण्डेऽपि षट्पञ्चाशे सर्गे वनवासारम्भे चित्रकूटे श्रीरामः सीतालक्ष्मणसहितो वाल्मीकिदर्शनं कृतवानिति द्वौ श्लोकौ च प्रक्षिप्तवानेवं सन्दर्भशुद्धिरहितं—

इति सीता च रामश्च लक्ष्मणश्च कृताञ्जलिः।
अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन्॥

तान् महर्षिः प्रमुदितः पूजयामास धर्मवित्।
आस्यतामिति चोवाच स्वागतं तु निवेद्य च॥[2]

1. बाल. 3, 38-39.
2. अयोध्या. 56. 16.

ग्रन्थप्रक्षेपविषये च पुनरेकं निदर्शनम् । बालकाण्डस्य सप्ततितमसर्गे अयोध्याकाण्डस्य दशोत्तरशततमसर्गे च सूर्यवंश-पुरुषक्रमोऽस्ति । उभयत्र यत्किञ्चिद्विशेषणपदभेदोऽस्तु नाम, तद्वैषम्यमविवक्षितम् । नहुषपुत्रो ययातिः, तस्य तनयो नाभाग इति प्रथमक्रमे, ययातिस्मरणं विना नहुषतनयो नाभाग इति द्वितीय-क्रमे च दृश्यते । विनैतं मुख्यभेदमुभावपि पुरुषक्रमपाठौ समानौ, तस्मादनयोरेकः सर्गः प्रक्षिप्त इति वक्तव्यमेव । आलोचितेऽस्मिन् अयोध्याकाण्डस्थितपुरुषक्रमपाठः प्रक्षिप्त इति वक्तुं शक्यम् ।

अथ कथासत्यत्वम्

ऋषिपारम्पर्योपदेशमूलेषु पुरावृत्तेषु रामेतिहासश्चैकः । वेदेष्वर्थवाद इवाऽस्मिन्नपि प्ररोचनार्थाः कथांशाः केचन सन्ति । अद्भुतोदन्तवर्णनानि च कानिचिद् दृश्यन्ते । न तावतेदं कल्पित-मिति वाच्यम् । किन्तु यथाश्रुतमेतदाख्यानं हृदयाकर्षिणा संविधा-नेन लोकानुग्रहकाङ्क्षी भगवान् वाल्मीकिः काव्यं चकारेत्येव विश्वास्यम् । कोसलदेशे सरयूतीरे अयोध्यायामिक्ष्वाकुराजवंशे समुत्पन्नमिदमाख्यानमिति काव्यमुखम् । अस्मिन् वर्णिता देशनदी-पर्वतादयः सर्वे ब्राह्मणादिषु संलक्ष्यन्ते । विशेषतश्च कोसलविदेह-देशयोर्मध्यवर्तिनी सदानीराख्या नदीत्यादिप्राचीनभौगोलिकविषयाश्च ब्राह्मणादिषु कथिता एव ।

एवं प्राचीनमहर्षिभिः संस्मृतः संक्षिप्य संस्तुतोऽयं रामेति-हासः तेभ्योऽपि प्राचीनतरः इति वक्तुं को नु सन्दिह्यात् ? एता-दृशे महनीयेऽस्मिन् प्रधानपात्राणां केषांचित् जन्मादिवृत्तान्ताः नूनं मानवातीतमहिमान्विताः सन्तु नाम, न तावता कथासत्यत्वस्य हानिः । यतोऽयं देवांशसम्भूतानामुदन्त इव कविना वर्णित इति सर्वमनवद्यम् ।

कैकेयीवरमाहात्म्यम्

रामाख्यानविस्तृतेः प्रधानहेतुः कैकेयीवरः। यदि नाभविष्यत्स वरः, कथेयं सीताकल्याणेन समाप्तिमगमिष्यत्। सोऽयं वरः प्रच्छन्नो मन्दं मन्दं कथारङ्गं प्रविश्य नवरसभरितं रामायणनाटकं प्रदर्शयामास। धर्मज्ञो दशरथः सत्याय सौशील्यं समर्प्य प्रेम्णे प्राणानदात्। सानुजो दाशरथिरारण्यकव्रतशीलः, असूर्यम्पश्या सीता दुर्भरदुःखाकुला, सौभ्रात्रमूर्तिर्भरतो राज्यसुखविमुखश्चासन्।

श्रीरामो भगवदवतार इत्यनादिविश्वासे न कस्याप्याग्रहः। तथापि दिव्यत्वान्मानवत्वमेवाधिकतरं प्रथयत्यस्य चरितम्। तत्रेदमेकमुदाहरणम्। वनप्रविष्टो नायकः प्रथमस्यां रात्रावेवं जगाद सौमित्रिमुद्दिश्य—

ध्रुवमद्य महाराजो दुःखं स्वपिति लक्ष्मण।
कृतकामा हि कैकेयी तुष्टा भवितुमर्हति॥

अपि न च्यावयेत्प्राणान् दृष्ट्वा भरतमागतम्।
अनाथश्चैव वृद्धश्च मया चैव विना कृतः॥

किं करिष्यति कामात्मा कैकेयीवशमागतः।
इदं व्यसनमालोक्य राज्ञश्च मतिविभ्रमम्।
काम एवार्थधर्माभ्यां गरीयानिति मे मतिः॥

कोह्यविद्वानपि पुमान् प्रमदायाः कृते त्यजेत्।
छन्दानुवर्तिनं पुत्रं तातो मामिव लक्ष्मण॥[1]

अत्र पितुः सत्यसन्धतां तद्वात्सल्यं कैकेयीवरस्वरूपं च जानन् पितृवाक्यपरिपालनकृतप्रतिज्ञो धीरोदात्तः श्रीरामः कथमेवं मातापितृनिन्दां कृतवानिति सद्यः संशय आपद्येत पाठकानाम्। सत्यम्।

1. अयोध्या. 53. 6-10.

तथाप्येतद्भावे चिन्तिते नेयं निन्दा, किन्तु कष्टदशां प्राप्तस्य पितुः दुःखं ध्यायतो रामस्य दुःखमेवेति न केनापि न ज्ञायते। तच्च विपत्समये धैर्याच्च प्रच्युतस्य मानवहृदयस्य लक्षणम्। एतदेव ज्ञापयति सीतापहरणलक्ष्मणमूर्च्छानिमित्तकमस्य विलपनमपि। दुःखावेशात् पतिं विनिन्द्य ततः पश्चात्तप्तायाः कौसल्यायाश्च वचनमप्यत्र निदर्शनम् –

जानामि धर्मं धर्मज्ञ त्वां जाने सत्यवादिनम्।
पुत्रशोकार्त्तया तत्तु मया किमपि भाषितम्॥[1]

एतेन रामस्य पितृभक्तिर्न कलङ्कितेति सम्भाव्यम्। कैकेयी-पात्रं तु मन्थरादुर्बोधादिहेतुभिः समर्थयन्नपि लोभगुणस्याद्यं निदर्शन-मिव कविरेव निन्दापात्रं चकार। कथाप्रवर्तनदृष्टेः तदुचितम्। वास्तवकथनं चात्र न दूषणम्। तथापि कृतकामा हीत्यादिकं सोल्लुण्ठवचनं मानवस्वभावोचितमेव। सकलसद्गुणसम्पन्ना सीता-प्येवं रामायाक्रोशन्ती पुत्रकल्पं सौमित्रिं निनिन्द कनकमृगग्रहण-सन्दर्भे।

भरतलक्ष्मणौ साकारं सौभ्रात्रं, मूर्तिमत्सौशील्यम्। तावपि रामवनगमनेन दुःखितौ कैकेयीं निनिन्दतुः। तद्वरमूलकमेतादृशं मानवशीलं प्रदर्शयता लोकज्ञेन कविना रामाख्यानस्य सत्यत्वमपि प्रदर्शितमिति बोद्धव्यम्।

कवेर्भूगोलविज्ञानम्

वक्तुमतिसूक्ष्मापि रामकथा विज्ञानदायकैर्बहुविधचित्रविचित्र-वर्णनैः काव्ये प्रपञ्चिता। तत्र कवेरसाधारणप्रतिभैव कारणम्। वेदेष्वदृष्टानि कानिचिन्नदीद्वीपपर्वतजनपदादीन्यस्मिन् वर्णितानि।

1. अयोध्या. 62. 14.

तत्रापि किष्किन्धाकाण्डममूल्यवर्णनोपेतम् । वाल्मीकिकाले एवार्यजातिः सर्वस्मिन् भरतखण्डे विस्तृता । तात्कालिकजनपदनामानि कानिचिदद्य न श्रूयन्ते, तदवधयश्च न ज्ञायन्ते । पश्चिमसमुद्रतीरस्था इव वर्णिता जटीमुरच्यङ्गलोपावन्त्यादय[1] उदाहरणमत्र । अवन्त्येव क्रमशः उज्जयिनीनाम्ना परिणतेति वक्तव्येऽपि न सा समुद्रतीरेऽद्य। शान्तसमुद्रलोहितसागरलोहमुखैकपादनरजातिनरव्याघ्राख्यकिरात – जात्यादिबहुविधविषयान्[2] वर्णयतो वाल्मीकेर्भूगोलविज्ञानमत्र प्रतिफलितम् । तात्कालिकजनस्थानपञ्चवटीदण्डकारण्यनिरूपणे अधुनातनपरिशोधकाभिप्राये बहुविधेऽपि तत्सन्निवेशः सिद्ध एव । एतेन वाल्मीकिरुत्तरापथमिव सर्वमपि दक्षिणापथं दृष्टवानिति भरतखण्डबहिर्भागांश्च सम्यग् ज्ञातवानिति च द्योत्यते । आरट्टकशककाम्बोजादिविदेजातिवर्णनं सप्तराज्यशोभितयवद्वीपवर्णनं चात्र निदर्शनम् । अत्र कश्चिद्विमर्शः– क्रीस्तोः पूर्वस्मिन् ३२६ काले अलग्जाण्डरुनामा विदेशवीरः उत्तरहिन्दूदेशविजयार्थमागतः । तेनानीता ग्रीकसैनिका एव यवनाः । तद्वर्णनाद् भारतं तत्परस्मिन् काले प्रणीतमिति वक्तुं शक्यम् । तत्पूर्वस्मिन् काले सञ्जाते रामायणे तु यवनवर्णनं यद् दृश्यते तत् प्रक्षिप्तमिति[3] मेक्डोनल्प्रभृतिभिः पाश्चात्यपरिशोधकैर्यदुक्तं तदनुचितम् । कात्यायन-पाणिन्याचार्य[4] - शाकटायनैर्यवनयवनानीशब्दौ निरूपितौ, इत्यनेनैव परास्तस्तदभिप्रायः । यवद्वीपादन्यस्माद्वा आर्यावर्तं समागतान् यवनान् प्राचीनभारतीया अजानतेत्यत्र न कश्चिद्विशयः ।

1. किष्किन्धा. 42. 13-14.
2. ,, ,,
3. Macdonnel.
4. अष्टा. 4. 1, 49, 75.

रसालङ्कारपोषणम्

काव्येऽस्मिन् प्रधानरसो वीरः। प्रधाननायकस्य महावीरत्वात् अङ्गानि श्रृङ्गारकरुणादयः। तत्र हास्यश्रृङ्गारवर्णनमत्यल्पम्। वीरश्च विशेषतोऽत्रमहिमान्वितः। निर्वर्तितलोकोत्तरचित्रविचित्राद्भुतकर्मणि महर्षितपस्तेजोरूपिणि तदस्त्रमहिम्नि न जायेत विचिकित्सा काचिदिदानीन्तनप्रकृतिशास्त्रधुरीणनिर्मिताणवास्त्रमहत्त्वं पश्यतां श्रृण्वतां च। अप्रतिहतमहिमसम्पन्नानि परमर्षीणां तपांसि खलु। रामायणीयं रसपोषणमनन्तरकाव्यानामाद्यं निदर्शनम्। तत्र श्रृङ्गारमार्दवलक्ष्यभूतौ इमौ श्लोकौ—

दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः।
नवसङ्गमसव्रीडा जघनानीव योषितः॥[1]

चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलिततारका।
अहो रागवती सन्ध्या जहाति स्वयमम्बरम्॥[2]

आद्ये श्लोके प्राकरणिकं शरन्नदीवर्णनं प्रधानम्। तस्मादुपमेयस्य प्राधान्यमेवात्र। प्रथमत एव बोध्यमपि तदधःकृत्य सहृदयहृदयाह्लादकमुपमानमेवाग्रतः पाठकानां हृदयमाकर्षतीति उपमाचमत्कारोऽत्र ध्येयः। एवं मुग्धकुलयुवतीनां सव्रीडानुरागचेष्टितमुदाहरता कविना श्रृङ्गारसारः प्रकाशित इति बोध्यम्। द्वितीये तु श्लेषेण प्रियसमागमत्वरमाणप्रौढानुरागचेष्टितं सूचितमिति स्पष्टमेव। उपमारूपकोत्प्रेक्षाद्यलङ्कारा: सन्तु नाम ऋगादिषु तानप्यलंकृत्य प्रयुक्तवानयं महर्षिरिति विशेषोऽत्र द्रष्टव्यः। तेषु पाठकैर्विदितेष्वपि क्रमालंकारस्यैकमुदाहरणम्—

---

1. किष्किन्धा० 60. 58.
2. ,, 60. 45.

सीताकपीन्द्रक्षणदाचराणां राजीवहेमज्वलनोपमानि ।
सुग्रीवरामप्रणयप्रसङ्गे वामानि नेत्राणि समं स्फुरन्ति ॥[1]

राजधर्मादिसांधिकाचाराः

सकलेषु सर्गेषु पाठकरञ्जकेष्वप्ययोध्याकाण्डशततमः सदाचारस्य सच्छीलस्य राजनीतेश्चाश्रय इवाभाति । तस्य "कच्चित्सर्ग" इति पण्डितप्रवादः । ये राजधर्माः प्रजापालकानामवश्यमनुष्ठेयास्तानुपदिशन्निव श्रीरामो भरतमयोध्यावृत्तान्तमपृच्छत् "कच्चिद् धारयते तात राजा यत् त्वमिहागतः"[2] इत्यादिप्रश्नैः ।

तेषु उत्तमामात्यनियोजनविषये –

कच्चित्सहस्रान्मूर्खाणामेकमिच्छसि पण्डितम् ।
एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः ॥
राजानं राजमात्रं वा प्रापयेन्महतीं श्रियम् ।
अमात्यानुपधातीतान् पितृपैतामहान् शुचीन् ।
श्रेष्ठान् श्रेष्ठेषु कच्चित् त्वं नियोजयसि कर्मसु ॥[3]

वार्तावश्यकताविषये –

कच्चित्ते दयिताः सर्वे कृषिगोरक्षजीविनः ।
वार्तायां संश्रितस्तात लोको हि सुखमेधते ॥[4]

---

1. किष्किन्धा.5. 31.
2. अयोध्या० 100. 6.
3. ,, 100. 22-26.
3. ,, 100. 47.

लोकायतमतनिन्दा –

कच्चिन्न लोकायतिकान् ब्राह्मणांस्तात सेवसे ।
अनर्थकुशला ह्येते बालाः पण्डितमानिनः ॥
धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः ।
बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते ॥[1]

एतेन तत्कालेऽपि लोकायतनामकं नास्तिकमतं व्याप्तमिति गम्यते । अत्र धर्मशास्त्रशब्दस्य वेदवेदान्तेषु दृष्टानि धर्माधर्मनिर्णायकवाक्यानीत्यर्थः, न तु मन्वादिस्मृतय इति ज्ञेयम् ।

शस्त्रास्त्रवित्पूजनम् –

इष्वस्त्रवरसम्पन्नमर्थशास्त्रविशारदम् ।
सुधन्वानमुपाध्यायं कच्चित्त्वं तात मन्यसे ॥[2]

अयं सुधन्वोपाध्याय ऐतिहासिकः प्राचीन इति मन्तव्यम् । अनेनाथर्वणमन्त्रतन्त्रज्ञोऽर्थशास्त्रकुशलो राजपुरोहितो भवितुमर्हतीत्यर्थः सूचितः । वेदेषु दृष्टा अनुलोमविवाहादयः साङ्घिकाचाराः सर्वेऽप्यस्मिन् दृश्यन्ते । ग्रन्थविस्तरभयान्नोदाहृताः ।

किन्तु देवताराधनं साङ्गसायुधदेवतोपासनमनादीति ऋग्वेदीयविष्णुरुद्रादिसूक्तान्येव कथयन्ति । तदेव क्रमशो मृद्दारुशिलाविग्रहरूपदेवताराधनमभवदिति पुरा केदारमण्डले निवसद्भिः प्राचीनमहर्षिभिराचरिताः केदारेश्वरबदरीनारायणादिविग्रहप्रतिष्ठाः प्रथयन्ति । तत्फलमेव ज्ञापयति "उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पनम्" इत्यभियुक्तोक्तिः । तस्माद् वाल्मीकिकाले विग्रहाराधनमस्ति वा न वेति संशयो मास्तु । अत्रेमान्ययोध्याकाण्डभाषितानि–

1. ,, 100. 38, 39.
1. अयोध्या० 100. 14.

कच्चिचच्चैत्यशतैर्जुष्टः सुनिविष्टजनाकुलः ।
देवस्थानैः प्रपाभिश्च तटाकैश्चोपशोभितः ॥[1]
कच्चिद् गुरूंश्च वृद्धांश्च तापसान् देवताऽतिथीन् ॥[2]
कच्चिद्देवान् पितॄन् मातॄर्गुरून् पितृसमानपि ॥[3]
द्विजातिदेवातिथिपूजनं च पन्थानमाहुस्त्रिदिवस्य सन्तः ॥[4]

नाटकसङ्घाः

गानविद्या भरतखण्डस्य अनादिसिद्धा । छान्दोग्ये देवजनविद्येति गान्धर्वविद्या प्रशंसिता च ।[5] सा च रामायणकाले व्याप्तेत्यत्र किमाश्चर्यम्? किन्तु, "वधूनाटकसङ्घैश्च संयुक्तां सर्वतः पुरीम्"[6] इत्यादिबालकाण्डपञ्चमसर्गोक्तया तत्काले नाट्यप्रदर्शकस्त्रीसमाजाश्च आसन्निति विशेषोऽवगन्तव्यः । तथापि तत्प्रदर्शनविधानं तत्समाजस्वरूपं वा निर्णेतुं बलवत्प्रमाणानि न लभ्यन्त इत्यलं पल्लवितेन । एतन्महिमस्तुतिपराणि ब्रह्माण्डपाराशर्यादिपुराणानि बहूनि सन्ति । अपि च रामायणनाम धृत्वा समुद्भूतग्रन्थाश्चतुर्विंशत्यधिकाः, रामायणव्याख्यास्त्रिंशदधिकाः, रामायणमुपजीव्य विविधभाषासूत्पन्नानि बहुविधकाव्यानि परः-सहस्रं, रामनामध्यानपरं जगत्सर्वं - तदेतत्सर्वं वाल्मीकिमहिमसर्वस्वम् ।

1. अयोध्या. 100. 43.
2. ,, 100. 61.
3. ,, 100. 14.
4. ,, 109· 31.
5. छान्दोग्य. 7.1.2.
6. बाल. 5. 12.

भाषा

यथायमाद्यकविर्मधुमयभणितीनां मार्गदर्शी तथा मृदुमधुरसरलभाषायाश्चायमेव प्रथमगुरुः । अभ्यस्तसंस्कृताक्षराणां बालानामपि सुखबोध्या रामायणभाषा । ततः पूर्वं कश्यपादिशाब्दिकैर्लौकिकशब्दजाले संस्कृतेऽपि तत्प्रयोगे अयं महाकविः स्वतन्त्र एव । "गृह्य, अपश्यती"[1] इत्यादिशास्त्रविरुद्धशब्दाः पाणिनिना प्रयुक्ता इति केचन परिशोधका वदन्ति । तादृशप्रयोगाणामप्युपदेष्टा वाल्मीकिरित्यस्यैकमुदाहरणं रामोक्तिरियम् – "कथं सारमते बाला पश्यन्ती मामपश्यती ।"[2] "गृह्य" इत्यादिप्रयोगास्तु रामायणभारतयोर्बहवो दृश्यन्ते । तस्मादेव तादृशानामार्षप्रयोगा इति व्यवहारः सञ्जातः इति शिवम् ।

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥

1. जाम्बववतीपरिणये
2. किष्किन्धा. 30. 8.

— 0 —

(२) व्यासमहर्षिः

नमस्तस्मै व्यासनाम्ना भास्वते ब्रह्मतेजसे ।
यदुपज्ञा जगद्व्याप्ता भव्या भारतसंहिता ।।

भारतकर्ता व्यास इति भारतसंहिता वैयासकीति च महती प्रतीतिः सार्वजनीना । वेदविभजननिमित्तकव्यासबिरुदाञ्चिता बहवः सन्ति । तेषु कोऽयं पाराशर्यः ? पराशराः पाराशर्याश्च त्रिचतुराः श्रूयन्ते सारस्वते । "स हौवाच, व्यासः पाराशर्यः" (तै. आ. १. ६)[1] "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः" (पाणि. ४. ३. ११०), स्मृतिकर्ता पराशरः, ज्योतिर्गणितकर्ता पराशरश्च । श्रीमन्नारायणस्य मानसिकपुत्रः अपान्तरतमः पित्राज्ञया वेदान् विभज्य वेदव्यास इत्याख्यातः स एव पराशरस्य सुतोऽभवत् इति शान्तिपर्वणि । कथं तन्निर्णयः ? वसिष्ठस्य पौत्रः शक्तेः पुत्रः पराशर इति वैदिकर्षिसम्प्रदायः । तत्पराशरस्यायमात्मजः पाराशर्यो व्यासः शुकमहर्षेः पितेति पौराणिकसम्प्रदायः । अपि चायमेव ऋग्वेदीयपराशरेण सत्यवत्यामुत्पादितः कृष्णः कृष्णद्वैपायन इति द्वैपायनापरनामेति चार्षसम्प्रदायो विशिनष्टि । वायुपुराणादीन्यस्य व्यासबिरुदं दर्शयन्ति । तथा च एवंगुणविशेषणविशिष्टो व्यास इति सिद्धम् ।[1]

भारतकर्तृत्वभारतकालविचारः

अयं भगवान् व्यास एव भारतमब्रवीदिति भारतपदार्थानुक्रमणी सौतिमुखेनाविष्करोत्येवम् —

1. M. Krishnamachariar, p.27.

मातुर्नियोगाद्धर्मात्मा गाङ्गेयस्य च धीमतः ।
क्षेत्रे विचित्रवीर्यस्य कृष्णद्वैपायनः पुरा ॥
उत्पाद्य धृतराष्ट्रं च पाण्डुं विदुरमेव च ।
जगाम तपसे धीमान् पुनरेवाश्रमं प्रति ॥
तेषु जातेषु वृद्धेषु गतेषु परमां गतिम् ।
अब्रवीद्भारतं लोके मानुषेऽस्मिन् महान् ऋषिः ॥'

एतेन महाभारतसंग्रामोत्तरकाले भारतं व्यासेन प्रोक्तमिति स्पष्टम् । स सङ्ग्रामस्तु द्वापरान्ते समभवदिति भारतपर्वसंग्रहाध्यायः कथयन्ति । तदेव सर्वपुराणानि पौराणिकसम्प्रदायविदश्च स्मरन्ति । अथ भारतयुद्धकालनिर्णये प्रवृत्तानां प्राच्यपाश्चात्यविदुषां मतानि यदि पश्येम तेष्वेकैकमेकैकां कलियुगशताब्दीं निर्दिशत्याक्रीस्तुशकारम्भमित्यत्र नात्युक्तिः ।[2] तेभ्यः पूर्वचरित्रज्योतिषग्रन्थवचनान्यपि नारोचन्त । तथापि कल्हणोक्तिमवलम्ब्य तत्त्वमन्वेष्टुं यतामहे । पूर्वराजचरित्रकारेषु प्रामाणिक इति पाश्चात्यपण्डितैरपि प्रशंसितोऽयं राजतरङ्गिण्यां प्रथमतः, कुरुपाण्डवसङ्ग्रामो द्वापरन्तेऽभूदिति भ्रान्त्या कैश्चित् काश्मीरपालकगोनन्दादिकालसंख्या मृषा कथितेति तदुक्तीर्निराकृत्य, ततः कुरुपाण्डवाः कलियुगसप्तमशताब्दीमध्यभागे (६५३) स्थिता इत्युक्त्वा, तदनन्तरं ज्योतिर्विदां मतेन स्वमतं स्थिरीचकारेत्थम्[3]

अष्टषष्ट्यधिकामब्दशतद्वाविंशतिं नृपाः ।
अपीपलंस्ते काश्मीरान् गोनन्दाद्याः कलौ युगे ॥

1. महाभा. 1. 64.
2. M. Krishnamachariar; p. p. 45-64.
3. राजतर० 1. 48, 49, 51, 55; M. Krishnamachariar, p.p. 55 (f.n.), 56, 57.

भारतं (युद्धं) द्वापरान्तेऽभूद् वार्तयेति विमोहिताः ।
केचिदेतां मृषा तेषां कालसंख्यां प्रचक्रिरे ॥
शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले ।
कलेर्गतेषु वर्षाणामभूवन् कुरुपाण्डवाः ॥
ऋक्षाद् ऋक्षं शतेनाब्दैर्यात्सु चित्रशिखण्डिषु ।
तच्चारे संहिताकारैरेवं दत्तोऽत्र निर्णयः ॥
आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ ।
षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्यस्य ॥[1]

---

1. नाऽयं कल्हणीयः श्लोकः । इयमार्यारत्नकोशाख्ये ज्योतिर्ग्रन्थेऽस्ति, यत्सारमानीय रत्नमाला लिखिता श्रीपतिना । एषा आर्या बृहत्संहितायामुदाहृता (१.३.३.) इति राजतरङ्गिणी-प्रकाशकः ष्टाइन् (M.A. Stein) महोदयः निवेद्य अस्य श्लोक-स्यार्थमप्येवमदर्शयत् - "आसन् मघास्विति," एकैकस्मिन् धिष्ण्ये शतं शतं चरन्ति वर्षाणामिति वचनात्, तत्समये मघास्ववस्थानात् सप्तर्षीणां काश्मीरेष्वतिप्रसिद्धलौकिकसंवत्सरपरिज्ञानार्थमेतदुक्त-मन्यग्रन्थेऽपीहानीतम् । "षड्द्विकेति," तस्य राज्यस्य युधिष्ठिरीय-राज्यस्य यः शककालः पूर्वोक्तः "शकेषु षट्सु सार्धेषु" इत्यादिकः त्रिपञ्चाशदधिकषट्शतरूपः (६५३) सः षड्द्विकपञ्चद्वियुतः(२५२६) एतावता वर्षवृन्देन युतः गोऽगैकगुणतुल्यो (३१७९) भवति। अयं शककालो वर्तमानशककालो भवतीत्यध्याहारः। गणितव्यवहारार्थं लौकिकः शककालः शालिवाहनीयो भवतीत्यर्थः। ३१७९ परिमिते कलेर्गताब्दवृन्दे याते, शालिवाहनोऽभूदित्यर्थः। तदुक्तं ब्रह्मसिद्धान्ते-

कल्पपरार्धं मनवःषट् तस्याब्दाश्चतुर्युगं त्रिघनम् ।
त्रीणि कृतादीनि पुनर्गोऽगैकगुणाः शकनृपात्तेऽब्दाः ॥

अधोदर्शितव्याख्यानेन विषये स्पृष्टेऽपि किञ्चिद् विवृणोमि। कलियुगारम्भशालिवाहनशकारम्भयोर्मध्यकालः ३१७९ सौराब्दपरिमितः। कल्हणोक्तकुरुपाण्डवकालकल्यब्दाः ६५३, आसन्नित्यादिश्लोकोक्तयुधिष्ठिरराज्यस्य शालिवाहनशकारम्भस्य मध्यकालाब्दाः २५२६, तेषमेषां च सङ्कलने ३१७९ शकपूर्वकल्यब्दाः सिध्यन्ति। एतेन काश्मीरदेशप्रसिद्धलौकिकाब्दपरिज्ञानार्थं षड्द्विकेत्युक्त (२५२६) रूपलौकिकशककालो वर्तमानशालिवाहनशको भवतीत्यर्थोऽवगम्यते। शालिवाहनशकपूर्वकलियुगाब्दसंख्याः एकोनाशीत्यधिकशतोत्तरत्रिसहस्र (३१७९) वत्सरमितेत्यार्यभटसिद्धान्तेन[1] ब्रह्मसिद्धान्तेन च निरूपितेति विदितमेव। एवं कल्हणमतं ज्योतिःशास्त्रमतेन तुल्यं भवतीति कृत्वा, द्विर्बद्धं सुबद्धं भवतीति न्यायमनुसृत्य कलियुगसप्तमशताब्दीमध्यभागे कुरुपाण्डवस्थितिं निश्चित्य तदन्तिमभागे महाभारतयुद्धं बभूवेति वक्तुं न कापि विप्रतिपत्तिरिति मन्ये। एतत्कल्हणमतं कतिपयपरिशोधकेभ्यो न रोचतां नाम। नैतस्मात् प्रबलं प्रमाणं लभ्यत इत्यलम्। भारतयुद्धकालः कलियुगसप्तमशताब्द्यन्तिमभाग इति यद्यत्र निश्चितेऽपि तदानीमेव व्यासेन भारतं रचितमिति वक्तुमशक्यम्। वाल्मीकेः कृष्णद्वैपायनः पूर्वो भवतु, भारतरचनं तु रामायणरचनात्परमेवेति वाल्मीकिजीवित-

---

1. समदर्शनदृग्गणितग्रन्थस्थितार्यभटोक्तिरियम् –

षष्टयब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः।
त्र्यधिका विंशतिरब्दास्तदेह मम जन्मनोऽतीताः॥

एतत्कृतिनिर्माणसमये आर्यभटस्त्रयोविंशतिवर्षः। तदा कलिगताब्दाः ३६००, तत्कालस्य शालि. शकाब्दाः ४२१, व्यवकलनेन ३१७९ मिताः शकपूर्वकलियुगाब्दाः सिध्यन्ति। एतेन क्रिस्तोः पूर्वं कलियुगाब्दाः ३१०१ इति सिद्धम्। ३१०२ इति पाठश्चिन्त्यः।

चरिते सप्रमाणं निरूपितम् । तथाऽपि व्यासकर्तृकं भारतमिति पौराणिकसम्प्रदायवादिनामाग्रहश्चेत् स महर्षिः भारतसङ्ग्रामानन्तरमपि परःसहस्रं शरदो जीवित्वा रामायणं पठित्वा भारतं रचितवानिति वक्तव्यम् । तदेतत्सम्भाव्यं चेन्नास्माकमाग्रहः । आदिपर्वणि ग्रन्थकर्तृत्वशङ्काजनकवचनानि बहूनि सन्तीति पाठका एव जानन्ति । विमर्शकैरपि तानि दर्शितानि पुनस्तद्विवरणं चर्वितचर्वणं ग्रन्थविस्तरणं च । तथापि यत्किञ्चित् । आदौ सौतिरेवमुक्तवान् —

ग्रन्थग्रन्थिं तदा चक्रे मुनिर्गूढं कुतूहलात् ।
अष्टौ श्लोकसहस्राणि ह्यष्टौ श्लोकशतानि च ।।[1]

व्याख्याता नीलकण्ठबुधस्तु "चतुराननदर्शनात्पूर्वमेव महाभारतं समग्रतया विरचितमित्यर्थः सम्यगभिहितो भवति । एवञ्च सति समग्रतया प्रणीतस्य ग्रन्थस्य पुनर्लेखनापेक्षायां न कोऽपि ग्रन्थकर्तुः प्रयासो वर्तते । नापि लेखकस्याभावः कदाचिदपि जायते । तस्माद् ग्रन्थग्रन्थिप्रणयनस्य न कोऽप्यवसरः प्रसक्तो भवति" इति ग्रन्थग्रन्थिकथाभागः प्रक्षिप्त इत्युवाच । एतादृशप्रक्षिप्तभागा भारते सर्वत्र सन्ति। न तदर्थमिदमुदाहृतम् । किन्तु व्याख्यातारः परिहृतमपीमं ग्रन्थग्रन्थिं व्यासकृतमिव मन्वाना अद्यापि सन्तीति वक्तुमेव । अथ भारतं पठन् तद्भावमाविष्कर्तुमुद्यतः पौराणिकः सौतिरादाविमं श्लोकं पपाठ शौनकादिमुनिसदसि –

1. M. Krishnamachariar, p. 27.

मन्वादिभारतं केचिदास्तिकादि तथा परे ।
तथा परिचरादन्ये विप्राः सम्यगधीयते ॥[1]

श्लोकोऽयं स्वनिर्मितभारतारम्भस्त्रेधा स्थित इति प्रथमतः श्रोतृभ्यो विज्ञापयता भगवता व्यासेनैव रचितः किन्नु ? नो चेद्, दृश्यमानस्य त्रिविधारम्भस्य का वा गतिः ?

आदिपर्वणि त्रिषष्ट्यध्यायेषु दृश्यमानत्रिविधारम्भेष्वपि कथितकथनं पुनरुक्तयश्च बहुवारं दृश्यन्ते ।[2] परस्परविरुद्धवचनानि च बहूनि श्रूयन्ते । एवमेव भारतश्लोकसंख्याकथने भारतसंहिता-प्रकाशकथने च सौतिवैशम्पायनमार्गयोर्न सादृश्यम् । किमु वक्तव्य-मीदृशमव्यवस्थं पूर्वोत्तरसन्दर्भविरुद्धं ग्रन्थारम्भणं व्यासमहर्षेः कथमारोपणीयमिति सर्वोऽपि पाठकः परिशोधकोऽपि सन्दिहानो भवत्येवेति सत्यम् । तस्माद् व्यासेन प्रोक्ता कौरवपाण्डवकथा शिष्यपरम्परासमानीता, क्रमेण सौतिवैशम्पायनाभ्यां संहितारूपं प्रापिता वैयासकीनाम्ना विख्यातेति बहुपरिशोधकाभिप्रायः सुमुचितो भवतीति भावयामः । तथाप्यत्र कश्चिद्विशेषः । नह्ययं वैशम्पा-यनो व्यासस्य साक्षाच्छिष्यो वा कठाचार्येण पाणिन्याचार्येण च स्मृतो याजुषप्रवर्तको वा भवितुमर्हति("आसहस्रसूर्यताया इति वैशम्पायनः" (तै. आ. प्र. १.) । "कलापिवैशम्पायनान्तेवासिभ्यश्च" (अष्टा. ४. ३. १०४) । याजुषकाण्डानुक्रमणी) कालव्यवधेर्बहुत्वात् । ततः सोऽयं ब्रह्मर्षिर्व्यासशिष्यस्य गोत्रापत्यं वाल्मीकिमहर्षेरर्वाचीनश्च स्यात् । अनेन भारतसंहितानिर्माणकालः शालिवाहनशकात् पूर्वं द्वादशशताब्द्या न पर इति यत्पूर्वमुक्तं भवेत् । वाल्मीकिचरिते तदेव समञ्जसं भवेत् ।

---

1. M. Krishnamachariar, p. 29.
2. " " "

ग्रन्थपरिमितिविचारः

भारतसंहिता निरुपाख्याना चतुर्विंशत्साहस्री । सोपाख्याना शतसाहस्री । अवान्तरपर्वभिर्हरिवंशविष्णुभविष्यपर्वभिः सह पर्वाणि शतम् । प्रधानपर्वाण्यष्टादशेति चानुक्रमणी वक्ति । तथापि लिखिते मुद्रिते वा पुस्तके श्लोकसंख्या त्वनियता दृश्यते । कस्मिंश्चित्पुस्तके श्लोकसंख्या ८४७७०, एकस्मिन् ९९०५७, परस्मिन् १००७०० मया दृष्टा । एतेनैकत्र ग्रन्थपातः परत्र ग्रन्थप्रक्षेपश्च सिद्ध इति स्पष्टम् । पुनश्च पर्वसंग्रहाध्याये हरिवंशादिपर्वश्लोकाः १२००, १८०० इति पाठभेदो दृश्यते ।

दशश्लोकसहस्राणि विंशच्छलोकशतानि च ।
खिलेषु हरिवंशे च संख्यातानि महर्षिणा ॥
अष्टादशसहस्राणि श्लोकानां च शतं तथा ।
खिलेषु हरिवंशे च संख्यातानि महर्षिणा ॥

एतद्विषये व्याख्याता नीलकण्ठ एवमुक्तवान् - "हरिवंशे भविष्यान्तग्रन्थस्य द्वादशसहस्रान्वितत्वं, न तु कृत्स्नहरिवंशस्य, अधिक ग्रन्थस्य दर्शनात् । तावन्मात्रविवक्षायाञ्च लक्षपूर्तेरयोगात् ।" एतेन व्याख्याताऽपि लक्षग्रन्थं न दृष्टवानिति विदितम् । वस्तुतस्तु महाभारतात्प्रभिन्नं हरिवंशादिपर्वत्रयम् । तस्य भारतप्रधानकथया सम्बन्ध एव नास्ति । लक्षपूर्तये तस्मिन् गृहीतेऽपि तत्पूर्तिर्न सिद्धा। नन्नयभट्टारकेणानुवादार्थं गृहीते पुस्तके स्वर्गारोहणपर्वान्तग्रन्थसंख्या सप्तशत्युत्तरा शतसहस्रीति तेनैव कथिता दृश्यते । तस्मादस्मिन् भारते देशतः कालतश्च ग्रन्थप्रक्षेपग्रन्थपातौ सिद्धाविति, नेदमेकस्मिन् काले एकमुखादुदितमिति हरिवंशादिपर्वत्रयोत्पत्तेः पूर्वं तदनन्तरञ्च पदार्थानुक्रमणिकायां ग्रन्थसंख्याश्लोका यथानुकूलं प्रविष्टा इति ज्ञायतामसंशयम् । एवं पूर्वस्थितिरपि सन्दिग्धेति केषाञ्चिदभिप्रायः ।

व्यासमहर्षिप्रोक्तभारतेतिहासप्रधानविषया इमे सौतिना कथिता ग्रन्थारम्भे —

विस्तरं कुरुवंशस्य गान्धार्या धर्मशीलताम् ।
क्षत्तुः प्रज्ञां धृतिं कुन्त्याः सम्यग्द्वैपायनोऽब्रवीत् ॥

वसुदेवस्य माहात्म्यं पाण्डवानां च सत्यताम् ।
दुर्वृत्तं धार्तराष्ट्राणामुक्तवान् भगवान् ऋषिः ॥

एतेन भारतकथा महासंग्रामान्तेति केचिदमन्यन्त । स्त्रीपर्वान्तफलश्रुतिरपि तत्र कारणम् । तथा —

इमं महायुद्धमखं महात्मनां शृणोति नूनं पठते च यः पुमान् ।
स सम्यगिष्टस्य मखस्य यत्फलं तदाप्नुयाद्वंशविवृद्धिमात्मनः ॥
मखो हि विष्णुर्भगवान् सनातनः वहन्ति तं चाग्न्यनिलेन्दुभानवः ।
तद्दिव्यचारित्रमिदं हि यः पठेत् सम्प्राप्तसम्पत्स सुखी भवेदिह ॥

यज्ञे समाप्ते यथा न कर्मशेषस्तथा युद्धेऽवसिते न कार्यशेषः । ततः स्त्रीपर्वान्तं व्यासप्रोक्तं भारताख्यानमित्यङ्गीकृतं चेदेकादशपर्वग्रन्थः उपाख्यानैर्विना चतुर्विंशत्सहस्री भारतसंहितेति प्रसिद्धेरनुक्रमणिकोक्तेश्चानुकूलः स्यात् । जयनामाप्यन्वर्थं भवेत् ।

अपि च शान्त्यादिपर्वाणि प्रधानकथासम्बन्धीनीव कल्पितानीति प्रवादोऽपि न विमतः स्यात् । एतादृशप्रवादो भगवद्गीताविषयेऽप्यस्ति । "ब्रह्मसूत्रपदैश्चैव" इत्यादिना बादरायणकृतब्रह्मसूत्राणि स्मरन्ती भगवद्गीता तेभ्यः परमुत्पन्नेति पश्चाद् भारतसंहितायां प्रविष्टेति च तत्प्रवादस्याशयः नत्वयमनुचितः । एतेषां त्रयाणामेक एव कर्तेति निर्णेतुमशक्यत्वात् । ब्रह्मसूत्रकर्ता बादरायण एव पाराशर्यव्यासः । पुराणेषु कुत्रचित्तस्य बादरायणसंज्ञा दृष्टाऽपि वैदिकवाङ्मये सेयं

संज्ञा पाराशर्यस्य न कुत्रापि दृष्टा। अपि च ब्रह्मसूत्रेषु सूत्रकर्ता स्वमतप्रतिज्ञाने बादरायणनामैव व्यवहृतम्,[1] न कुत्रापि व्यासादिकं नाम। तेन सूत्रकर्ता बादरायणः पाराशर्यव्यासादन्य इति स्मर्तव्यमेव। विषयोऽयं सविमर्शं निरूपितो मदीयवाङ्मयचरिते[2]। तस्माद् भगवद्गीता प्रक्षिप्ता भारते पश्चादिति वक्तव्यमेव। आस्तां तावदयं विचारः, अत्रायं प्रस्तावः।

भगवद्गीता भगवता श्रीकृष्णेन गीता, उत कृष्णेन, अथवा नवेति शङ्कैव तदर्थजिज्ञासोर्मनसि नोदेति।

मुमुक्षूणां जीवेश्वरतत्त्वं कर्मतत्त्वं च करतलामलकं कुर्वता सुखबोध्येन तद्ग्रन्थेन सदृशः ग्रन्थ एव नास्तीति सत्यम्। तादृशीयं गीता कस्य मुखात् जज्ञे, कदाऽजायतेति विचिकित्सैव मास्तु। तादृशमेव सनत्सुजातीयमपि। नीतिज्ञानवैराग्यबोधकान्युपाख्यानानि सर्वाण्यपि प्रत्येकं प्रशंसापात्राणि। तैश्च शान्त्यादिपर्वभिश्च सहितं सद्भारतं गुणमहिम्ना रूपमहत्त्वेन च महाभारतं भूत्वा सकलजनहृदयरञ्जकमभवदित्यत्र नास्ति संशयलेशोऽपि।

महाभारतप्रशंसा

वस्तुतः सेयं कथा भरतवंशराजसम्बन्धिन्यपि भगवदवतारस्य श्रीकृष्णस्य महिम्नस्तत्र तत्र वर्णितत्वेन नारायणकथेति ख्यातिं गता सौतिकाले एवेति "प्रवक्ष्यामि नारायणकथामिमा" मिति तदुक्तिरेव ज्ञापयति। "कृतं मयेदं भगवन् काव्यं परमपूजित" मिति व्यासेनोक्तत्वात्, ब्रह्मणाऽनुमतत्वाच्चेदं भारतं काव्यकीर्तिं लेभे। तदेतल्लौकिकसारस्वते द्वितीयमपि, रामायणमद्वितीयं महाकाव्यम्। तदेकनायकम्। इदं बहुनायकम्। उभयत्राप्ययोनिजा नायिका।

1. ब्र. सू. 1.3.33: 3.4.1, 19, 41; 4.4.7.
2. सं. वा. च. द्वि. भा. pp. 93-94.

तत्रैवात्रापि स्त्रीमूलं वैरम् । तत्र दुर्जातिः शत्रुः । अत्र दुर्नीतिर्ज्ञातिः शत्रुः । तत्र कामः प्रधानम् । अत्र अर्थः । तत्र रामः संग्रामं चकार । अत्र कृष्णः कारयामास। उभयत्राऽपि धर्मसंस्थापनम् । इत्यवान्तर-विषये परिशीलिते, काव्यधर्मेषु कथासंविधाने च तेन सदृशमस-दृशञ्चास्मिन् वैलक्षण्यमक्षिगोचरं स्यात् ।

अथापि निखिलवेदान्तविज्ञानसारप्रदर्शनेन विविधवर्णाश्रमा-चारबोधनेनेदं पञ्चमवेदविख्यातिं प्रापेत्ययं विशेषोऽवगन्तव्यः । सकलविज्ञानसर्वस्वं भारतमित्येवं कविरेव प्रकटितवान् ।

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।
न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः ।।

अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् ।
कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ।।

क्रियागुणानां सर्वेषामिदमाख्यानमाश्रयः ।
अनाश्रित्यैतदाख्यानं कथा भुवि न विद्यते ।।

अतः परं किमन्यद्वक्तव्यम् ? भारतभाग्यं भारतमिति भावयामः ।

कथासत्यत्वम्

ननु प्राच्याः पाश्चात्या वा कथासत्यतां शशङ्किरे । चरित्र-कारा महाभारतयुद्धं सत्यमिति मन्यन्ते । कतिपयपात्रजन्मादिवृत्तान्त-वर्णनानि तत्तन्महत्त्वप्रतिपादकानि, पाठकप्ररोचनार्थानि भवन्तु नाम । न तावता कथासत्यत्वहानिः । अस्मिन् वर्णितेषु कुरुपाञ्चा-लादिविविधभूभागेषु सकलनदीपर्वतारण्येषु तत्तन्मानवजातिषु चाद्यापि वीक्षमाणेषु कुतः शङ्का जायेत ? ततः कुरुवंशे हस्तिनापुरे समुत्पन्नमिदमाख्यानमिति तु विश्वसनीयमेव ।

कथापात्ररसौचित्यानि

आख्यानं सत्यम् । रचनञ्च निरुपमानमपूर्वम् । भारतं नाम सुशीलदुःशीलयोः, धर्माधर्मयोः, सत्यासत्ययोः, दैवपौरुषयोः संघर्षः । विविधा मानवस्वभावाः । तत्र विभिन्नस्वभावविशिष्टानि पात्राणि बहूनि । युद्धस्य दुर्योधनराज्यकाङ्क्षा प्रधानकारणमपि, तदङ्गानि कारणानि चानेकानि । धर्मचिन्तकोऽप्याम्बिकेयः पुत्रपक्षपाती । भीष्मविदुरौ धर्मनिष्ठावपि पराधीनौ । महाशूरो वदान्यः कर्णो गुणज्ञोऽप्यर्जुनतेजोऽसहिष्णुः, दुर्योधनवशवर्ती च, गान्धारी धर्मशीलाप्यस्वतन्त्रा । दुःशासनादयः दुःशीलमूर्तयः । अथ धर्मराजः सकलसद्गुणसम्पन्नोऽपि द्यूतव्यसनी ।[1] भीमार्जुनौ सर्वसमर्थावपि युधिष्ठिराज्ञाबद्धौ । अवमानप्रतीकारचिन्तना द्रौपदी कार्यज्ञाऽपि कलहकाङ्क्षिणी । अधर्मप्रतीकारचिन्तनापि कुन्ती सुधीरा राजनीतिज्ञा । धर्मराजपक्षे श्रीकृष्णो दैवम् । दुर्योधनपक्षे कर्णः पौरुषम् । तेजस्तिमिरवदेवंविधं पक्षद्वयमधिकृत्य सहृदयरञ्जनं चतुर्वर्गसाधनं काव्यं रचयितुं न केवला प्रतिभैवालम् । किन्तु निखिलवेदशास्त्रकूलङ्कषविज्ञानमप्यावश्यकम् । श्रवणेच्छा चेद्भारतमेव शृणुयादिति लोकोक्तेरधिकरणं पुराणमिदमेकमेवेत्यनेनैवास्य समुचितत्वं कथितम् । सौतिनापि एवमभिहितम् –

धर्मार्थकाममोक्षार्थैः समासव्यासकीर्तनैः ।
तथा भारतसूर्येण नृणां विनिहतं तमः ॥

महाभारतेऽस्मिन्नाबालगोपालं विदिते सत्यत्र कतिपयैर्वाक्यैस्तद्वर्णनं करदीपिकया सूर्यप्रदर्शनवन्निरर्थकं स्यात् । तदद्य सङ्ग्रहेण प्रवक्ष्यामि यत्किञ्चित् । मदीया इमे श्लोकाः–

यथावीरप्रधानेन वर्णितः सर्वतोमुखः ।
तथैव वर्णिताऽनन्या राजनीतिः सतां मता ॥

---

1. M. Krishnamachariar, p. 39.

तन्नीतिचातुरीं सम्यग्दर्शयामास माधवः ।
योऽन्यत्र वेदवेदान्तवेद्यं तत्त्वमितीडितः ॥

धर्मराजादयः सन्तु नयशास्त्रविचक्षणाः ।
कुन्तीकृष्णौ च जानीतो नीतिविद्यां विशेषतः ॥

आदावङ्कुरितं वैरं सभायां पल्लवान्वितम् ।
पुष्पितं सम्यगुद्योगे फलितं युद्धपञ्चके ॥

भाषा

ग्रन्थेऽस्मिन् भाषा प्रायशो मृदुला लौकिक्यपि वैदिक्यनुकारिणी । तत्र तत्र काश्चिदृचः तत्पादाश्च यथातथं प्रयुक्ताः । दुष्यन्ताय पुत्रं दर्शयन्त्याः शकुन्तलाया मन्त्ररूपमिदं भाषणम् –

अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामाऽसि स जीव शरदः शतम् ॥

सन्दर्भेऽस्मिन् कथितानि भार्यालक्षणानि भार्याप्रयोजनानि उत्तमपुरुषलक्षणानि च सर्वदा स्मर्तव्यानीव पाठकानां विलसन्ति । यथा –

सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः ।
पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः ॥

सुसंरब्धोऽपि रामाणां न कुर्यादप्रियं वरः ।
रतिं प्रीतिं च धर्मं च तास्वायत्तमवेक्ष्य हि ॥

यद्यपि गद्यं नापूर्वं, यतः यजुरारण्यकोपनिषत्सु हृद्यं तद् दृश्यते, तथापि आदिपर्वान्तर्गतं तद्दीर्घं गद्यमाद्यं लौकिकभाषायाम् । तद्रीतिश्च बालानामपि सुखबोध्या ।

आचाराः

बहुविधधर्मराशौ भारते साङ्घिकधर्मा वर्णिता इति पुनरुक्तम् । हरिवंशभविष्यत्पुराणादीनि यान् व्यवृण्वन् तेषां मूलसूत्राणि भारतोक्तान्येव । मार्कण्डेयोक्तिररण्यपर्वणि यथा –

न कन्यां याचते कश्चिन्नापि कन्या प्रदीयते ।
स्वयङ् ग्राहा भविष्यन्ति युगान्ते पर्युपस्थिते ॥
राजानश्चाप्यसन्तुष्टाः परार्थान् मूढचेतसः ।
सर्वोपायैर्हरिष्यन्ति युगान्ते पर्युपस्थिते ॥
म्लेच्छीभूतं जगत्सर्वं भविष्यति न संशयः ।
हस्तो हस्तं परिमुषेद्युगान्ते समुपस्थिते ॥

एतदुक्तकलियुगान्तभाविगतिरद्यैव प्रत्यासन्नैव दृश्यते । अहो ऋषीणां दूरदर्शिता ! आत्रिसहस्रवत्सरादासमन्तादार्यावर्तदक्षिणापथयोरखिलधर्माणामालम्बनं श्रुतिस्मृतिवत्प्रमाणं महाभारतं स्तुतेरतीतमिति शिवम् ।

—: ० :—

(३) अथ भागवतकर्तृत्वम्

पुराणेष्वेकैकस्यैकैकं गुणवैशिष्टचं लोके स्तूयमानमपि रामायणमहाभारतेतिहासवन्नित्यपठनश्रवणार्हगौरवं तु भागवतेनैकेनैवाधिगतमिति विश्वासो विद्वल्लोके रूढः। तदेव द्रढयतीयमार्योक्तिरपि –

प्रातर्द्यूतप्रसङ्गेन मध्याह्ने स्त्रीप्रशंसया।
रात्रौ चोरप्रसङ्गेन कालो गच्छति धीमताम् ॥

महापुराणान्यष्टादशेति समुदिते पौराणिकमते यानि पुराणान्यादौ नामग्रहणपूर्वकं संख्यातानि तेषु कानिचिदिदानीं संशयास्पदान्यभवन्, क्रमशस्तत्सम्प्रदायस्य विच्छिन्नत्वादुपपुराणानां प्रचारस्य प्रबलत्वात् पुराणानुक्रमणीपाठानां विभिन्नत्वाच्च। अत्रेदमुदाहरणम्-

अष्टादशसंख्यापूर्तये विष्णुपुराणानुक्रमणी नारदीय - ब्रह्मवैवर्त-वामनानि जग्राह। बृहद्धर्मपुराराणानुक्रमणिका तु तानि विहाय, कैवर्तवैवर्तयोर्भेदं परिकल्प्य, वायव्य-ब्रह्मवैवर्त-देवी-(महा) भागवतानि गणयामास। स्कान्देन वायवीयेन च देवीभागवतस्य नाम न गृहीतम्।[1] एवमेकस्य द्वयोर्वा संख्यानं व्यत्यस्तमपि यथा भागवतस्य गणनं सर्वत्र दृश्यते न तथा देवीभागवतस्येति वाच्यमेव। अनेन प्रकृताद्भागवतादनन्तरं महाभागवतमुत्पन्नमित्यङ्गीकार्येऽप्यस्यैव तस्याप्यार्षत्वं, महापुराणत्वं च परिगणितमित्यत्र न सन्देहः। तत्परिगणनं च नार्वाचीनम्। किन्तु जगद्गुरोः षण्मतस्थापनात्पौर्वकालिकमेव। एवं तत्त्वे विदितेऽप्यनयोरार्षत्वेन महान् पत्रिकावादः सम्भूतः किञ्चिदधिकद्विशतवत्सरेभ्यः पूर्वमुत्तरदेशे। तदा,

---

1. M. Krishnamachariar, pp. 72-75.

देवीभागवताभिमानिना काशीवासिना गडाकाशीनाथभट्टेन भागवतार्षत्ववादो निहतो दुर्जनमुखचपेटिकया प्रथमतः । अनन्तरं भागवताभिमानिना भट्टोजीदीक्षितानां शिष्येण रामाश्रमपण्डितेन तद्वादः पुनर्दुर्जनमुखचपेटिकयैव प्रतिहतः । पश्चादुज्जृम्भितः पण्डितकलहः परं मर्यादामतिक्रम्य पत्रिकासु । तत्र भागवतार्षत्वनिराकरणे कश्चिदयं हेत्वाभासः – भागवतं न व्यासप्रोक्तं, वोपदेवस्तत्प्रणीय तन्नामाङ्कितमकरोत् इति । देशे व्याप्तस्यास्य निरसनमद्यावश्यकम् ।

शा· १३४६ - १३८७ मध्ये यदुवंशजो रामचन्द्रापरनामा रामराजो देवगिरिराज्यमपालयत् । तन्महामन्त्री कटकपुराभिजनः, कामराजस्य तनयः पण्डिताग्रणीर्हेमाद्रिः । तस्य विद्वन्मित्रं वोपदेवः भिषग्वरस्य केशवस्य पुत्रः, धनेशसुधियः शिष्यः सकलशास्त्रज्ञः कृतिकर्ता । अयं भागवतान्तर्गतानि हृद्यानि पद्यानि संगृह्य, मुक्ताफलनाम्ना ग्रथितं तं ग्रन्थं हेमाद्रिनामाङ्कितं विधाय, कैवल्यदीपिकया टीकया प्रकाशितवान् । विषयोऽयं निवेद्यते तदवतारिकाश्लोकैः कृतिलेखकवाक्येन चैवम् –

विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत् ।।

चतुरेण चतुर्वर्गचिन्तामणिवणिज्यया ।
हेमाद्रिणार्जितं मुक्ताफलं पश्यत कौतुकात् ।।

तेन मुक्ताफलं तेने यल्लोकमनुगृह्णता ।
तत्र टीकां यथाबुद्धि कुर्वे कैवल्यदीपिकाम् ।।[1]

1. M. Krishnamachariar, p. 75.

इह स्वकर्तृकेऽपि यदुराजमन्त्रिणाप्यर्थितः आचार्यः (वोपदेवः) तत्कर्तृत्वं ख्यापितवान् । इदं वाक्यं ग्रन्थलेखकस्य वोपदेवशिष्यस्येति मन्तव्यम् । प्रथमश्लोके मुक्ताफलमित्यस्य भागवतमुक्ताफलप्रकरणमित्यर्थोऽवगन्तव्यः । एवं गुरुशिष्याभ्यां याथार्थ्यं कथितमपि तन्निह्नुत्य, स्कान्दादिबहुपुराणाचरितां भागवतस्तुतिमपरिगणय्य, शङ्करभगवत्पादैरस्य व्याख्या निर्मितेति विद्वदुक्तिमनादृत्य, प्राचीनं व्यासोपज्ञं श्रीमद्भागवतमर्वाचीनेन वोपदेवेन रचितमिति कैश्चिन्मताभिनिवेशपरैः कथ्यतां नाम । अत्यन्तमनुचितं तद्वाक्यं न विमर्शनक्षममिति तूष्णींभाव एव वरमस्माकमित्यलम् ।

षड्दर्शनानां दिव्यं दर्शनमौपनिषदपुरुषस्य श्रीकृष्णपरमात्मनो लीलासदनं, त्रिमतानामप्यवलम्बनं, भागवतामृतभागवतसन्दर्भादिबहुकृतिशरणमिमे तन्महापुराणमस्तुवन् । मतत्रयव्याख्यात्रयी सारार्थदर्शिन्यादिव्याख्याश्च सहस्रधा । ब्रह्मसूत्राणामनन्तरमिदमुत्पन्नमिति जन्माद्यस्य यतोऽन्वयादित्यादिश्लोक एव प्रकटयति । तत्सारभूतस्य परमपुरुषार्थसाधनीभूतस्यास्य महिमा स्तुतेरतीतः । अस्यार्थमुपदेशः परब्रह्मानन्दरसपिपासून्नुन्मुखीकरोत्येवम् ।

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥

सार्वपौराणिककथासम्प्रदायमहागुरुम् ।
कृष्णद्वैपायनं वन्दे पाराशर्यं तपोनिधिम् ॥

1. भागवतस्य द्वैतव्याख्याकर्तुर्विजयध्वजाचार्यस्योक्तिरियम् ।

— :o: —

(४) पाणिन्याचार्यः

विगलितपूर्वनिबन्धं विवशं विहरन्तमार्यशब्दगजम् ।
अष्टाध्यायीबद्धं यश्चक्रे तं मुनिं वन्दे ॥

आचन्द्रार्कं यशःकायेन जीवतां महात्मनां पाणिनिरेकतमः । अद्य लाहोरुनाम्ना व्यवहृतः पेषावरुसमीपस्थः शालातुरग्रामोऽस्य जन्मभूमिः । तक्षशिला अस्य जन्मस्थानमिति केचन । दाक्षीशलाङ्कावस्य मातापितरौ । जन्मतः सिद्धं नाम आहिक इति, तथापि गोत्रनाम्नायं पाणिनिरिति प्रसिद्धिमगमत् । नन्दराजधान्यां पाटलिपुत्रे निवसतः शशाङ्कस्वामिनः पुत्रस्य वर्षोपाध्यायस्य प्रियशिष्योऽयमिति हरचरितचिन्तामणिर्वदति ।

अस्मान्मुनेः पूर्वं आपिशलिशाकल्यभारद्वाजादयो बहवः शब्दानशासुरिति "वा सुप्यापिशले" रित्यादिपाणिनिसूत्रेभ्यो ज्ञायते । तथापि पाणिन्युपज्ञं व्याकरणं इत्याद्यभियुक्तोक्तिभिः शब्दशास्त्रनिर्माणयशस्तु अस्यैव सिद्धम् । अष्टाध्यायीप्रभावात् पूर्वव्याकरणानि पठनपाठनादिव्यवहारे निरस्तानि, विलुप्तानि च ।

अष्टाध्यायीसूत्रसंख्या ३९७१ । तल्लोपपूरकाणि वररुचिकृतवार्तिकानि ७६६ । एषां विवरणं पतञ्जलिमहाभाष्यम् । सर्वमेतत्पाणिनीयमिति देशदेशान्तरेषु विख्यातम् । त एते मुनित्रयमिति महतीं प्रतीतिं गताः । अस्य कालो मदीयसंस्कृतवाङ्मयचरित्रप्रथमसम्पुटे सहेतुकं निर्णीतः ।

तन्निर्णये बह्वोऽभिप्रायाः सन्ति ।[1] तथापि कात्यायनात्पूर्वः' आपस्तम्बात् परश्चायं विद्वद्वरिष्ठः क्रिस्तोः पूर्वं सप्तमशताब्द्यन्तेऽजीवदित्यभिप्राय एव समुचित इवाभाति । तस्मादयं शा. श. पूर्वमष्टमशताब्द्यामासीदिति विश्वसनीयं भवति ।

कवित्वम्

पाणिन्याचार्यस्य दाक्षीपुत्र इति व्यवहारोऽप्यस्ति इति "सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः"[2] इति पतञ्जलिवचनेन विदितम् । सोऽयं कविरिति काव्यकर्तेति च कथितमेवं बहुभिः । राजशेखरनाम्ना सूक्तिमुक्तावल्यामुद्धृतोऽयं श्लोकः प्राचीनकविचाटुरिवास्ति–

स्वस्ति पाणिनये तस्मै यस्य रुद्रप्रसादतः ।
आदौ व्याकरणं काव्यमनुजाम्बवतीजयम् ॥[3]

सुबन्धौ भक्तिर्नः क इह रघुकारे न रमते
धृतिर्दाक्षीपुत्रे हरति हरिचन्द्रोऽपि हृदयम् ।
विशुद्धोक्तिः शूरः प्रकृतिमधुरा भारविगिरः
तथाप्यन्तर्मोदं कमपि भवभूतिर्वितनुते ॥[4]

स्पृहणीयत्वचरितं पाणिनेरुपजातिभिः ।
चमत्कारैकसाराभिरुद्यानस्येव जातिभिः ॥[5]

---

1. पाणिनिजीवनकालः । सत्यव्रतसामाश्रमिनिर्मितयास्कनिरुक्तोपोद्घाते क्री. पू. २४००; गोल्डुस्टक्कर, माक्समुल्लर् क्री. पू. ३५०; एवं – "Panini, his Place in Sanskrit Literature" क्री. पू. ७००; भाण्डारकरपण्डितः क्री. पू. ५००. (M. Krishnamachariar, p. 83)
2. महाभाष्यम्. I. i.20. (p.270.N.S.P. Ed. 1951)
3. Sukti-muktavali (p. v.)
4. सदुक्तिकर्णामृतम्.
5. क्षेमेन्द्रस्य सुवृत्ततिलकम् – III. 30 (Kavyamala. II. p. 53), 1932.

एतादृशैः प्रमाणवचनैः केचन पाणिनिर्जाम्बवतीविजयं प्रणीतवानिति विश्वसन्ति । यथा हि, पाणिनेः पातालविजये 'सन्ध्याबधूं गृह्य करेण,' 'अपश्यती वत्समिवेन्दुबिम्बम्' इति रुद्रटालङ्कारव्याख्यात्रा नमिसाधुना दर्शितावपशब्दौ अमरकोशटीकाकारेण रायमुकुटेन यथा जाम्बवतीजये "पयः पृषन्तिभिः स्पृष्टा वान्ति वाताः शनैः शनै" रिति दर्शितमपशब्दञ्च दृष्ट्वा केचन द्वावेतावपि ग्रन्थौ न दाक्षीपुत्रपाणिनिनिर्मिताविति वदन्ति । अन्ये तु केचन "यदि प्रसिद्धपाणिनिना काव्यं निर्मितं, यदि च तत्र दोषाः सन्ति, पतञ्जलिप्रमुखाः कथं न स्मरेयुः? तेन नायं दाक्षीपुत्रः काव्यकर्त्तेति भावयन्ति । एवमतीव सर्दिग्धमस्य कवित्वम् । न केनापि कविमात्रेण पृषन्तिभिरिति इकारान्तशब्दः प्रयुज्यते । तेन रायमुकुटदृष्टोऽपपाठः पाठकलेखकादिप्रमादसिद्ध इति स्पष्टम् । "गृह्य, अपश्यती" त्याद्यलौकिकव्याकरणप्रयोगाः किं रामायणमहाभारतयोः न सन्ति'? तेनेमौ आर्षप्रयोगाविति समर्थनीयावप्यनेन पाणिनिना पातालविजयकाव्यं कृतमित्यत्र किं प्रमाणम्! जाम्बवतीविजयस्येदं नामान्तरमिति वक्तुं च कथं शक्यते! तेन नमिसाधुस्मृतकाव्यकर्ता पाणिनिरस्मात्पाणिनेरन्य इति मन्तव्यमेव । एतेन व्याकरणकर्ता पाणिनिर्न जाम्बवतीविजयं कृतवानिति यदुक्तं प्राचीनकविना तद्विश्वसनीयमिव न दृश्यत इति वक्तव्येपि "वाररुचं काव्य" मिति वररुचिकाव्यं स्मरता पतञ्जलिना पाणिनिकाव्यं कथं न स्मृतमित्याक्षेपस्त्वधुनाऽपि सिद्ध एव । एवमस्तिनास्तिविचिकित्सागोचरेऽप्यस्य काव्ये शब्दशास्त्रप्रणेतरि पूज्यभावेन पूर्वविद्वद्भिः कण्ठे निक्षिप्तेषु श्लोकेषु द्वित्रान् वयमपि पठामः –

---

1. "कथं सा रमते बाला पश्यन्ती" किष्कि. ३० सर्ग इत्यादि ।

उत्प्रेक्षार्थान्तरन्यासालङ्कृतमिदं सूर्यास्तमयवर्णनमतीव हृदयङ्गमम्–

विलोक्य सङ्गमे रागं पश्चिमाया विवस्वतः ।
कृतं कृष्णं मुखं प्राच्या न हि नार्यो विनेर्ष्यया ॥[1]

श्लोषोपमालङ्कृतमिदं शरन्नदीवर्णनम् –

शरदि रविरश्मितप्ता बिभ्राणाः शोषमतिशयग्लपिताः ।
ज्वरिता इव लक्ष्यन्ते लङ्घनयोग्या महासरितः ॥[2]

रूपकालङ्कृतमिदं चन्द्रोदयवर्णनम् —

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि मोहाद्गलितं न
लक्षितम् ॥[3]

क्षेमेन्द्रनुतस्योपजातिप्रियत्वस्येदमुदाहारणम् —

शुद्धस्वभावान्यपि सङ्गतानि निनाय भेदं कुमुदानि चन्द्रः ।
अवाप्य वृद्धिं मलिनान्तरात्मा जडो भवेत्कस्य गुणाय वक्रः ॥

सुभाषितावलिसदुक्तिकर्णामृतादिग्रन्थेष्वेवं बहवः पणिनीयश्लोका लभ्यन्ते ।

गतेऽर्धरात्रे परिमन्दमन्दं गर्जन्ति यत्प्रावृषि कालमेघाः ।
अपश्यती वत्समिवेन्दुबिम्बं तच्छर्वरी गौरिव हुंकरोति ॥[4]

1. सुभाषितावली, 1887. ('पाणिनेः')
2. But attributed Jayagupta, in the सुभाषितावली, 1814 v.
3. M. Krishnamachariar. p. 85.
4. ,, ,,

इत्यादिश्लोकाः त्रिचतुराः पाणिनीया इति सरस्वतीकण्ठाभरणव्याख्यात्रा[1] कृष्णलीलाशुकेनोदाहृताः । एतेनायं नमिसाधुमार्गमनुससारेति स्पष्टम् । नमिसाधुस्तु शा. श. दशमशताब्द्यन्तरवर्ती तत्पूर्वेषु वामनादिष्वालङ्कारिकेषु न कोऽपि पाणिन्याचार्यकृतपातालविजयस्मर्ता । किमु वक्तव्यम् ! नमिसाधुवचनं विचारणीयम् ।

1. भोजकृतः व्याकरणग्रन्थः, तन्नामक-साहित्यग्रन्थाद्भिन्नः.

— 0 —

(५) कात्यायनवररुचिः

वैदिकलौकिकभाषाशासन-विज्ञानदीप्तिकीर्तिरुचिम् ।
सरसकवित्वाभिरुचिं कात्यायनवररुचिं वन्दे ॥

मुनित्रये द्वितीयोऽयं विद्वत्कवीन्द्रः । इममधिकृत्य विचित्राः कथाः समुत्पन्नाः । तासु काश्चन महिमप्रतिपादिन्यश्च सन्ति । तत्तत्सारमत्र दर्शयिष्यामि यथालाभं यथाश्रुतम् ।

वररुचिर्व्याडिपाणिनिभ्यां सह पाटलिपुत्रे वर्षोपाध्यायाद्विद्यां स्वीकृतवान् । अस्मै गुरुः स्वकन्यामुपकोशां दत्तवान्, इत्येका कथा शृङ्गारप्रकाशे, कथासरित्सागरे च दृश्यते ।[1]

कलापिनाम्नो ब्राह्मणस्य तनया कात्यायनी वह्निदेव-सम्पर्काद्गर्भं दधार । कुलाद्बहिष्कृता सा कन्या गोदावरीतीरे सुतं प्रासूत । स शिशुः कात्यायनो वररुचिरित्यवन्तिसुन्दरीकथा-सारेऽस्ति ।[2]

वररुचिरष्टादशजातिकन्याः परिणीतवान् । तस्मात्तं ब्राह्मणाश्चण्डालसमं ददृशुरिति मलयालदेशीयकथा । शृङ्गारप्रकाशे चैवास्ति "धूर्तैर्यत् श्वपचीकृतो वररुचिः सर्वज्ञकल्पोऽपि सन्" । एतादृशाः कल्पितकथा न विश्वसनीयाः खलु ।

वररुचिनामानो बहवः सन्ति । ततः कोऽयं वररुचिरिति शङ्का जायेत । तन्निवृत्त्यर्थमस्मद्वाङ्मयचरित्रादुद्धृत्य संग्रहेण प्रवक्ष्यामः । प्राग्देशप्राकृतभाषानुशासकः प्राकृतप्रकाशकर्ता वररुचिरस्मादन्यः, पूर्वश्च । तत्सूत्राणमयं वररुचिः प्राकृतमञ्जरीनाम्नीं व्याख्या-

---

1. M. Krishnamachariar, p. 86.
2. अवन्तिसुन्दरीकथा.

मरचयत् । त्रिकाण्डोत्पलिन्यादीनि नाममात्रतन्त्राणि, व्याडिवररुच्यादिप्रणीतानि तु लिङ्गमात्रतन्त्राणि इत्यमरकोशव्याख्यायां सर्वानन्दः; वररुचिभागुरिवामनादिकृतान् त्रिकाण्ड्युत्पलिनीप्रभृतीनिति गुरुबालप्रबोधिकायां लिङ्गाभट्टश्च वररुचिः कोशकर्तेत्यसूचयत्[1]। एतत्सूचनमाश्रित्य, वररुचिस्त्रिकाण्डीमरचयदिति केचन, अयं वररुचिः कात्यायन इति त्रिलिङ्गशेषकर्ता पुरुषोत्तमश्चाकथयत्। हर्षवर्धनवामनसर्वानन्दादयः केचन व्याख्यातारो वररुचिकृतलिङ्गविशेषविधिनामकलिङ्गानुशासनमस्मरन्, न तु त्रिकाण्डीमिति तत्तद्गृहीतशब्दैरेव ज्ञायते। तस्मात् त्रिकाण्डीकर्ता वा, लिङ्गानुशासनकर्ता वा नायं वररुचिरिति पुरुषोत्तमभाषितं भ्रान्तिमूलकमिति च वक्तव्यं भवति। अपि तु, काव्यालङ्कारसूत्रवृत्तिकर्त्रा वामनेन –

नीवी संग्रन्थनं नार्या जघनस्थस्य वाससः।

इति नाममालानिर्वचनं गृहीतम्। क्षीरस्वामिना यत्कात्यः- नीवी संग्रन्थनं नार्या जघनस्थस्य वाससः, इति तद्वाक्यमेव गृहीतम्। कात्यायनस्य कात्य इति संग्रहनामाप्यस्ति। तेन नाममालाकर्ता वररुचिरयं कात्यायनो भवेदित्यूह्यते।

अथ वररुचिरीश्वरदत्तः श्यामिलकः शूद्रकश्च चत्वारः।
एते भाणान् बभणुः का शक्तिः कालिदासस्य ॥[2]

अभाणकर्तारं कालिदासं भाणरचने परिहसन्, वररुच्यादीन् स्तुवन् केनाऽपि कृतोऽयं श्लोकः प्रचलति विद्वल्लोके। भिन्नकालभिन्नदेशवर्तिनः प्रभिन्नसारस्वतमार्गप्रसिद्धानिमानेकत्र संयोज्य, भाणरचने एते प्रथमतया गणनीया इति वक्तुमावश्यकता कथं संजातास्य

1. लिङ्गाभट्टीयम्.
2. चतुर्भाणी· M. Krishnamachariar, p. 570.

श्लोककर्तुरिति न जानीमः। एते विख्याताः कवयः एतद्भाण-श्लोकाश्च पूर्वालङ्कारिकैरुदाहृताः, तदपि वररुचिरुभयाभिसारिकां, ईश्वरदत्तो धूर्त्तविटसंवादं, श्यामिलकः पादताडितकं, शूद्रकः पद्म-प्राभृतकञ्च क्रमेण निर्ममिरे इत्यत्र किमन्यत्प्रमाणम्? एतैश्चतुर्भि-रेव प्रणीता इत्येते भाणाश्चत्वार एवैकत्र कथं दृष्टाः। स एवायं कात्यायनवररुचिरिति कथं विश्वसनीयम्? तस्मादस्य भाणकर्तुत्वं सन्दिग्धं भवति। अपि च–

विक्रमार्कसभास्थितेषु नवरत्नेष्वेकतमोऽयमिति धन्वन्तरिक्ष-पणकेत्यादिज्योतिर्विदाभरणश्लोके यदुक्तं तदसत्। नायं तत्काल-वर्त्ती। नापि तत्कालिदासादसहवासी, तथैव न पाणिनेः सहवासी। तर्हि कोऽयम्?[1]

अयं वररुचिः पाणिनीयवार्तिककारः शुक्लयजुःप्रातिशाख्य-कर्ता, श्रौतगृह्यसूत्रनिर्माता, पारस्करनाम्ना विख्यातः कात्यायनः विश्वामित्रपुत्रस्य कतस्य गोत्रापत्यं,[2] वैदिकसारस्वतप्रसिद्धमस्य "कात्य" नामैवात्र ज्ञापकम्। हरचरितचिन्तामण्यादिभिर्वर्णितं मुनित्रयचरितमतिशयोक्तिभूयिष्ठं महिमद्योतकमपि तदुक्तं निवा-सादिकं तूपादेयं विश्वसनीयञ्च। तेनायं कौशाम्बीनिवासी, वसुदत्ता-सोमदत्तयोस्तनयः, श्रुतधर इति बिरुदनाम्ना विख्यात इति च ज्ञायते। एतत्कालनिर्णये मतभेदाः सन्ति। तथापि पतञ्जलिमुनेः पूर्वोऽयं

1. For the date of Vararuci see M. Krishnamachariar, p. 86.

2. विश्वामित्रस्य तु सुता देवरातादयः स्मृताः।
देवश्रवाः कतश्चैव ततः कात्ययनाः स्मृताः। हरिवंशः –

शा. श. पू. ६०० प्रान्ते स्थित इति मतं तु विश्वसनीयं भवत्येव[1]। "यत्तेन कृतं, न च तेन प्रोक्तं-वाररुचं काव्यमिति" भगवत्पतञ्जलिनोक्तत्वादयमेकं काव्यं निर्मितवानिति विदितम्। सूक्तिमुक्तावल्यादिषु वररुचिश्लोकाश्च दृश्यन्ते। तथापि तत्काव्यं मृग्यम्। राजशेखरनिर्मितोऽयं श्लोकः सूक्तिमुक्तावल्यामस्ति –

यथार्थता कथं नाम्नि मा भूद्वररुचेरिह।
व्यधत्त कण्ठाभरणं यः सदारोहणप्रियः॥[2]

एतेन वररुचिनिर्मितं काव्यं कण्ठाभरणमित्युक्तम्। भोजराजः श्रृङ्गारप्रकाशिकायां यथा वररुचिनिर्मितचारुमत्यामितीमं श्लोकमुदाहृतवान् –

कनककुण्डलमण्डितगण्डया जघनदेशनिवेशितवीणया।
अमरराजपुरे वरकन्यया तव यशो विमलं परिगीयते॥[3]

एतेन वररुचिनिर्मितं चारुमतीनामककाव्यमिति प्रवादः। इदं वा, पूर्वोक्तं वा कात्यायनवररुचिनिर्मितमित्यत्र किं प्रमाणमस्ति ? अवन्तिसुन्दरीप्रकाशकेन चारुमती. गद्यरूपाख्यायिकेत्युक्तम्। भैमरथीवासवदत्ताद्याख्यायिकानामान्युक्तवता पतञ्जलिना चारुमतीनाम न गृहीतम्। तस्मादाप्रबलप्रमाणलाभं वररुचिकाव्यमिदमिति निर्दिश्य वक्तुमशक्यम्। तावत्कालं संकलनग्रन्थप्रकटितान् कात्यायनश्लोकान् इमान् स्मरामः —

....

1. सूक्तिमुक्तावली- p, 43; M. Krishnamachariar- p. 87.

2. " " "

3. शृङ्गारप्रकाशः.

उपकारिणि विक्षीणे शनैः केदारवारिणि ।
सानुक्रोशतया शालिरभूत्पाण्डुरवाङ्मुखः ॥[1]

उत्प्रेक्षाभूषितमेतच्छरद्वर्णनमतिहृद्यम् —

व्योम्नि नीलाम्बुदच्छन्ने गुरुवृष्टिभयादिव ।
जग्राह ग्रीष्मसन्तापो हृदयानि वियोगिनाम् ॥[2]

सान्द्रनीहारसंवीततोयगर्भगुरूदरा ।
सन्ततस्तनिताम्राली निषसादाद्रिसानुषु[3]

आलोहितमाकलयन् कन्दलमुत्कम्पितं मधुकरेण ।
स स्मरति पथिषु पथिको दयिताङ्गुलितर्जनाललितम्[4] ॥

अथ मुनित्रयपूर्त्यै भगवत्पतञ्जलिस्मरणम् ॥

पूर्वेण केनाप्ययमेवं प्रशंसितः —

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन ।
योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

वयमप्येवमेनं भजामः —

शब्दप्रपञ्चविज्ञानं महाभाष्यं मनोहरम् ।
कृतवन्तं महात्मानं पतञ्जलिमुपास्महे ॥

ओन्नमः पाणिनिकात्यायनपतञ्जलिभ्यः शब्दविद्यासम्प्रदाय-कर्तृभ्यो महद्भ्यो मुनिभ्यो गुरुभ्यः ।

1. सुभाषितावली - p. 306. (Verse 1808)
2. ,, p. 294. (1733)
3. ,, p. 292. (1720)
4. ,, p. 294. (1740)

—०—

(६) गोनन्दः

पुरा काश्मीरे कविराजाः राजकवयश्च बहव आसन् । तेषु पूर्वेषां केषाञ्चिद्राज्ञां चाटुश्लोकास्तत्र तत्र दृश्यन्ते, न तेषां कृतयः । तादृशामत्र कविगौरवेण स्मरणमेव फलम् । राजतरङ्गिणीवर्णिता गोनन्दास्त्रयः सन्ति ।

पञ्चत्रिंशन्महीपाला मग्ना विस्मृतिसागरे ।[1]

इति कल्हणेनोक्तेषु राजसु केचन गोनन्दनामानः स्युः । वस्तुतस्तु गोनन्दाख्यः कोऽपि विद्यापोषक इति न वर्णितः कुत्रापि ।

कुरुपाण्डवानां काले जरासन्धमित्रं भूत्वा, तेन साकं मधुरापुराक्रमणायागतः काश्मीरपालकः प्रथमगोनन्दो बलरामेण हतः । तत्पौत्रो द्वितीयगोनन्दो बालत्वेन कौरवैर्वा पाण्डवैर्वा साहाय्यार्थं नाहूतः । अनन्तरं बहोः कालात् काश्मीरान् पालयिता तृतीयो गोनन्दः । त्रिष्वेतेषु न कोऽपि कविरिवाभाति । तथाप्ययं राजकविरशोकात्पूर्वस्मिन् शा. शकपूर्व षष्ठशताब्द्यन्ते वा सप्तमशताब्दीप्रारम्भे वासीदिति सम्भाव्यते ।

राजशेखरेण कृता गोनन्दप्रशंसा सूक्तिमुक्तावल्यामेवमस्ति–

अनुप्रासिनि सन्दर्भे गोनन्देन समं कुतः ।
यथार्थनामतैवास्य यद्वा वदति चारुताम् ॥[2]

1. राजतरङ्गिणी.
2. सूक्तिमुक्तावली–p. 46.

अनेन कृत इति कवीन्द्रवचनसमुच्चये[1] दृश्यतेऽयं श्लोकः—

सखि ! कलितः स्खलितोऽयं हेयो नैव प्रणाममात्रेण ।
चिरमनुभवतु भवत्या बाहुलताबन्धनं धूर्तः ॥[2]

---

1. M. Krishnamachariar, p. 398.
2. सुभाषितरत्नकोशः (p. 123; v. 672) Edited by Drs. D. D. Kosambi and V. V. Gokhale. (Harvard O.S. No. 42) 1957. This is the complete critical ed. of the fragment of the Kavindravacanasamuccaya edited by Prof. F.W. Thomas- (Bibliotheca Indica Calcutta) 1912.

— 0 —

(७) गोपादित्यः

काश्मीरपालकोऽयं स्मरशास्त्रकर्तुर्वसुनन्दनरेन्द्रस्य प्रपौत्रः, अक्षभूपतेस्तनयः, वैदिकपरायणश्च । पावनात्मायमनेकब्राह्मणाग्रहार-निर्माता । वेदशास्त्रपारीणपण्डितपोषकः श्रुतिविहितकर्माचरण-दीक्षितोऽयं वर्णाश्रमाचारपालनेन कलियुगं कृतयुगीकृतवानिति "वर्णाश्रमप्रत्यवेक्षादर्शितादियुगोदयः"[1] इत्यादिकल्हणवचनेन ज्ञायते । षड्दिनाधिकषष्ठिवर्षान् काश्मीरमपालयदयं धर्ममूर्तिः शा. श. पूर्वं षष्ठशताब्द्यामासीदिति चिन्त्यते । अनेन कृतं काव्यं न दृष्टमेता-वत्पर्यन्तं परिशोधकैः । किन्तु सुभाषितावल्यामेव तन्नाम्ना द्वौ श्लोकौ स्तः ।

अद्य द्यूतजिताधरग्रहविधावीशोऽसि तत्खण्डना-
दाधिक्यं वद को भवानिति मृषा कोपाञ्चितभ्रूलतम् ।
सद्यःस्विन्नकरात्तकुन्तलभरायत्तीकृतस्यास्य मे
मुग्धाक्षी प्रतिकृत्य तत्कृतवती द्यूतेऽपि यन्नार्जितम्[2] ॥

द्यूतनिमित्तककोपव्याजचमत्कृतमिदं बाह्यशृङ्गारवर्णनम् । वक्ष्यमाणश्लोकें नायिकायामत्यन्तमनुरक्तस्य नायकस्य हृदयावस्था वर्णिता —

आश्लिष्टाऽपि करोति सा मम तनुं कण्ठग्रहोत्कण्ठितां
दृष्टाऽपि प्रियदर्शना नियमयत्यक्ष्णोर्दिदृक्षां पुनः ।
अन्तश्चेतसि संस्थिताऽपि हृदयं भूयो विशत्येव मे
रूढप्रेमसमागमाऽपि नवतां धत्ते प्रिया प्रत्यहम् ॥[3]

---

1. राजतरङ्गिणी.
2. सुभाषितावली. v. 2110, M. Krishnamachariar, p. 398.
3. सुभाषितावली. v. 1368.

(ट) धर्माशोकः

प्राचीनेषु काश्मीरराजेष्वयमप्येकतमः, नरेन्द्रभवनविहार-निर्मातुरपुत्रकस्य सुरेन्द्रभूभर्तुरनन्तरमन्यकुलादागत्य, गोधरनामकः काश्मीरेषु पालकोऽभवत् । तस्य प्रपौत्रः शचीनरः । सोऽप्यपुत्रः । तदनन्तरं शकुनेः प्रपौत्रः शचीनरपितृव्यपौत्रः शुचिवर्तनोऽशोकः काश्मीरराज्यं लेभे । दुरितदूरः सत्यसन्धोऽयं राजा जिनमताव-लम्बी तन्मतवर्धनश्च । धर्मवर्तनत्वेन धर्मरक्षकत्वेन चायमशोको धर्माशोकख्यातिमगमत् ।[1]

स षण्णवत्या गेहानां लक्षैर्लक्ष्मीसमुज्ज्वलैः ।
गरीयसीं पुरीं श्रीमांश्चक्रे श्रीनगरीं नृपः ॥[2]

इति श्रीनगरीनिर्मातृत्वेन वर्णितोऽयं राजतरङ्गिण्याम् । भगवद्बुद्धनिर्याणानन्तरं तन्मतव्याप्तिप्रवृत्तेष्वाद्यमहापुरुषेष्वेकोऽयं धर्ममूर्तिः शा. श. पूर्वं पञ्चशताब्द्यारम्भेऽभवदिति तर्क्यते । प्रकृतिरञ्जनोऽयं राजा संस्कृतविद्यापोषकः, कवीनामाश्रयः, स्वयञ्च कविरिति प्रथा वर्तते । एतन्निर्मितं काव्यं मृग्यम् । तथापि केचिच्छ्लोकाः सदुक्तिकर्णामृतादिषु दृश्यन्ते । तत्र –

अहमहमिकाबद्धोत्साहं रतोत्सवशंसिनि
प्रसरति मुहुः प्रौढस्त्रीणां कथामृतदुर्दिने ।
कलितपुलका सद्यः स्तोकोद्गतस्तनकोरका
वलयति शनैर्बाला वक्षस्थले तरलां दृशम् ॥[3]

1: राजतरङ्गिणी. I. 101.

2. ,, I. 104.

3. M. Krishnamachariar, p. 397.

देव! स्वस्तुतिरस्तु नाम हृदि वः सर्वे च सन्त्यागामा-
स्तीर्थं न क्वचिदीदृशं भवति किं त्वत्खड्गधारा यथा ।
यामेव स्वशरीरसिद्धिरसिको मूर्ध्नि प्रतीच्छन् क्षणं
द्वैविध्यादनु पञ्चतां तदनु च त्रैविध्यमाप क्षणात् ॥[1]

प्रथमश्लोके उदयद्यौवना बालिका वर्णिता । द्वितीये तु वीरकार्यं वर्णितम् । उभावपीमौ रसौ मारजिज्जिनमतावलम्बिनोऽनुचिताविवाभातः । अपि तु धर्माशोको बौद्धमतप्रवर्तकोऽपि न संन्यासी, न परित्यक्तराज्यः । अपि चेदं कीर्तिवर्णनं चेतश्चमत्कुरुते ।

निःसृत्याहवसागरादनु पुनः संसृत्य पृथ्वीतलं
कृत्वाऽधो हिमशैलमीश्वरशिरः शीतांशुलेखामपि ।
गङ्गेव स्मृतजन्मभूमिरमरैः साश्चर्यमालोकिता
त्वत्कीर्तिः प्रतिलोमलङ्घितवती ब्रह्माण्डमारोहति ॥[2]

अस्य पौत्रः काश्मीरपालको दामोदरः । तदनन्तरं काश्मीरमण्डलं कनिष्कादितुरुष्कत्रयाक्रान्तमिति राजतरङ्गिण्यां दृश्यते । तस्माच्चायमशोको गौतमबुद्धनिर्वाणानन्तरमेव तन्मतप्रवर्तनपरायणः स्यादिति वक्तव्यं भवति ।

1. सूक्तिमुक्तावली. p. 345. v. 68.
2. " p, 341. v. 44.

— :o: —

(६) भरतमुनिः

कविरयं सहित्यशास्त्रलङ्कारस्य नाट्यशास्त्रस्य प्रणेता। इदमित्थमिति विनिश्चेतुमशक्येषु कविचरित्रेषु एतदीयमेकम्। एतज्जीवितमनेकैरनेकधा चर्चितमपि, अद्यापि संशयाकुलमेवासीत्। सन्देहहेतुषु अस्य ग्रन्थस्य प्रथमाध्यायः प्रथमः। पाठकहृदयाकर्षणार्थं स्वग्रन्थमहत्त्वाभिवर्णने केषाञ्चित् प्राचीनकवीनामभिमतेऽपि ततोऽप्यपूर्ववास्य शैली वर्तते।

ब्रह्मा रामायणे, कुरु रामकथां श्लोकबद्धामित्यादिदेश वाल्मीकिम्। भारते च ग्रन्थलेखनप्रकाशनोपायानुपदिदेश व्यासाय। अस्मिन्नाट्यशास्त्रे तु स्वयं चतुर्वेदसारं नाट्यवेदं विरच्य, त्वमेवास्य प्रयोक्ता भवेत्याज्ञापयद्भरताचार्यम्[1]। एवमद्भुतविषयोपेता ग्रन्थावतारिका। अत्रत्यं नाट्यशब्दमालम्ब्य प्रवृत्तानि विमर्शनानि तु बहूनि।

उपवेदेषु गान्धर्ववेदोऽस्ति, न नाट्यवेदः। या तु गर्भोपनिषदादिषु गानविद्या प्रशंसिता सा छान्दोग्योपनिषदि देवजनविद्येति कीर्तिता।[2] सैव गन्धर्वैर्व्याप्तित्वात् ऋगादिवेदसम्भूतवसन्तमालवादिरागाणां सत्त्वाच्च, गान्धर्ववेदसंज्ञामलभतेति नारदशिक्षादयः स्मरन्ति। नाट्यवेदेऽपि गानकला सविशेषं दृश्यत इति कृत्वा गान्धर्वनाट्यवेदयोरैक्यं केचिद्वदन्ति। भेदमपरे वदन्ति। तथापि यामलाष्टकतन्त्रादिवर्णितलक्षणानि, "गान्धर्ववेदः षट्त्रिंशत्सहस्र-

---

1. नाटचशास्त्रम्, I· 17-24, Y.Y. (pp. 2-3)-
   Kavyamala. 42. (1943).
2. M. Krishnamachariar, P. 983.

ग्रन्थसम्मितः" इत्यादितद्वाक्यानि च पश्यतामस्माकं गान्धर्ववेदोऽन्यः प्राचीनग्रन्थ इति अभिप्रायोऽवश्यं जायेत। परन्तु स वेदोऽद्य मृग्यः। अथ नटनाट्यनृत्यनर्तनशब्दा वेदेषु, वेदान्तेषु, रामायणे भारते च सन्तीति विदितमेव। शिलालिकृशाश्वाभ्यां नटसूत्राणि निर्मितानीति पाणिनिना ख्यातम्। नटनाट्यशब्दरूपनिष्पत्तिश्च कृता। धातुपाठे नटधातुश्चतुर्वारं प्रयुक्तः। एवं स्थिते पाणिनिकाले नाट्यशब्दो नृत्यपरः, न नाटकाभिनयपरः। तेनोक्तानि त्रीणि सूत्राणि[1] पतञ्जलिना न व्याख्यातानि। तस्मात्परम् अष्टाध्याय्यां प्रक्षिप्तानीति यदुक्तं बीवरुपण्डितेन तदयुक्तमतिसाहसिकञ्च,[2] तदास्ताम्। शिलालिनटसूत्रं पश्चान्नष्टमपि पाणिनिकाले तदस्ति। नाट्यवेदः पृथक्त्वेनासीदिति शारदातनयेन[3] सूचितेऽपि स वेदः केनापि न दृष्टः।

नाट्यवेदसार[4] एव द्वादशसहस्री, षट्सहस्रीति तदुक्तिभिरेव विदितम्। वृद्धभरतभरताचार्यग्रन्थावेव नाट्यवेदनाम्ना च व्यव-

---

1. पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः, कर्मन्दकृशाश्वादिनिः P. ४-३-११०, १११। छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः P. ४-३-१२९ नट-नृत्तौ, नट-अवस्कन्दे.

2. Weber : H. I. L. p. 197.

3. Sarada-tanaya, author of भावप्रकाशः (G.O. Series, Baroda)-1929.

4. **नाट्यवेदाच्च भरताः सारमुद्धृत्य सर्वतः।**
संग्रहं सम्प्रयोगार्हं मनुना प्रार्थिता व्यधुः॥
एकं द्वादशसाहस्रैः श्लोकैरेकं तदर्धतः।
षड्भिः श्लोकसहस्रैर्यो नाट्यवेदस्य सम्भवः॥

हृताविरयवगन्तव्यम्[1] । आत्मनो नाट्यवेदलब्धि विवृण्वता भरतमुनिनेदं स्पष्टीकृतम् । तस्माच्छिलालिकृशाश्वनटसूत्राणि दृष्ट्वा प्रथमतो द्वादशसहस्रीग्रन्थात्मको नाट्यवेदः समुत्पन्न इति चिन्तनं समुचितं स्यात् ।[2]

वृद्धभरतप्रणीतस्तद्ग्रन्थस्तु सम्यग्विद्वल्लोके व्याप्तोऽपि दैववशान्नष्टप्राय आसीत् । ग्रन्थावतारिकायां द्वादशसहस्री न प्रशंसितापि तामवलोक्य भरताचार्यो षट्सहस्रीं निर्मितवानिति विश्वसनीयमेव । एतद्रसनिरूपणमेव वृद्धभरतमतानुकरणं, तदनुसरणञ्च स्पष्टं दर्शयतीत्थम्– "यथा नानाप्रकारौषधैः व्यञ्जनौषधैः पाकविशेषैश्च संस्कृतानि व्यञ्जनानि मधुरादिरसानामन्यतमेनात्मना परिणमन्ति तद्भोक्तृणां मनोभिः तादृशात्मतयास्वाद्यन्ते, तथा नानाप्रकारैर्विभावादिभावैरभिनयैः सह यथार्हमभिवर्द्धिताः स्थायिनो भावाः सामाजिकानां मनसि रसात्मना परिणमन्तस्तेषां तादात्विकमनोवृत्तिभेदभिन्नास्तत्तद्रूपेण तैः रस्यन्ते"[3] इदं वृद्धभरतरसनिरूपणं भावप्रकाशने द्वितीयाध्याये ।

भरतमुनिनिरूपणं यथा नाट्यशास्त्रे "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः । यथा नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिः ····तथा नानाभावोपगमाद्रसनिष्पत्तिः । ····यथा हि

---

1. **एवं हि नाट्यवेदेऽस्मिन् भरतेनोच्यते रसः ।**
   तथा भरतवृद्धेन कथितं गद्यमीदृशम् ॥
   भावप्रकाशः X. ३४-३५; M. Krishnamachariar, p.810.
2. For a detailed discussion about this, see History of Sanskrit Poetics by P. V. Kane (1951)-pp. 10-46.
3. M. Krishnamachariar, p. 810.

नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषाः हर्षादींश्चाप्यधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः···· तस्मान्नाट्यरसाः"[1] ।

तथा च बहुरूपमिश्राद्यर्वाचीनपण्डितैरपि दृष्टा द्वादशसहस्री[2] भरतमुनिना पूर्वेण संदृष्टेत्यत्र किमाश्चर्यम् ? तत्कर्ता वृद्धभरतः शा· शकपूर्वं पञ्चमशताब्दीमध्यगतो भवेत् । तस्मात् परोऽयं भरतमुनिश्चतुर्थशताब्दीप्रारम्भवर्ती स्यादिति केषाञ्चिदभिप्रायः । एतदीयकालनिर्णये मतभेदाः सन्तु नाम[3] अतोऽधिकं विनिश्चेतुमशक्योऽस्य समयः ।

त्रिविधकाव्यधर्माणामाद्योपदेष्टा वाल्मीकि: । साहित्य–शास्त्रस्य लक्ष्यं लक्षणञ्च रामायणम् । तत्काव्यगुणालङ्कारविवरणे प्रवृत्तमाद्यं लक्षणं नाट्यशास्त्रम् । तस्मिन्नपि सर्वात्मना सजीवा भरतमुनिकृतिः षट्सहस्री । काव्यकर्तारो लक्षणकर्तॄन् न स्मरन्तु नाम, न तावता तत्प्राचीनत्वहानिः ।

पूर्वरङ्गनान्दीस्थापनादयः, शृङ्गाराद्यष्टरसाः, विभावादिभावभेदाः, काव्यलक्षणकाव्यगुणदोषादयो दशविधरूपकलक्षणानि नटसूत्रधारविदूषकादिधर्माश्च (५-६-७-१६-१८-२६ अध्यायेषु) लक्षणसमन्विताः दृश्यन्ते । अलङ्कारस्वरूपं समग्रं जानता अनेन–

1· नाट्यशास्त्रम् VI· p· 93-Kavyamala ed· (1943)

2· M· Krishnamachariar, p· 810·

3· „ „ p· 811.

"उपमा दीपकञ्चैव रूपकं यमकं तथा ।
काव्यस्यैते ह्यलङ्काराश्चत्वारः परिकीर्तिताः"[1] ॥

इति प्रधानत्वेनालङ्कारचतुष्टयं निर्णीतम् । इदमेकमेवाल-मस्य प्राचीनत्वनिर्णये । तस्माद् भासादपि पूर्वोऽयं भरताचार्यः पूर्वोक्तकाल एवासीदिति भावयामः ।

कुत्रत्योऽयमाचार्यः ? अस्मिन् विषये विमर्शकास्तूष्णी-मासन् । तथापि यत्किञ्चिद्वक्तुमुत्सहे- "नाट्यवेदं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्" इत्यारभ्यात्रेयादिमुनिसदसि तदुत्पत्तिमपूर्व-मत्यद्भुतां कथयन् प्रयोगस्यायं समयः "महेन्द्रपर्वते विजयोत्सवेऽयं प्रयुज्यताम्"[2] इत्यात्मानं ब्रह्मादिदेशेति अयमाचार्यः प्रोक्तवान् । महेन्द्रः सप्तकुलपर्वतेष्वेकतमः, तथापि ततोऽपि सुप्रसिद्धेषु विन्ध्य-हिमालयादिषु सत्सु नाट्यप्रदर्शनायायं गिरिरेव प्रधानत्वेन कथं ब्रह्मणः स्मृतिपथं गतः ? तत्रापि विजयोत्सवः कथं प्रशंसितः ? अप्रतर्क्येऽस्मिन्नाट्यवेदोदन्तकल्पने वाक्यमिदमेकमेव यथार्थाक्षरं सत्कवेः स्वस्थानाभिमानं प्रदर्शयति । जगन्नाथक्षेत्रसमीपवर्ती महेन्द्रगिरिरान्ध्रोत्कलसंयोगप्रदेशेऽस्ति । तीर्थयात्रार्थी विजयः

---

1. नाट्यशास्त्रम्-XVI. 43 (p. 260)-Kavyamala-No. 42. (1943)
2. नाट्यशास्त्रम्. I.

(अर्जुनः) तत्र जगाम, स गिरिर्विजयोत्सवस्य स्थानञ्च[1]। एतेन भरतमुनिर्महेन्द्रपर्वतप्रान्ते कस्मिश्चिद् ग्रामे उवासेति गम्यते। कुमारिलभट्टस्य जन्मभूमिस्तत्प्रान्तीयजयमङ्गलग्राम इति विदितमेव।

दामोदरगुप्तधनञ्जयशारदातनयादिभिः संस्तुतेऽस्मिन् षट्सहस्रीग्रन्थे[2] रूपकप्रदर्शनविधाने प्रधानेऽपि रसभावालङ्कारनायकादिलक्षणानि च वर्णितानि। अभिनवगुप्ताचार्यविरचिताभिनवभारतीव्याख्ययेदं शास्त्रमतीव विख्यातिं नीतम्। "षट्त्रिंशकं भरतसूत्रमिदं विवृण्वन् वन्दे शिवम्"[3] इत्यादि तदुक्तिरेतद्ग्रन्थपरिमितिं कथयति। तथाप्यन्तिमाध्यायस्य द्वेधा विभक्तत्वेन पश्चादिदं सूत्रं सप्तत्रिंशकमिति पाठोऽपि समजनि। अष्टाविंशाद्यध्यायेषु सप्तस्वरगात्रगानतन्त्रीगानादयोऽभिवर्णिताः। तेनेदं सूत्रं गान्धर्वबेदमप्यनुसारेति ज्ञायते। किम्बहुना, अर्वाचीनविविधसाहित्यलक्षणानामिदं नाट्यशास्त्रं मार्गदर्शकमिति सन्तोष्टव्यम्। सहृदयहृदयाकर्षकमिदं रसनिर्वचनं श्लाघ्यम्।

यथा बीजाद्भवेद् वृक्षः वृक्षात्पुष्पं फलं यथा।
तथा मूलं रसाः सर्वे तेषु भावा व्यवस्थिताः॥
न भावहीनोऽस्ति रसः न भावो रसवर्जितः॥[4]

---

1. **स (अर्जुनः) कलिङ्गानतिक्रम्य देशानायतनानि च।**
महेन्द्रपर्वतं दृष्ट्वा तापसैरुपशोभितम्॥
समुद्रतीरेण शनैर्मणिपूरं जगाम ह।
भोजवृष्ण्यन्धकाश्चैव महेन्द्रस्य गिरेस्तदा॥
(भारत, आदि. अध्या. २१५-१७)
2. M. Krishnamachariar. p. 810.
3. ,, p. 811.
4. नाट्यशास्त्रम् VI. 37, 39 vv. (p. 94) Kavyamala Ed. (1943); G. O. S. ed. Vol. I. ch. vi. vv. 36, 38 (py. 193-94) 2nd Revised edition. (1956).

(१०) गुणाढ्यः

संस्कृतकविभिः पूजितत्वेनायं प्राकृतकविरत्र संनिविष्टः। गद्यकविकुलतिलकेन भट्टबाणेनास्य बृहत्कथा कीर्तितैवम्—

समुद्दीपितकन्दर्पा कृतगौरीप्रसाधना।
हरलीलेव नो कस्य विस्मयाय बृहत्कथा॥[1]

महाकविदण्डिनैवं प्रशंसिता — "भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम्[2]।" सुबन्धुकविनाऽपि वासवदत्तायामेवमुदाहृता —"बृहत्कथालम्बैरिव सालभञ्जिकानिवहैः[3]।" दशरूपके, धनञ्जयेन च वस्तुविषये बृहत्कथैवं प्रमाणीकृता – "इत्याद्यशेषमिह वस्तुविभेदजातं रामायणादि च विभाव्य बृहत्कथाञ्च[4]।" धनिकेनैवमुक्तम् – "तत्र बृहत्कथामूलं मुद्राराक्षसम्[5]।"

कालिदासश्चावन्तीदेशव्याप्तामुदयनकथां सस्मार। "प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्।"[6] भासमहाकविनिर्मितप्रतिज्ञायौगन्धरायणस्वप्नवासवदत्तरूपके बृहत्कथामूले इति विदितमेव खलु।

1. हर्षचरितम्—Introduction.
2. काव्यादर्शः. I. 38 (p.3.) Dr. S.K. Belvalkar's. ed (1924)
3. M. Krishnamachariar, p. 413.
4. " "
5. " "
6. मेघदूतम् I. 30. (Dr. S.K. De's ed. Sahitya Academy, New Delhi) 1956.

एतेन बृहत्कथायाः प्राशस्त्यं प्राचीनत्वञ्च निरूपितम् ।

गुणाढ्यः कैश्चिन्महामहिमाढ्यत्वेन वर्णितः । महामाहेश्वरजयद्रथविरचितहरचरितचिन्तामणौ[1] सप्तविंशप्रकाशः कथयत्येतन्महिमानमेवम् –

अपूर्वविचित्रकथाश्रवणकुतूहलायै पार्वत्यै परमेश्वरः सप्तविद्याधरसम्बन्धिनीः कथा रहस्यकथयत् । तत्समये तद्भक्तः पुष्पदन्तः षट्पदो भूत्वा, ताः श्रुत्वा गृहं गत्वा स्वप्रियायै जयायै कथितवान् । तदपराधं ज्ञात्वा भवानी, मर्त्यो भवेति पुष्पदन्तं तत्सहवासिनं माल्यवन्तं च शशाप । जयया प्रार्थिता शापविमोचनोपायञ्च प्रोवाच । माल्यवान् गुणाढ्यनाम्ना मानवो भूत्वा, सुप्रतिष्ठितदेशपालकस्य सातवाहनस्य सचिवेष्वेकतमोऽभवत् । तदनु मौनिवृत्त्या विन्ध्याटवीं प्राप्य, तत्र काणभूतिमुखाद्विद्याधरकथाः श्रुत्वा यथाश्रुतं ता अरचयत्तत्र पिशाचभाषायाम् । ततो राजकृतावमानमसहमानो लिखितकथापत्राणि दग्धुमुपचक्रमे । तद्विज्ञाय सविषादमागतेन सातवाहनेन प्रार्थितः सन्दग्धशेषं लक्षग्रन्थं तस्मै प्रादात् । नरवाहनदत्तकथात्मिका सैव लक्षग्रन्थात्मिका बृहत्कथा । शापविमुक्तो गुणाढ्यरूपो माल्यवानेवं पुनः शिवसन्निधिं जगाम । अयमेव गुणाढ्यमहिमोदन्तः काश्मीरनेपालदेशयोरीषद्भेदं व्याप्तः ।[2] अपूर्वाद्भुतमहाकथारचयितुरस्य तादृशमहिमापादनं समुचितमेव । तदास्ताम् ।

अस्य कालनिवासौ बहुभिः परिशोधितावपि न सुनिश्चितौ । तत्र कारणं पूर्वोक्तकथा एव । गुणाढ्यबृहत्कथां बृहत्कथामञ्जरीनाम्ना संस्कृतीकुर्वता क्षेमेन्द्रेण गोदावरीतीरस्थ प्रतिष्ठाननगरमस्य

1. M. Krishnamachariar, p. 269.

2. " " 414; 417.

जन्मस्थानमित्युक्तम् ।[1] कथासरित्सागरकर्ता सोमदेवभट्टस्तु, प्रतिष्ठानराजधानी सुप्रतिष्ठानगर्यस्य जन्मभूमिरित्युवाच ।[2]

तत्पुरपालकस्तदानीन्तनः सा(शा)तवाहन आन्ध्रराजवंश्योऽरिष्टशातकर्णिपुत्रो हालापरनामा क्रि॰ पू॰ ४६० परिमितकाले स्थित इति, तस्यायं कविर्मन्त्रीति च, केचन भावयन्ति । सोऽयं शातवाहन एव शककर्ता शालिवाहनस्तत्सभायामयं कविरासीत् । तस्मादयं शालिवाहनशकारम्भसमये बभूवेति केचन । अपरे तु गुणाढ्यः क्रि॰ श॰ १·२·३·४· शताब्दीष्वेकस्यामासीदिति पृथगब्रुवन् । तथास्य जन्मभूमिर्मधुरेति उज्जयिनीति च केचनावदन्[3] । एवमस्य[4] कालनिवासावतिसन्दिग्धौ ।

गुणाढ्यमहिमकथां विश्वस्यायं विन्ध्यपर्वतप्रान्तीय इति वा हिमालयप्रान्तीय इति वा, काश्मीरदेशीय इति वा निर्णेतुं कथं शक्यते ? शिवभक्तः पुण्यवर्तनो गुणाढ्यः पैशाचीप्राकृते बृहत्कथाकाव्यमरचयदित्येव तासां फलम् ।

भासकालिदासाभ्यामैतिहासिकसम्प्रदायाद् वत्सराजकथा श्रुतेत्युक्तेरपि ताभ्यां बृहत्कथा दृष्टेत्युक्तिः समुचिता ।

अवन्तीपुरवासिनो वृद्धा उदयनकथाकोविदा इति तत्प्रसङ्गमाकृष्य, सविशेषं यदुक्तं कालिदासेन तदेवात्र ज्ञापकम् । तत्प्रयुक्तस्योदयनकथाशब्दस्य बृहत्कथैवार्थः । मन्दाक्रान्तायां गणप्रातिकूल्या-

1. M. Krishnamachariar. p. 414; 417.
2. " " "
3. M. Krishnamachariar,
4. बुहलरु–कीत्–कृष्णस्वाम्यार्यप्रभृतीनामभिप्रायः ।
(Dr. G. Buhler; Dr. A.B. Keith.)

न्नायं शब्दः प्रयुक्त इति ज्ञातव्यम् । तस्माद् भासकालिदासाभ्यां पूर्वो गुणाढ्यः शा. श. पूर्वं तृतीयशताब्द्यामासीदित्युज्जयिनीप्रान्तनिवासीति च तर्कयाम आप्रबलप्रमाणलाभम् ।'

बृहत्कथानुवादकौ क्षेमेन्द्रसोमदेवभट्टावित्युक्तमितःपूर्वम् । ताभ्यां पूर्वो बुधस्वामिना बृहत्कथाश्लोकसंग्रहो निर्मितः । आद्या बृहत्कथा चिरकालं सजीवेति धनञ्जयधनिकादिप्रशंसावचनैरेव विदितम् । तथापि सोमदेवकृतकथासरित्सागरेण गुणाढ्यकीर्तिर्द्विगुणीकृतेत्यत्र न काप्यनुपपत्तिः । बृहत्कथाकाव्यानां माता बृहत्कथा । विचित्रकथोपदेष्टा गुणाढ्यो महिमाढ्यः ।

— ० —

1. सातवाहनस्य शालिवाहनसंज्ञाप्यस्तीत्यत्र नास्ति विश्वसनीयं प्रमाणम् । पूर्वोक्तकथावर्णितशातवाहनः शककर्ता शालिवाहनः स्याद्वा ? पाटलिपुत्रपालको नन्दः सुप्रतिष्ठितदेशपालकसातवाहनश्च समकालाविति केचित् । तदा सोऽयं सातवाहनः शककर्ता कथं स्यात् ?

(११) चन्द्रकविः

सोऽयं काश्मीरीयः श्रीनगरनिवासी तुञ्जीनभूपालस्य सभायां विद्वत्कविः। द्वैपायनमुनेरंश इति विख्यातः।

कल्हणेन राजतरङ्गिणीद्वितीयरङ्गेऽयमेवं वर्णितः —

अथ वाक्पुष्टया सार्धं देव्या दिव्यप्रभावया।
भुवं तत्प्रभवो भुञ्जन् तुञ्जीनोऽरञ्जयत्प्रजाः॥
नाट्यं सर्वजनप्रेक्ष्यं यश्चक्रे स महाकविः।
द्वैपायनमुनेरंशस्तत्काले चन्द्रकोऽभवत्॥

एकः कनिङ्गहामुपण्डितः शालिवाहनशक २४० समये तुञ्जीन आसीदित्युक्तवान्।[2] अपरे बहवः शा. श. (२५) पञ्चविंशवर्षे स्थित इत्यूचुः। तस्मात् सन्दिग्धोऽस्य कालः। तथापि राजतरङ्गिणीमनुसृत्य कश्चिद्विचारः। काश्मीरपालकेषु तुञ्जीननामानस्त्रयः सन्ति। तृतीयगोनन्दादारभ्य विंशतिभूपालाः काश्मीरानपालयन्। ततो नरेन्द्रमहीपतिसूनुरन्धयुधिष्ठिरः प्रभुरभूत्। स तु नान्धः। सूक्ष्मनयनत्वात् तथा व्यपदेशः सञ्जातः।[3] दुष्टत्वादयं राज्याद् भ्रष्टः। तन्मन्त्रिभिर्विक्रमादित्यस्य (उज्जयिनीपालकस्य) ज्ञातिः प्रतापादित्यः काश्मीरराज्येऽभिषिक्तः। तदा तृतीयगोनन्दादिराज्यकालगताब्दा नववासराधिकाः १०१४। प्रतापादित्यादनन्तरं तत्पुत्रो जलौकाः, तदनन्तरं तत्पुत्रस्तुञ्जीनश्च काश्मीरपालकावभवताम्। अयं तु प्रथमस्तुञ्जीनः। अस्य सभायामेव चन्द्रकमहाकविरासीत्। अस्य राज्यारम्भकालः शा. शकपूर्व

---

1. M. Krishnamachariar, p. 599.
2. ,, ,,
3. राजतरङ्गिणी. I. 350.

१८२ वत्सरमितः। तथापि चन्द्रककालः सन्दिग्ध इव दृश्यते परिशोधकाभिप्रायभेदात्। देशचरित्रज्ञाः प्रमाणमत्र।

अस्य कवेर्नाट्यं सर्वजनप्रेक्ष्यमित्युक्तमपि न तत्प्रेक्षणभाग्यं भारतीयानाम्। क्षेमेन्द्रधनिकादिभिरभिनुतं तत्काव्यम्। किन्तु पश्चात् नष्टम्।

औचित्यविचारचर्चायामुदाहृतावेतौ दृश्येते —

युद्धेषु बाल्य (भाग्य) चपलेषु न मे प्रतिज्ञा
दैवं नियच्छति जयञ्च पराजयञ्च।
एषैव मे रणगतस्य सदा प्रतिज्ञा
पश्यन्ति यन्न रिपवो जघनं हयानाम्॥[1]

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलः
क्षुधाक्षामो रूक्षः पिठरककपालार्दितगलः।
व्रणैः पूतिक्लिन्नैः कृमिपरिवृतैरावृततनुः
शुनीमन्वेति श्वा तमपि मदयत्येव मदनः॥[2]

इदं हृदयस्पर्शि कामविकारवर्णनमतीव नीतिबोधकं विरक्तिजनकं च।

रतिशोकक्रोधानां समप्राधान्ये स्फुरत्यप्येक एवात्र स्थायीत्ययं चन्द्रकश्लोक उदाहृतो धनिकेन–

एकेनाक्ष्णा प्रविततरुषा वीक्ष्यते व्योमसंस्थं।
भानोर्बिम्बं सजललुलितेनापरेणात्मकान्तम्।

1. औचित्यविचारचर्चा, (p. 122 - Kavyamala. Part I. 3rd ed. 1929) - सुभाषितावली - Intro. p. 35. (Peterson's ed-1886)
2. Also found in भर्तृहरिनिर्मिता सुभाशितत्रिशती-।I.78 (N. S. P. ed. 8th ed. 1947) औचित्यविचारचर्चा.p. 129

अट्टनच्छेदे दयितविरहाशङ्किनी चक्रवाकी
द्वौ सङ्कीर्णौ रचयति रसौ नर्तकीव प्रगल्भा ॥[1]

अद्भुते यथा चन्द्रकस्येति क्षेमेन्द्रेणोदाहृतोऽयं श्लोकः –

कृष्णेनाम्ब गतेन रन्तुमधुना मृद्भक्षिता स्वेच्छया
सत्यं कृष्ण ? क एवमाह ? मुसली मिथ्याम्ब ! पश्याननम् ।
व्यादेहीति विकासितेऽथ वदने दृष्ट्वा समस्तं जगत्
माता यस्य जगाम विस्मयपदं पायात् स वः केशवः ॥[2]

श्लोकोऽयं "कृष्णः स पुष्णातु नः" इत्यन्तिमवाक्यपाठभेदेन लीलाशुकनिर्मितकृष्णकर्णामृते च विद्यते । पर्यालोचितेऽस्मिन् विषये कृष्णसम्बन्ध्ययं श्लोकः केनापि लेखकेन कदापि कृष्णकर्णामृते प्रक्षिप्तः स्यादिति द्योत्यते । तत्काव्ये ग्रन्थपातग्रन्थप्रक्षेपौ प्रसिद्धौ खलु । तेन क्षेमेन्द्रपठितोऽयं श्लोकश्चन्द्रकनिर्मित एवेति विश्वास्यम् । एतेन चन्द्रकप्रणीतं नाट्यं दृश्यकाव्यमिति, तस्यायं नान्दीश्लोक इति च भाति[3]। तर्हि भासकालिदासादिभिः कुतो न स्मृतं तन्नाट्यम्? स प्रश्नोऽन्यः । भासश्चायं पूर्वो वा न वेत्येवं समालोचनीयः प्रश्नः । विद्वल्लोकोऽत्र प्रमाणम् ।

1. M. Krishnamachariar, p. 599; सूक्तिमुक्तावली-p. 249 v. 12; सुभाषितावली. v. 1916 (p. 326)
2. सूक्तिमुक्तावली-p. 330.v. 2.
3. (M. Krishnamachariar, p. 799.

(१२) भासमहाकविः

भाषासु रम्या गैर्वाणी तस्यां काव्यं मनोहरम् ।
तत्रापि रूपकं रम्यं तत्र भासकवेः कृतिः ॥
धावकापरनामायं भासो भासयते जगत् ।
तत्त्वैरिवादिपुरुषः चतुर्विंशतिरूपकैः ॥

इति कस्यचित्पूर्वकवेश्चाटुश्लोकौ पण्डितसम्प्रदाये श्रूयेते । एतेन किमयं धावकापरनामा ? किमनेन चतुर्विंशतिः रूपकाणि निर्मितानीति द्वौ सन्देहावपि जायेते । विदितमेवैतत्प्रायशो महाकवयो महापुरुषाश्च कल्पिताद्भुतकथाश्रया भवन्तीति ।

अस्य धावकसंज्ञायां कथेयम् – [1]कदाचिदुज्जयिनीविभुः श्रीहर्षविक्रमादित्यो मृगयार्थं गत्वा पुरीमागच्छन् मध्येमार्गं कुत्रचिन्नदीतीरे क्षालितवस्त्राण्यातप आस्तीर्य; तत्रत्यवृक्षच्छायायामुपविश्य, ग्रन्थं लिखन्तं धावकं (रजकं) दृष्ट्वा, किं लिखसीत्यपृच्छत् । स उत्थाय नागानन्दं नाम रूपकं रचयामीत्यवोचत् । राज्ञा अभ्यर्थितः कांश्चिच्छ्लोकांश्च पपाठ । तेन भूपतिराश्चर्यानन्दभरितस्तमानीय, गृहान् गत्वा, सादरं सत्कृत्य, हे धावक ! भवन्निर्मितानि रूपकाणि मन्नाम्ना प्रकटयेति प्रार्थितवान् । तदा धनापेक्षया सोऽयं रजकः स्वनिर्मितानि रत्नावलीप्रियदर्शिकानागानन्दानि सूत्रधारकृतारम्भाणि कृत्वा, तथैवाकरोत् । सोऽयं धावको भासकविरिति किंवदन्ती । न तु केवला किंवदन्ती ग्रन्थैश्च स्थिरीकृतैवम् । "कालिदासादीनामिव यशः, श्रीहर्षदेर्धावकादीनामिव धनम्" इति काव्यप्रकाशे मम्मटेनोक्तम् ।[2] भट्टबाणेन हर्षचरितावतारिकायां –

---

1. Introduction to Ray's edition of रत्नावली.
2. M. Krishnamachariar, p. 554.
काव्यप्रकाशः – 1.2 कारिका.

सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ।।[1]

इत्येवोक्तम् । न तु धावकसंज्ञा सूचिता । राजशेखर-महाकविना कविविमर्शाख्यग्रन्थो निर्मित इति महती प्रतीतिः । तदीयत्वेन बहवः श्लोकास्तैस्तैः सङ्गृहीता दृश्यन्ते । तेष्विमे श्लोका भासकविप्रशंसापराः –

आदौ भासेन रचिता नाटिका प्रियदर्शिका ।
निरीर्ष्यस्य रसज्ञस्य कस्य न प्रियदर्शना ।।
तस्य रत्नावली नूनं रत्नमालेव राजते ।
दशरूपककामिन्या वक्षस्यत्यन्तशोभना ।।
नागानन्दं समालोक्य यस्य श्रीहर्षविक्रमः ।
अमन्दानन्दभरितः स्वसभ्यमकरोत्कविम् ।।
उदात्तराघवं नूनमुदात्तरसगुम्फितम् ।
यद्वीक्ष्य भवभूत्याद्याः प्रणिन्युर्नाटकानि वै ।।
भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम् ।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ।।[2]

किञ्च भासोऽयं घटकर्परनाम्ना च कविलोके प्रथित इति इमौ चाटुश्लोकौ च कथयतः –

श्रीहर्षविक्रमार्कस्य सभायां शुशुभे च सः ।
नवरत्नेष्वन्यतमो घटकर्परनामतः ।।

---

1. हर्षचरितम्. Introduction-16 (N.S. Press, Bombay. 4th ed. 1914)
2. M. Krishnamachariar, p. 544.

स जयति कविकुलतिलको भासकविर्धावकान्यनामायम् ।
सहृदयहृदयाह्लादी घटकर्परनामतः ख्यातः ॥[1]

अस्य घटकर्परसंज्ञालब्धेरियमेका कथा। धावको यमककाव्यमेकं विरच्य तदन्ते प्रतिज्ञातवानेवम् –

आलम्ब्य चाम्बुतृषितः करकोशपेयं
भावानुरक्तवनितासुरतैः शपेयम् ।
जीयेत येन कविना यमकैः परेण
तस्मै वहेयमुदकं घटकर्परेण ॥[2]

एतां प्रतिज्ञामसहमानास्तत्कालकवय एनं धावकाख्यं भासं घटकर्पराख्यं प्राहुरितीयं चाटूक्तिर्यथा –

श्रुत्वेति भासकविनोक्तममृष्यमाणः
प्राहुस्तमन्यकवयो घटकर्पराख्यम् ।[3]

घटकर्पररचितमेकं यमककाव्यमस्ति। तदेकभागश्च मुद्रितः। परन्तु न हि भासो यमकप्रियो घटकर्परः, नापि रत्नावल्यादिरूपकत्रयनिर्माता धावकः। तथाप्यपादा किंवदन्ती धावतीत्येव चित्रम्। अपरेयं विचित्रकथा— एवं भासो धावकघटकर्परापरनामेति भ्रान्तिर्निरूढा। तदनुकूलं भिन्नकालभिन्नदेशवर्तिघटकर्परकालिदासादिनवकविरत्नानि संगृह्य ग्रथिता माला ज्योतिर्विदाभरणे श्रीहर्षविक्रमाय समर्पिता निःशङ्कम् –

धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।

1. M. Krishnamachariar, p. 533, 554; Introduction to रत्नावली. T. S. Narayanasastri.
2. M. Krishnamachariar, p. 359.
3. M. Krishnamachariar, p. 554.

ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥[1]

एकत्र स्थितयोः कव्योः परस्परं मनःस्पर्धा सहजा । धनलाभाय धावककृतं रत्नावल्यादिरूपकविक्रयदोषमुद्घाट्य, कालिदासस्तं निन्दितवान् । तदा घटकर्पराख्यो धावकस्तदीयं कुमारसम्भवश्लोकमाकृष्य – "एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः"[2] इत्युक्तवता कालिदासेन, दारिद्रयदोषो गुणराशिनाशीति सत्यं न विज्ञातम्, अहो लोकज्ञानमिति दूषितवानित्थम्- "नूनं न दृष्टं कविनाऽपि तेन, दारिद्र्यदोषो गुणराशिनाशी ।" एवंविध मद्भुतमनूह्यं भासचरितं राजशेखरेण कविविमर्शे, हेमचन्द्रेण काव्यानुशासने च संग्रहेण वर्णितमिति च प्रथा लोके वितता ।[3] वस्तुतस्तु कविविमर्शग्रन्थो न क्वापि दृश्यते । तथापि तदीयत्वेन बहवः श्लोकास्तत्र तत्र व्याप्ताः । हेमचन्द्रकृतभासचरितवर्णनगद्यमेकं श्रूयते । न तु तत्काव्यानुशासनें दृश्यते । तदपि पाठकप्ररोचनार्थं तदीया इति मन्यमानाः श्लोका अत्र लिख्यन्ते । आदौ कविविमर्शश्लोकाः –

भासो रामिलसौमिलौ वररुचिः श्रीसाहसाङ्कः कविः
मेण्ठो भारविकालिदासतरलाः स्कन्दः सुबन्धुश्च यः ।
दण्डी बाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः
सिद्धा यस्य सरस्वती भगवती के तस्य सर्वे वयम् ॥[4]

---

1. M. Krishnamachariar, p. 102.
2. " 555.
3. " 554.
4. Peterson's Introduction (p. 81) to the सुभाषितावली. (1886.) This verse is also found in the शाङ्गर्धरपद्धति VIII. 17.

कारणं तु कवित्वस्य न सम्पन्नकुलीनता ।
धावकोऽपि हि यद्भासः कवीनामग्रिमोऽभवत् ॥[1]

("आदौ भासेन रचिता" इत्यादयः श्लोकाः पूर्वमुदाहृताः ।)

शोकपर्यवसानस्य नवाङ्का किरणावली ।
माकन्दस्येव कस्यात्र प्रददाति न निर्वृतिम् ॥[2]

हेमचन्द्रनिर्मितत्वेन व्याप्तमिदं गद्यम् । "सम्प्रति परां काष्ठामारूढेनाऽपि भासेन भूतपूर्वा स्वकीयदशा न विस्मृता । यतोऽनेन पूर्वचरितं घटकर्परेणोदकवहनमेव प्रतिज्ञातम् । प्रतिज्ञां चेमामसहमानाः परे कवयः परिहसितुमनसो विक्रमार्कसभायामेनं तज्जातिस्मारकघटकर्परनाम्ना व्यवजहुः । क्रमेण स एव व्यपदेशो भासमहाकवेः सुप्रसिद्धः सम्पन्नः ।"[3]

एतादृशाः कल्पिताद्भुतकथाः प्राज्ञानां न विश्वासार्हा इति स्पष्टम् । तस्माद् भासो भास एव, न धावको, न घटकर्परः, न कालिदाससहवासी, नापि रत्नावल्यादिरूपकत्रयकर्ता, न तद्विक्रेता, न हि श्रीहर्षविक्रमादित्यसभायां सभ्यः, तदद्य परिकल्पिताद्भुतकथाः विसृज्य प्रकृतं स्मरामः ।

अस्य देशकालौ

भासकवेर्जन्मस्थानं निरूपयितुमशक्यम् । एतन्निर्मितरूपकेषु तत्र तत्र केरलदेशीयाचारा वर्णिता इति कथयन्तः केचन 'अयं केरलदेशीयः इत्यामनन्ति'[4] ।

---

1. M. Krishnamachariar, p. 554
2. " "
3. " "
4. Drs. Das Gupta & S. K. De-History of Sanskrit Literature-Classical Period-Vol. I pp. 103; 107. (1947)- Calcutta.

तदनाकरमविश्वसनीयम् । एतद्रूपकान्तेषु दृष्टानि- "राजसिंहः प्रशास्तु नः, राजा भूमिं प्रशास्तु नः, गां पातु नो नरपतिः, तथा प्रभुर्नो भगवानुपेन्द्रः" इत्यादिभरतवाक्यानि पुरस्कृत्य, भासस्याश्रयो राजसिंहः क्षत्रपरुद्रसिंहो भवेदिति केचिद्भ्रान्तिमापन्नाः । अन्तिमवाक्ये श्रीकृष्णः स्मृतः । इतरेषु प्रजापालकाः स्मृताः । एतानि भरतवाक्यानि -

"स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः[1]

इत्यादिस्वस्तिवचनसदृशानि, न तु विशेषविहितानीति ज्ञातव्यम् ।

यदि राजसिंहो वा अन्यो वा स्वपोषकः कश्चन राजाऽस्ति चेत्, कृतज्ञो भासः कथं रूपकस्थापनास्वेकस्यामपि तं न स्मरेत् ? तस्मादेतद्भावनं भ्रान्तिमूलकमेवेति मन्तव्यम् । आसु निश्चित-प्रमाणलाभमयमुज्जयिनीप्रान्तवासीति स्मरणमेव शरणम् ।

"प्रथितयशसां भाससौमिल्लकविपुत्रादीनाम्"[2] इत्यादि-मालविकाग्निमित्रप्रस्तावनावचनादयं भासः कालिदासात्पूर्व इति सुष्ठु विज्ञातम् । तस्य समये विवादग्रस्तेऽपि शा. श. पूर्वं २३४ काले कालिदासोऽस्तीत्युत्तरत्र निरूप्यते ।

ततोऽयं महाकविस्तस्मात् पूर्वो गुणाढ्यात्परः सन्, शा. श. पूर्वं २०० प्रान्ते स्थित इति सम्भावनमेव समुचितम्[3]

1. M. Krishnamachariar, p. 558, 559.
2. Introduction to मालविकाग्निमित्रम्, (N. S. Press-Bombay) 9th ed. 1950.
3. ग्रन्थप्रकाशकैर्गणपतिशास्त्रिभिरयं शा. श. पूर्वं पञ्चमशताब्द्यां प्रवेशितः । कीथ, बेनर्जी, विण्टर्निट्झ् - प्रभृतिभिरयं शा. शकात्परं प्रवेशितः । Dr. A.B. Keith; Banerji; Dr. Winternitz.

भासकविप्रशंसा

कालिदासस्येव तदर्वाचीनानां महाकवीनामयं पूजास्थानमिति विदितमेव। अपि चास्य वाक्यानि कानिचित्तैस्तैः प्रमाणत्वेन स्वीकृतानि च।[1] यथा --

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः" इत्थं बालचरित[2] - चारुदत्त[3] - स्थितश्लोकार्धः सगौरवमुपयुक्तो महाकविदण्डिना काव्यादर्शे। प्रतिज्ञायौगन्धरायणीयवत्सराजोदन्तः, सालङ्कायननेतृकः कपटगजवृत्तान्तश्च संगृह्योदाहृतौ भामहेन काव्यालङ्कारे[4]।

'यो भर्तृपिण्डस्य कृते न युद्धेत्' इति प्रतिज्ञारूपकीयश्लोकपादः[5] 'शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि। काशपुष्पलवेनेदं साश्रुपातं मुखं मम'[6] इत्ययं स्वप्नवासवदत्तश्लोकः।

---

1. शिवराम - महादेव - पराञ्जपेमिश्राणां प्रतिमानाटकपीठिका द्रष्टव्या। M. Krishnamachariar, p. 557.
2. बालचरितम्. I. 15 v. (p. 515. of भासनाटकचक्रम्-2nd ed-1951) -प्रतिज्ञायौगन्धरायणण्. IV. 3 v. (p. 99)
3. चारुदत्तम्. I. 19 v. (p. 203 of भासनाटकचक्रम्-2nd ed. 1951) Poona Oriental Series - No. 54.
4. **सचेतसो वनेभस्य चर्मणा निर्मितस्य च।**
   विशेषं वेद बालोऽपि कष्टं किं नु कथं नु तत्।
   (भाम. IV. 40.)
   M. Krishnamachariar, p. 562.
5. **'नवं शरावं सलिलैःसुपूर्णं, सुसंस्कृतं दर्भकृतोत्तरीयम्। तत्तस्य माऽभून्नरकं स गच्छेद्, यो भर्तृपिण्डस्य कृते न युध्येत्॥'**
   भा.न.च. p. 99.
6. स्वप्नवासवदत्तम्. IV. 7 v. (भासनाटकचक्रम्. p. 34;2nd ed. 1951)

यासां बलिर्भवति मद्गृहदेहलीनां
हंसैश्च सारसगणैश्च विलुप्तपूर्वः ।
तास्वेव पूर्वबलिरूढयवाङ्कुरासु
बीजाञ्जलिः पतति कीटमुखावलीढः ॥[1]

इति चारुदत्तश्लोकश्च भट्टवामनेन काव्यालङ्कारसूत्रवृत्तौ[2] प्रमाणत्वेन स्वीकृताः।

'नवं शरावम्' इत्यादिप्रतिज्ञारूपकश्लोकः कौटिल्यार्थशास्त्र-दशमाधिकरणे दृश्यते । तत्रायं प्रक्षिप्त इति मन्तव्यम् ।[3]

'यासां बलिः' इत्यादिश्लोकोऽभिनवगुप्तेन नाट्यशास्त्र-व्याख्यायां चोदाहृतः ।

अनेनैव ध्वन्यालोकव्याख्यायामयं[4] स्वप्नवासवदत्तश्लोक उदाहृतः

स्वञ्चितपक्ष्मकवाटं नयनद्वारं स्वरूपताडेन ।
उद्घाट्य सा प्रविष्टा हृदयगृहं मे नृपतनूजा ॥

---

1. चारुदत्तम्. I. 2 v. (p. 196 of भासनाटकचक्रम् – 2nd ed. 1951)
2. Vamana's काव्यालङ्कारसूत्रवृत्तिः v. 3 (p. 69- N.S. Press IV ed. 1953, Bombay.)
3. M. Krishnamachariar, p. 558.
4. ध्वन्यालोकलोचनम्. III. ed. 14. (p. 344-Kashi Sanskrit Series No. 135, 1940)

तन्नाटकश्लोकोऽयमपर: परिगृहीतो रामचन्द्रगुणचन्द्राभ्यां नाट्यदर्पणे[1]–

पादाक्रान्तानि पुष्पाणि, सोष्म चेदं शिलातलम् ।
नूनं काचिदिहासीना, मां दृष्ट्वा सहसा गता ॥

तथापि नेमौ श्लोकौ मुद्रितस्वप्नवासवदत्ते दृश्येते ।

भोजराजेनैवं स्वप्नशब्दविचार: कृत: शृङ्गारप्रकाशे 'राजा' - स्वप्नायमानश्च वासवदत्तामाबभाषे । स्वप्नशब्देन चेह स्वापो वा, स्वप्नो वा स्वप्नदर्शनं वा, स्वप्नायितं वा विवक्षितम्[2] । एवं शारदातनय[3] - सर्वानन्द[4] - सागरनन्दि[5] - प्रभृतिभिर्लाक्षणिकैरतीव स्तुतं स्वप्नवासवदत्तम् । एवमेव पूर्वकविभिश्चायं प्रस्तुत:[6] ।

अनेन चतुर्विंशतिरूपकाणि निर्मितानीति महती प्रतीति: । तत्र त्रयोदश दृश्यकाव्यान्येवानन्तशयने मुद्रितानीति पाठका जानीयु: ।[7] द्विसहस्रवत्सरेभ्य: प्रागाविर्भूतानि चिरकालं विद्वत्परंपरापठितान्यपि पश्चान्नष्टानीव कुत्रचिल्लीनान्यमून्यद्य प्राज्ञलोकदृश्यान्यभवन्ननन्तशयनमहाराजभाषाभिमानादिति सन्तुष्टा वयम् । स्वप्नवासवदत्तादिभिर्विद्वच्चक्षुरुन्मीलितम् । कविहृदयं विकसितं,

---

1. नाट्यदर्पणम्. Vol I. 84 p. (G. o. Series-No. 48, Baroda, 1929)
2. M. Krishnamachariar, P. 560.
3. भावप्रकाशनम् (Gaekwad Oriental Series-45. Baroda-1929.)
4. टीकासर्वस्वम् on अमरकोश: - T. S. Series (1914-17)
5. Edited by M. Dillon (Oxford University Press-1933
6. M. Krishnamachariar, p. 560–61.
7. ,, p. 566.

गीर्वाणवाणीवदनमतीव विलसितम् । "भासः कविताकामिनीहासः[1]" इति यदुक्तं जयदेवेन[2] तत्सत्यम् ।

अस्य विद्वत्वकवित्वे

वेदवेत्ता कर्मनिष्ठश्चायमार्यशेखरः । भाषायां कवितायाञ्च स्वतन्त्रः धर्मार्थयोगादिशास्त्रज्ञानसम्पन्नः, लोकज्ञानमूर्तिः, प्रतिभाशाली, रूपकौचित्यमार्गदर्शी, महाकविः, सहृदयहृदयाह्लादकारिदृश्यकाव्यधर्मोपदेष्टा, महालाक्षणिकश्च ।

प्रख्यातवृत्तं प्रसिद्धपात्रस्वभावञ्च प्रकारान्तरेण प्रवर्तयितुं निःशङ्कोऽयं निरङ्कुश इति पञ्चरात्रं प्रथयति । अपूर्वमनोरञ्जनकथासंविधाने अस्य प्रतिभा अप्रतिमेति 'प्रतिमा' प्रकटयति । बृहत्कथासंगृहीतवृत्तमप्युत्पाद्यमिव अविमारकमाविभाति नवनवोन्मेषरसम् । मिश्रवृत्तेष्वस्य प्रज्ञां पज्ञापयति 'प्रतिज्ञा' । स्वप्ने जागर्ति, स्वपिति, पश्यति चान्तरेण चक्षुषाऽयं कविब्रह्मेति सर्वाङ्गसौष्ठवं स्वप्नवासवदत्तं समाकलयति । चारुतरं 'चारुदत्तं' सर्वथा मृच्छकटिकस्य मूलम् । मध्यमो नाम्ना मध्यमोऽपि गुणैरुत्तमः । 'दूतवाक्यं' नीतिवाक्यम् । 'दूतघटोत्कचं' वीरोचितं श्रीकृष्णस्यापरं दौत्यम् । 'कर्णभारः' तत्पात्रसौशील्यपूरः । 'अभिषेकः' कविताकनकाभिषेकः । 'ऊरुभङ्गः' प्रशान्तपापसङ्गः । 'बालचरितं' श्रीहरिलीलाहसितम् । ब्राह्मणभक्तिः प्रभुमन्त्रोत्साहशक्तयश्चाभिवर्णिताः सर्वत्र यथासन्दर्भम् । वेदशास्त्राणि प्रमाणीकृतानि यथा-

---

1. M. Krishnamachariar, p. 552.

2. प्रसन्नराघवम्–I. 22 v (p. 10)

'यस्याश्चोरश्चिकुरनिकरो, कर्णपूरो मयूरो,
भासो हासः, कविकुलगुरुः कालिदासो विलासः'.

(Prof. N. S. Panse's ed. Poona-1894)

कथोचितम् । विविधशीलानि चित्रितानि पात्रोचितानि । के वयं भासकवितापरामर्शे ? वस्तुपात्ररसपोषणे कृतहस्तः तत्रापि लक्षणस्यापि लक्षणं स्वप्नवासवदत्तमद्वितीयम् । कंसवधं दुर्योधनपतनं च, रङ्गस्थले प्रदर्शयताऽनेन नाट्यशास्त्रमप्युल्लङ्घितम् ।

लोकोत्तरकविरिति विख्यातेन कालिदासेनापि गौरवबुद्ध्या भासरचनमनुकृतं यत्किञ्चिदेवम् — "सर्वशोभनीयं सुरूपं नाम" इति प्रतिमावचनभावम् —

'किमिव हि मधुराणां मण्डनं नाकृतीनाम्'

इत्यर्थान्तरन्यासेनाऽलञ्चकार कालिदासः शाकुन्तले ।

अपि च स 'बालचरितीय' – देवकीवर्णनमनुकृतवान् शाकुन्तले —

"हृदयेनेह तत्राङ्गैर्द्विधाभूतेव गच्छति ।
यथा नभसि तोये च चन्द्रलेखा द्विधाकृता" [1]

"गच्छति पुरः शरीरं, धावति पश्चादसंस्थितं चेतः ।
चीनांशुकमिव केतोः, प्रतिवातं नीयमानस्य" [2]

किञ्चाभिषेकीयवर्णनं चानुश्रुतं शाकुन्तले–

"यस्यां न प्रियमण्डनापि महिषी देवस्य मण्डोदरी
स्नेहाल्लुम्पति पल्लवान्न च पुनर्वीजन्ति यस्यां भयात्" [3]
"नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्" [4]

---

1. बालचरितम् I 13 v (p. 515-भास. ना. च. 2nd ed. 1951)
2. शाकुन्तलम् I. 30 v. (p. 53. Nirnayasagar Press-Bombay 11th. ed. 1947)
3. अभिषेकनाटकम्, III. 1 v. (p. 338. of भास ना. च.)
4. शाकुन्तलम्. IV. 8. v. (p. 134. N. S. Press 11th, ed. 1947)

दशरथादिप्रतिमाकल्पनमुत्तररामचरिते चित्रप्रदर्शनकल्पने[1] भवभूतिनाऽनुकृतम् ।

शूद्रकेण मृच्छकटिके चारुदत्तश्लोका एव– "यासां बलिर्भवति,[2]" "मार्जारः प्लवने,"[3] "विषादत्रस्तसर्वाङ्गि"[4] इत्यादय ईषद्भेदेन संगृहिता इति विदितं खलु ! किम्बहुना दृश्यकाव्यसाम्राज्ये प्रथमं मूर्धाभिषिक्तोऽयं सर्वतन्त्रस्वतन्त्रः । रूपकारम्भे नटीसूत्रधारसम्भाषणरूपमामुखमनेन विहितम् । अनन्तरकविभिः 'प्रस्तावना' इति नाम्ना व्यवहृतम् । अनेन तु 'स्थापना' इत्युक्तम्[5] । साऽप्येतद्रूपकेषु 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' इत्यारभ्य, त्रिचतुरैर्वाक्यैः समाप्तिं गच्छति ।

अयमस्य रूपकारम्भचातुर्यविशेषः । सोऽयं विद्वद्वरिष्ठो वेदवेदान्तपारगः, परमात्मैकत्वविज्ञाता च । ईश्वरोपासने च तत्काले शिवकेशवभेदो नास्ति । तथापि, भासो विष्णुभक्त इति वक्तुमवकाशो दृश्यते । नान्दी भरतवाक्येषु केषुचिदिमानि वाक्यानि । तथा मध्यमव्यायोगे नान्दी –

पायात्स वोऽसुरवधूहृदयावसादः,
पादो हरेः कुवलयामलखण्डनीलः ।

---

1. उत्तररामचरितम्. I. pp. 17-37. N. S P. 10th ed. (1949)
2. चारुदत्तम्. 1. 2. v. (p. 196. of भास. ना. च. 1951) मृच्छकटिकम्, I. 9. v. (N. S. P.) 8th ed-1950.
3. चारुदत्तम्. III. 11 v. (p. 228); मृच्छकटिकम् III. 20.
4. चारुदत्तम्. IV. 3 v. (p. 241)-मृच्छकटिकम्. IV. 8.
5. M. Krishnamachariar, p. 556.

यः प्रोद्यतस्त्रिभुवनैकमणे रराज
वैडूर्यसङ्क्रम इवाम्बरसागरस्य ॥[1]

मध्यमव्यायोगादिभरतवाक्येषु 'तथा प्रभुर्नो भगवानुपेन्द्रः' परामृष्टेषु तत्रत्याः 'राजसिंहः, राजा, नरपतिः' इत्यादिप्रयोगा अपि श्रीविष्णुप्रभुपरा एव भवेयुरिति भावः समुदेति । 'प्रतिमा' भरतवाक्यञ्च तं पुष्णाति मनागेवम्–

यथा रामश्च जानक्या बन्धुभिश्च समागतः ।
तथा लक्ष्म्या समायुक्तो राजा भूमिं प्रशास्तु नः ॥[2]

अत्र लक्ष्मीशब्दो न राज्यलक्ष्मीपरः, 'राज्यश्रीसहित एव राजा' इति प्रसिद्धत्वात् । लक्ष्म्या, श्रिया, रुक्मिण्या इत्यर्थ एवात्र वक्तव्यः । तथा च 'श्रीविष्णुरथवा श्रीकृष्णः प्रशास्तु' इत्यर्थः सम्यगन्वेति । पण्डितैरालोच्यतामयं भाव इति विज्ञापना । अथ भासकवेरुदात्तभावानां कानिचिदुदाहरणानि –

नीतिबोधका इमे श्लोकाः –

गुणानां वा विशालानां, सत्काराणां च नित्यशः ।
कर्तारः सुलभा लोके, विज्ञातारस्तु दुर्लभाः ॥[3]

---

1. Nandi in मध्यम-व्यायोग: p. 421. (भा-स-ना-च. 2nd ed-1951)
2. प्रतिमानाटकम्-VIII. 15 v. (p. 317. भास-ना-च P.O. Series 2nn ed-1951)
3. स्वप्नवासवदत्तम्-IV. 9 v. (p 34-भास-ना-च. 2nd ed. 1951)

काष्टादग्निर्जायते मथ्यमानाद् भूमिस्तोयं खन्यमाना ददाति ।
सोत्साहानां नास्त्यसाध्यं नराणां मार्गारब्धाः सर्वयत्नाः
फलन्ति ॥[1]

यत्ने कृते, यदि न सिध्यति, कोऽत्र दोषः ।
को वा न सिध्यति ममेति करोति कार्यम् ॥
यत्नैः शुभैः पुरुषता भवतीह नृणां ।
दैवं विधानमनुगच्छति कार्यसिद्धिः ॥[2]

श्लोकस्यास्य प्रथमं पादं गृहीत्वा, केनापि रचितोऽयं नीति-श्लोकः प्रचलति लोके –

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवं हि दैवमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते, यदि न सिध्यति कोऽत्र दोषः ॥[3]

सूक्तिमुक्तावल्यादिचाटुपद्यसङ्कलनग्रन्थेषु भासप्रणीता इव केचन श्लोका दृश्यन्ते । तत्रैकः श्लोकः – (नाऽयं भासकृत इति मन्ये)

प्रत्यासन्नविवाहमण्डलविधौ देवार्चनव्यग्रया
दृष्ट्वाग्रे परिणेतुरेव लिखितां गङ्गाधरस्याकृतिम् ।
उन्मादस्मितरोषलज्जितधिया गौर्या कथञ्चिच्चिराद्
वृद्धस्त्रीवचनात्प्रिये विनिहितः पुष्पाञ्जलिः पातु वः ॥[4]

1. प्रतिज्ञायौगन्धरायणम्. I. 18. v (p. 72- भा-ना-च. 1951)
2. अविमारकम्. III. 12. v (p. 141–भास–ना–च. 1951)
3. पञ्चतन्त्रम्. I. 392 v. (p. 108-N.S.P.) 9th ed. 1950)
4. सूक्तिमुक्तावली. p, 22. v. (37)

(१३) महाकविः कालिदासः

कालिदासगिरां सारं कालिदासः सरस्वती ।
चतुर्मुखोऽथवा साक्षाद्विदुर्नान्ये तु मादृशाः ।।

आचन्द्रतारार्कजीवी सकलभूमण्डलान्तवर्ती महानयं कवि-ब्रह्मा । अस्य जीविततत्त्वान्वेषणे बहवो विद्वांसः प्रवृत्ताः । तत्तन्निर्णयास्तु गणनातीताः । ते सर्वे मुद्रिताः प्रचलन्ति लोके । तत्क्रोडीकरणमनावश्यकम् । अस्य देशः कालश्च नाद्यापि निरूढः । इत ऊर्ध्वं निश्चीयत इति को वक्ष्यति ? परतत्त्वमिव कालिदास, तत्त्वमगम्यमगोचरम् । अखिलजगदावासस्य त्रिकालवर्तिनः काव्यात्मनः कालविवक्षा, देशविवक्षा च कीदृशी ? तथापीदं कविजीवितं खलु !

भासकालादप्यस्य कालः समधिकं संशयमापन्नः । विंशति-शताब्दीषु प्रतिशताब्दं समुत्पन्न इवायं दृश्यते विविधविमर्शकमतेषु । कस्य निर्णयो ग्राह्यः ? सर्वेऽपि कालिदासकवितत्त्वजिज्ञासव एव । मया चेतःपूर्वं संस्कृतवाङ्मयद्वितीयसम्पुटे कालिदासः शा. श. पूर्वं (१३४) चतुस्त्रिंशदधिकशततमवर्षप्रान्ते समासीदिति बहुविमर्श-काभिप्रायानुरोधेन निर्णीतम् । अद्यापि मदभिप्रायः स एव । अत्र हेतवः केचित् –

उज्जयिनीपालको हर्षविक्रमादित्यः क्रि. श ५४४ समये म्लेच्छान् जित्वा स्वनाम्ना विक्रमशकं (संवत्) स्थापितवानिति फर्ग्यूसन्कल्पित[1] करूरुसिद्धान्तः प्रतिहतो जयभटशासनेन मन्दसार-शासनेन च[2] । मालवशकस्तत्पूर्वमेवास्तीत्यत्र प्रमाणं मन्दसार-शासनवचनमिदम् –

1. M. Krishnamachariar, p. 107.
2. ,, p. 90

**'मालवानां गणस्थित्या याते शतचतुष्टये ।
त्रिनवत्यधिकेऽब्दानामृतौ सेव्यघनस्वने ।।'[1]**

मालवशककर्तुविक्रमार्कस्य सभायां क्रि॰ पूर्व ५६ वर्षे कालिदासो मेधाविरुद्रापराख्यया प्रावर्ततेत्युक्तिर्न विश्वसनीया, न विमर्शक्षमा च । ज्योतिर्विदाभरणं कालिदासकर्तृकमिति प्रवादस्तु प्रमादिकः[2] । श्रीहर्षविक्रमादित्यकालसूचनं (क्रि॰ पू. ५६) विना, कालिदासादिकविसम्बन्धिवचनानि न तत्र विश्वासपात्राणि । केनाप्यर्वाचीनेन, स्वकृतं ज्योतिर्विदाभरणं कालिदासनाम्ना लोकविख्यातं भवत्वित्यद्भुतकल्पनेन तत्तच्छ्लोका रचिता इति विश्वसनीयमेव सुस्पष्टम्[3] ।

'नवाधिकपञ्चशतसंख्यशाके वराहमिहिरो दिवं गतः'

---

1. M. Krishnamacharlar, p. 93.
2. ,, p. 102.
3. यो रूमदेशाधिपतिं शकेश्वरं जित्वा गृहीत्वोज्जयिनीं महाहवे ।
आनीय सम्भ्राम्य मुमोच तं त्वहो श्रीविक्रमार्कः समसह्यविक्रमः ।।
शङ्क्वादिपण्डितकराः कवयस्त्वनेके ज्योतिर्विदः सममवंश्च वराहपूर्वाः ।
श्रीविक्रमार्कनृपसंसदि मान्यबुद्धिस्तैरप्यहं नृपसखः किल कालिदासः।।
काव्यत्रयं सुमतिकृद्रघुवंशपूर्वं पूर्वं ततः स्मृतिहितं श्रुतिकर्मवादम् ।
ज्योतिर्विदाभरणकालविधानशास्त्रं श्रीकालिदासकवितो हि ततो बभूव ।।
वर्षैः सिन्धुरदर्शनाम्बरगुणैः (३०६८) याते कलौ सम्मिते ।
मासे माधवसंज्ञके च विहितो ग्रन्थक्रियोपक्रमः ।।
क्रिस्तुपूर्वं ३४ शा. शकपूर्वं ११२ धन्वन्तरिक्षपणकामरेत्यादिश्लोकश्च ज्योतिर्विशेषाध्याये ।

इत्युक्तब्रह्मगुप्तव्याख्यावचनद्रष्टा चरित्रज्ञो न कोऽपि विश्वसेद्वराहमिहिरकालिदासौ समकालिकाविति ।

क्रि· श· ६३४ वर्षे द्वितीयपुलकेशिना स्थापिते ऐहोल्शासने स्थितमेकं श्लोकं प्रमाणीकृत्य केनापि सम्बन्धं कल्पयित्वा कालिदासस्तात्कालिको भवेदित्युक्तिर्न समीचीना, न विश्वास्येत्याधुनिकगवेषणनिपुणैर्निराकृतेति विदितमेव[1]। श्रीहर्षविक्रमादित्येन काश्मीरपालेन नियुक्तो मातृगुप्त एव कालिदासः । स राजा क्रीस्तुपूर्वषष्ठशताब्दीमध्यवर्तीत्येको वादः, स तु क्रीस्तुपूर्वषष्ठशताब्दीवर्तीत्यन्यो वादः । समुद्रगुप्तसमकालः कालिदास इत्यादयोऽनेके वादाश्च । ते सर्वे प्रामादिका इति मन्तव्यम् । मातृगुप्तो न कालिदासः । भोजराजास्थानकविः शाकुन्तलादिकर्ता कालिदास इत्यादिवादा निःसारा इति स्पष्टम् । अथैका किंवदन्ती परिहर्तव्या, या तु कैश्चिद्विमर्शकैः प्रमाणीकृता[2] ।

"स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ।"

---

1. **येनाऽयोजि नवेश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म ।**
   स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः॥
   Aihole Insc.

2. Bhau Daji's Literary Remains ; Apte's Date of Kalidasa ; R. C· Datt ; T. S. Narayanasastri's introduction to मध्यमव्यायोग ; मॅक्स्मूल्लरप्रभृतिभिः ; गणपतिशास्त्रिभिः प्रतिमानाटकोपोद्घाते दिङ्नाग इति कोप्याचार्यः कालिदासप्रबन्धानन्यत्रोक्तोऽयमर्थ इति स्थूलहस्ताभिनयैर्दूषयतीति दक्षिणावर्तोक्तिः उदाहृता ।

इति मेघसन्देशश्लोकस्योत्तरार्धम् । अस्मिन् दृष्टो निचुलः कालिदासस्य मित्रमिति, दिङ्नागोऽस्य शत्रुरिति प्रथा कदाचित् पाठकलोकेऽजायत । सा व्याख्यात्रा दक्षिणावर्तेन प्रथमं विश्वस्ता । तमनुसृत्य मल्लिनाथोऽपीमां किंवदन्तीं विश्वस्य अत्रेदमर्थान्तरं ध्वनयतीत्युक्त्वा, रसिको निचुलो नाम महाकविः कालिदासस्य सहाध्यायः परापादितानां कालिदासप्रबन्धदूषणानां परिहर्ता दिङ्नागानामिति पूजायां बहुवचनम् । दिङ्नागाचार्यस्य कालिदासप्रतिपक्षस्य हस्तावलेपान् हस्तविन्यासपूर्वकाणि दूषणानि परिहरन् इत्युक्तवान् । इमानि वाक्यानि पुरस्कृत्यार्यासङ्गवसुबन्धुशिष्यश्च दिङ्नागस्य कालिदासः समकालः क्रि· षष्ठशताब्द्यामासीदिति कश्चिद्विमर्शाभिप्रायविशेषः सञ्जातः । अत्रायं विचारः—

मेघसन्देशव्याख्यात्रा प्राचीनेन वल्लभदेवेनायं ध्वन्यर्थो न लिखितः । कालिदासनामानस्त्रिचतुराः सन्ति[1] । कस्य कालिदासस्यायं दिङ्नागः प्रतिपक्ष इति निर्णयस्तु न क्वापि । वसुबन्धुनिर्मितग्रन्थाः चैनभाषायामनुवर्तिताः क्रि· ४०४ वत्सर इत्येकं मतम् । आर्यासङ्गवसुबन्ध्वोरन्तिके दिङ्नागः प्रमाणादिशास्त्राण्यधीतवान् क्रि· ५४१ वर्ष इति भगवद्बुद्धजीविते तिबेट्देशीयरत्नराजेन लिखितमित्येकं मतम् । वसुबन्धुः क्रि· ४५० समये स्थित इत्येकं मतम् । बुद्धनिर्वाणानन्तरं ९०० परिमितकाले वसुबन्धुस्तत्सोदरोऽसङ्गश्च स्त इति चैनप्रवादः । गौतमबुद्धनिर्वाणकालः क्रि· पूर्वमित्यत्रानेकानि मतानि सन्ति[2] । कथमत्र निर्णयः? एतां किंवदन्तीमाश्रित्य कालिदासस्य दिङ्नागः शत्रुरित्यङ्गीकार्यं चेत्तर्हि रघुवंशादिकर्ता स न भवति । किन्तु गणककालिदासो भवतीति

1· M· Krishnamachariar, p· 112

2. ,, ,, pp. 107-109.

वक्तव्यम् । शत्रुपराभवाख्यग्रन्थकर्ता सोऽयं गणकचक्रवर्ती[1], तेन मतप्रामाण्यवादे दिङ्नागः पराजितः स्याच्चेत्, स्यात् । न ह्यसम्भाव्यमेतत् ।

अश्वघोषस्य बुद्धचरितं दृष्ट्वा, महाकविरयं कालिदासो रघुवंशादिषु पुरन्ध्रीवर्णनादिकं कृतवानिति केचित् तत्परिहासपात्रम् । कविताप्रपञ्चे कालिदासं तुलयितुमश्वघोषो नालम् । तदेवोक्तं सत्कवितापरिपाकज्ञेन भट्टपादेन—

कवयः कालिदासाद्याः, कवयो वयमप्यमी ।
पर्वते परमाणौ च पदार्थत्वं व्यवस्थितम् ॥[2]

महाकविरिति पूज्यभावेन कृतं क्वाचित्कं भासकवितानुकरणं मनसि निधाय, कालिदासस्य समन्ततः परकवितानुकरणारोपणं नोचितम् । नह्यश्वघोषात्परः कालिदासः । स्वविषयं तत्कालप्रभुविषयं चास्मरताऽनेन मालविकाग्निमित्रभरतवाक्ये अग्निमित्रनाम गृहीतमित्थम् ।

आशास्यभीतिविगमप्रभृति प्रजानां ।
सम्पत्स्यते न खलु गोप्तरि नाऽग्निमित्रे ॥'

एतेनाऽग्निमित्रसमकालः कालिदास इति केचन वदन्ति[3] । एतन्नाटकव्याख्याता काटयवेमभूपालोऽपि "सर्वनाटकप्रयोगान्ते

---

1. **नत्वा सुरासुरशिरोमणिरत्नरश्मि-**
चित्रीकृताङ्घ्रियुगलं हरिमादिदेवम् ।
श्रीकालिदासगणकः स्वरशास्त्रसारं
वक्ष्याम्यहं प्रबलशत्रुपराभवाख्यम् ॥

2. शा. प. 175.

3. M. Krishnamachariar, p. 111.

भरतेन सर्वकालसाधारणे, आशीर्वचने कर्तव्ये सति, अत्र प्रजानामाशास्यासिद्धि प्रति गोप्तुरग्निमित्रस्य कथनं तत्कालराजोपलक्षणमिति वक्तव्यमित्युक्तवान्" । अग्निमित्रकालनिर्णयविषयेऽपि मतभेदाः सन्तु नाम । क्रिस्तपूर्वप्रथमशताब्द्यां स राजा आसीदिति विश्वासः प्रबल आसीत् ।

अस्य वायुपुराणवचनमप्येवं सहायो भवति – (उत्तर, ३७)

पुष्यमित्रस्तु सेनानीरुद्धृत्य वै जयद्रथम् ।
कारयिष्यति वै राज्यं समाः षष्टिं सदैव तु ॥'

सङ्गराज्यस्थापकस्य पुष्य(ष्प) मित्रस्य पुत्रोऽयमग्निमित्रः पितुः प्रतिनिधिर्भूत्वा, दशार्णराजधान्यां विदिशापुर्यामुवासेति देशचरित्रं च कथयति[1] । ततोऽपि किञ्चित्पूर्वोप्युज्जयिनीपालकस्य श्रीहर्षविक्रमादित्यस्य सभायां कालिदास आसीदिति प्रतीतिः दिगन्तव्याप्ता । एतन्निर्णायकप्रत्यक्षप्रमाणानि न सन्ति । तथापि नेयं प्रच्यवते लोकविश्वासात् । शकजेता अयं राजा स्वनाम्ना विक्रम-(संवत्–मालव) शकं स्थापितवानिति मेरुतुरङ्गाचार्यपाठावलिः कथयति[2] । तच्छकारम्भः क्रि. पू ५६ (५७) षट्पञ्चाशो वत्सर इति प्रसिद्धम् । अयमेव शकारातिरिति विनिश्चेतुं शक्यः । न तु तत्प्राचीनो विक्रमादित्यः । अन्धयुधिष्ठिरे राज्यभ्रष्टे सति तदमात्यैर्यस्योज्जयिनीपालकस्य विक्रमादित्यस्य ज्ञातिः प्रतापादित्यः काश्मीरपालनार्थमानीतः स इति स्मर्तव्यम् । अयमंशः प्रकृतः

1. M. Krishnamachariar, p. 105.
2. भाऊदाजीरचितः 'कालिदासकालनिर्णयः'

स्पष्टीकृतः कल्हणेन राजतरङ्गिण्याम्[1] । तस्मादस्मत्कालिदासः शा. श. पूर्वं (१३४प्रान्ते) द्वितीयाब्दशतके स्थित इति विश्वास एव वरमिति मन्ये । तच्च भासात्परोऽश्वघोषात्पूर्वं इति मन्मतम् ।

कालिदासकवितोत्पत्तिकथा

भास इवायमपि कल्पिताद्भुतकथाश्रयः । पाठकप्ररोचनार्थं तत्रैका निवेद्यते । नेयं विश्वासक्षमा । "कस्यचिद्राज्ञः सभायां केचन विद्वांस आसन् । तद्राजकन्या निबिडनितम्बा, समधीतशास्त्रा सती पण्डितान् शास्त्रवादेऽजयत् त्रिवारम् । तेनाऽसूयाग्रस्तास्ते 'इयं मूढेन वरेण संयोज्या' इति आलुलोचन् । एकदा भूपतिना ते वरान्वेषनार्थं नियुक्ताः । ओमित्युक्त्वा ते गत्वा परममूढमेकं युवानमानीय, सोऽयं महाकुलीनो, राजपुत्रः, शूरो, विद्याविशारद इत्यूचुः । राजा तस्मै प्रादात्कन्यां निबिडनितम्बाम् । स्वसङ्कल्प-सिद्धेः पण्डिताश्चैवमानन्दपरवशा अभवन् ।

उष्ट्रे लुम्पति रं वा षं वा, तस्मै दत्ता निबिडनितम्बा ।
किं न करोति स एव हि रुष्टः, किं न करोति स एव हि तुष्टः ॥

रात्रावन्तःपुरे दम्पत्योः सम्भाषणे तस्य विद्याविहीनता तया विदिता । राजकुमारी विद्वत्कृतवञ्चनां विचिन्त्य धैर्यमव-लम्ब्य प्रत्यपकारचिन्तामुत्सृज्य, कालिकेश्वरीमाराध्य, विद्यामर्जयेति

---

1. अथ (अन्ययुधिष्ठिरानन्तरं) प्रतापादित्याख्यस्तैरानीय दिगन्तरात् ।
विक्रमादित्यभूभर्तुर्ज्ञातिरत्राभ्यषिच्यत ॥
शकारिर्विक्रमादित्य इति सम्भ्रममाश्रितैः ।
अन्यैरत्रान्यथाऽलेखि विसंवादि कदर्थितम् ॥ २. ६

तमुवाच । तथेति सोऽपि कालिकालयं गत्वा, तदाराधनदीक्षितोऽभूत् आवत्सरसमाप्ति । ततो देवी प्रसन्ना सकलविद्याज्ञानेन सत्कविताशक्त्या च तमनुजग्राह । तदनुपदमेव स कालिकास्तवं कृत्वा, तत्रत्यैः कालिदास इति विनुतः । तेनायं कालिदाससंज्ञकोऽभवत् ।

अनन्तरं सोऽयमन्तःपुरमागत्य स्वोदन्तं भार्यायै निवेदितवान् तदा "अस्ति कश्चिद्वाग्विशेष" इति सा पप्रच्छ । तस्य वचनेन सन्तुष्टा राजतनया भवद्विद्याविज्ञानं प्रकटयेति पुनरुवाच ततोऽयं कालिदासो 'अस्ति' शब्दमुपयुज्य 'अस्त्युत्तरस्यामित्यारभ्य' कुमारसम्भवम्, 'कश्चित्पदमुपयुज्य' 'कश्चित्कान्तेत्यारभ्य' मेघसन्देशम्, वाक्शब्दमुपयुज्य, 'वागर्थावित्यारभ्य' रघुवंशम् 'विशेषमुपयुज्य' 'विशेषसूर्य इत्यारभ्य' ऋतुसंहारं च प्रणीय, राजसभायां तानि काव्यानि श्रावयित्वा, सन्तुष्टैः सभ्यैः संस्तुतः, सत्कृतश्च । पश्चादन्तःपुरं प्रविश्य कलत्रेण सम्मानितस्तदनुरागपात्रमभूदिति ।

तद्देशजातिमतानि

तत्तद्विमर्शकाभिप्रायेष्वयं वङ्गीयः, काश्मीरीयो गुर्जरीय उज्जयिनीनिवासी चासीत् । एषु तर्केषु न कस्यचित् प्रत्यक्षसाक्ष्यसम्पर्कः । तथाप्येतत्कृतान्युज्जयिनीशिप्रामहाकालादिविशेषवर्णनान्ययं तत्प्रान्तवासी भवेदिति मन्दं सूचयन्ति । अवन्तिसुन्दरीकथायां सन्दृष्टम्—

"लिप्ता मधुद्रवेणासन् यस्य निर्विवशा गिरः ।
तेनेदं वर्त्म वैदर्भं कालिदासेन शोधितम् ॥"1

इति श्लोकमाधारीकृत्य, मजुमदारपण्डितेनायं विदर्भज इत्युक्तम् । हरप्रसादशास्त्रिमिश्रेणायं मालवदेशीयदशपुरवासीति

---

1. M. Krishnamachariar, p. 99.

कथितम् ।1 एवं मतभेदेषु सत्स्वप्युज्जयिनीप्रान्तवासीति मतमेव बहुसम्मतं भवति ।

कालिदासात्पूर्वमेव ब्राह्मणजातौ गौडद्राविडभेदः समुत्पन्नः । विन्ध्यदक्षिणवासिनो द्राविडाः । तदुत्तरदेशवासिनो गौडास्तस्मादयं गौडब्राह्मण इत्यत्र न कोऽपि संशयः । कालिदासोऽधीतवेदवेदान्त इति तद्वचनेषु दृष्टानि तत्तद्वचनान्येव कथयन्ति । स्वभावेनायं शिवभक्तोऽपि मतेनाद्वैत एव । "या सृष्टिः स्रष्टुराद्या, वागर्थाविव सम्पृक्तौ" इत्यादिश्लोकेषु शिवपर्यायशब्दाः प्रयुक्ता अपि, तदर्थ-स्त्वद्वितीयपरमात्मबोधक एवेति स्पष्टम् । सोऽयमेकेश्वरोपासक-स्तदपि जीवेश्वराभेदवादीत्यत्र विक्रमोर्वशीयनान्दीश्लोको "वेदान्तेषु यमाहुरेकपुरुषम् इत्यादिक एव परमं प्रमाणम् । सकलजगदाकारः, सर्वान्तर्यामी, परमेश्वर इत्यनेनाचरितस्तवानामभिप्रायः स्पष्टः । कुमारसम्भवद्वितीयसर्गस्था शिवस्तुतिरपि तमेव पोषयति । यथा––

"नमस्त्रिमूर्तये तुभ्यं प्राक् सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ।।
जगद्योनिरयोनिस्त्वं जगदीशो निरीश्वरः ।
जगदादिरनादिस्त्वं जगदन्तो निरन्तकः ।।
आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ।।
त्वामामनन्ति प्रकृतिं पुरुषार्थप्रदायिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ।।
योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्तिनम् ।
अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः ।।"2

1. M. Krishnamachariar, p. 99.
2. कुमारसम्भवम्. II. 4, 9, 10, 13, VI. 77.

कालिदासप्रशंसा

वेदशास्त्रवेत्ता, लोकज्ञः कवितासाम्राज्यधुरन्धरोऽयं महाकविर्बहुभिर्बहुधा कीर्तितः स्वानुभवपूर्वकमेवम् । तत्र गोवर्द्धनाचार्यकृता स्तुतिः —

"साकूतमधुरकोमलविलासिनीकण्ठकूजितप्राये ।
शिक्षासमयेऽपि मुदे रतलीलाकालिदासोक्ती ॥1

केनचिद्रसिकेन भोजनप्रियेण कृता –

"कालिदासकविता नवं वयो, माहिषं दधि सशर्करं पयः ।
ऐणमांसमबला च कोमला, सम्भवन्तु मम जन्मजन्मनि ॥2

एकेन यथार्थवादिना कृता –

"पुरा कवीनां गणनाप्रसङ्गे, कनिष्ठिकाधिष्ठितकालिदासा।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थकनामधेया ॥"3

केनचित्पूर्वालङ्कारिकेण कृता –

"तस्मादालोचिताशेषलोकशास्त्रेण धीमता ।
कर्तव्यं कालिदासस्य काव्यानां परिशीलनम् ॥"4

---

1. आर्यासप्तशती. v. 35.
2. Kavibhatta'sपद्यसंग्रहः, सुभाषितरत्नभाण्डागारम्-p. 384, 290 v. (8th ed. 1952)
3. Appayadikshita's–कुवलयानन्दः. p. 179 (Nirnayasagar Press 10th ed. 1955)

राजशेखरकृतैव सूक्तिमुक्तावल्याम् –

"एकोऽपि जीयते हन्त कालिदासो न केनचित् ।
शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ।।"1

अत्र कालिदासत्रयीशब्दस्य रघुवंश–मेघसन्देश–कुमारसम्भवत्रयीति, अपि च शाकुन्तल–विक्रमोर्वशीय-मालविकाग्निमित्रत्रयीति चार्थो वक्तव्यः । न तु कालिदासनाम्नां कवीनां त्रयीति मुख्योऽर्थः । सोऽयं प्रयोगः काव्यत्रये निरूढः श्लोकेऽस्मिन् चमत्कृतः ।

कालिदासस्य काव्यानि

एतन्निर्मितं रघुवंशादिकाव्यत्रयं शाकुन्तलादिनाटकत्रयं च प्रसिद्धम् । ऋतुसंहारश्चाप्यनेन रचित इति प्रसिद्धः । अन्यानि श्रुतबोध–शृङ्गारतिलक–कुन्तेश्वरदौत्य–पुष्पबाणविलासादीन्यस्मिन्नारोपितानि । सेतुबन्धनाम्नः प्राक् तत्प्रबन्धस्य कर्ता कालिदास इति किंवदन्ती तस्य व्याख्याता रामदासो नाम सामन्तराजोऽकबरचक्रवर्तिसमकाल एवमुक्तवान्2 । सव्याख्योऽयं मुद्रितः ।

"धीराणां काव्यचर्चाचतुरिमविधये विक्रमादित्यवाचा ।
यं चक्रे कालिदासः कविकुमुदविधुः सेतुनामप्रबन्धम् ।।"

काश्मीरराजेन प्रवरसेनेन प्रार्थितः कालिदासः सेतुकाव्यं चकारेति नैके विश्वसन्ति । मातृगुप्तकालिदासौ भिन्नकालवर्तिना-

1. Jalhana's सूक्तिमुक्तावली, p. 44, 60 v. (G. O. Series, 82, 1938)-Baroda.
2. M. Krishnamachariar, p. 112.
3. Discussion If there were three Kalidasa's M. Krishnamachariar, pp. 112,113 Rajasekhara 592. M. Krishnamachariar, p. 592.

विति च बहवः स्मरन्ति । तेन सेतुबन्धकर्ता कालिदासोऽस्मात्कालिदासादन्यो भवेत् । अथवा प्रसिद्धकालिदासनाम तस्मिन् काव्ये प्रक्षिप्तं वा स्यात् । नान्या गतिरस्याः किंवदन्त्याः । अथ काव्यौचित्यं यत्किञ्चित्–

रघुवंशः :—

गते द्विसहस्रवत्सरमिते काले रामायणकथामवलम्ब्य समुद्भूतानि काव्यानि द्विसहस्रमितानि सन्तीति नातिशयोक्तिः। तथाप्येतत्काव्यं तुलयितुं नैकमपि क्षमम् । अभ्यस्तसंस्कृताक्षरस्य प्रथमं वाग्भूषणं रघुवंशः किल । चत्वारिंशदधिकैर्व्याख्यातृभिः प्रशंसितेऽस्मिन्नेकोनविंशतिसर्गेष्वेकोनत्रिंशद्रघुवंशपुरुषा वर्णिताः, दिलीपादग्निवर्णान्ताः । तेषु रघोर्दिग्विजययात्रावर्णनमपूर्वं प्राचीनभरतखण्डमक्ष्णोः प्रदर्शयति ।

उपमा कालिदासस्येति विद्वद्भिः कीर्तितोऽयमाद्यकवि–कवितायामादरातिशयेन सीताविवाहसन्दर्भस्थितां "पतिव्रतामहा–भागा छायेवानुगता सदा" ।1 इत्युपमां संगृह्य, नन्दिनीधेनुमनु–सरति दिलीपे ।

"जलाभिलाषी जलमादधानां, छायेव तां भूपतिरन्वगच्छत्"2

इति प्रयुक्तवान् । लौकिक्युपमायामिष्टो लिङ्गभेदः प्रायेणेति वामनमतमनुसृत्य, व्याख्याता चारित्रवर्धन इदमुपमानमत्यन्तं समुचितमिति समर्थितवान् । उपमालङ्कारप्रयोगेऽयं निरुपमान इत्युक्तेरप्युपमालङ्कार एवायमित्युक्तिरतीव समुचिता स्यात् । **यथा मालविकाग्निमित्रे रागलेखावर्णनम् —**

1. रामायणम्–II.
2. रघुवंशम्–II. 6

"चरणाङ्कनिवेशितां प्रियायाः, सरसां पश्य वयस्य ! रागलेखाम्
प्रथमामिव पल्लवप्रसूतिं, हरदग्धस्य मनोभवद्रुमस्य ॥" 1

न च केवलं सहजसौन्दर्यवर्णने अपि तु शृङ्गारवर्णने चायं सिद्धहस्तः अपि तु करुणवर्णने च दक्षः। यथा रघुवंशचतुर्दशसर्गे पतिव्रतालक्षणपूर्णानि करुणस्यन्दीनि सीतावचनानि —

वाच्यस्त्वया मद्वचनात् स राजा
वह्नौ विशुद्धामपि यत्समक्षम् ।
मां लोकवादश्रवणादहासीः
श्रुतस्य किं तत्सदृशं कुलस्य ॥

साहं तपः सूर्यनिविष्टदृष्टिर्-
ऊर्ध्वं प्रसूतेश्चरितुं यतिष्ये ।
भूयो यथा मे जननान्तरेऽपि
त्वमेव भर्ता न च विप्रयोगः ॥2

कुमारसम्भवः :—

रतिवाक्यमप्येवंविधम्, यथा—

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥"3

अपि च राजाधिराजोचितसत्कार्यसत्काराचारविशेष एवं प्रदर्शितः कल्याणवेदिकासीनपरमेश्वरचर्यावर्णनेन—

....

1. मालविका-3. 11.
2. रघु. XIV. 61, 56 vv. (Nirnayasagar Press, Bombay 7th edition) 1929.
3. कुमारसंभवम् IV. 33. (Nirnayasagar Press, Bombay) 14th ed-1955.

**"कम्पेन मूर्ध्नः शतपत्रयोनिं वाचा हरिं वृत्रहणं स्मितेन ।
आलोकमात्रेण सुरानशेषान् सम्भावयामास यथाप्रधानम्॥1"**

रसौचित्यपारदृश्वनाऽनेन शाकुन्तलादिषु कृतं शृङ्गारवर्णनमतीव सहृदयहृदयाह्लादकारि समुचितमाभाति । अस्याष्टमसर्गे तु शृङ्गारमर्यादा समतिक्रान्तेव दृश्यते 2 तदेवोक्तं क्षेमेन्द्रेणैवम् । 3

"नरवराजिविराजितोरुमूलहृतविलोचनत्वं त्रिलोचनस्य भगवतस्त्रिजगद्गुरोर्यदुक्तं तेनाऽनौचित्यमेव परं प्रबन्धार्थः पुष्णाति"4।

मम्मटादयोऽपि दिव्ययोः सम्भोगवर्णनं जननीजनकयोः सम्भोगवर्णनमिवाऽनुचितमित्याहुः5 । वामनोऽपि 'दष्टमुक्तमधरोष्ठमम्बिका' 6 इत्यादिवर्णनमनुचितमित्युक्तवान् । ध्वनिकारस्तु "महाकवीनामप्युत्तमदेवताविषयप्रसिद्धसम्भोगशृङ्गारनिबन्धनाद्य – नौचित्यं शक्तितिरस्कृतत्वाद् ग्राम्यत्वेन न प्रतिभासते । यथा कुमारसम्भवे देवीसम्भोगवर्णनम्" इति समर्थितवान् ।7

1. कु. सं. VII 46.
2. M. Krishnamachariar. p. 115.
3. औचित्यविचारचर्चा-p. (Kavyamala' Part I. 3rd ed. (Nirnayasagar Press, Bombay-1929)
4. cf कुमारसंभवम्-VIII. 87.
5. काव्यप्रकाशः–VII. p. 269. (Chowkhamba–Vidyabhavana Granthamala-15; Banares-1955)
6. कु.सं. VIII. 18.
7. ध्वन्यालोकः III. p. 317. (Kashi Sanskrit Series-135) 1940.

वाल्मीकिभक्तोऽयं महाकविर्यथा तदुक्तरामकथामाश्रित्य रघुवंशं चकार । तथैव बालकाण्डसप्तत्रिंशसर्गे तेन वर्णितं कुमारजननोदन्तमुपजीव्य कुमारसम्भवं निर्मितवानिति काव्यसंज्ञायाश्च तद्वर्णनमेव मूलमिति च ज्ञापयत्ययं रामायणश्लोकः । कौशिकोक्तिरियम् –

"सुरसेनागणपतिं ततस्तममलद्युतिम् ।
अभ्यषिञ्चन् सुरगणाः समेत्याग्निपुरोगमाः ।
एष ते राम गङ्गाया विस्तरोऽभिहितो मया ।
कुमारसम्भवश्चैव धन्यः पुण्यस्तथैव च ॥"[1]

मेघसन्देशः —

अमूल्यकाव्यरत्नं कालिदासप्रतिभामूर्तिरयं ग्रन्थः । रामायणीयं हनुमत्सन्देशं मनसि निधायाऽयमिदं काव्यमरचयत् । तथापि केवलकल्पितकाव्यसृष्टाविदमेवाद्यम् ।

एतदनुकृत्य सञ्जातानि सन्देशकाव्यानि शतानि, नैकमप्यस्य पार्श्वस्थितेरप्यलम् । अस्य अधिकत्रिंशा व्याख्याः सन्ति । तासु मल्लिनाथसूरिनिर्मिता सञ्जीविन्येव लोकव्याप्ता । अयमत्र सन्देश इति न केनापि व्याख्यात्रा निरूपितः । तथापि यक्षोद्दिष्टसन्देशः प्रतिकृतिदर्शनानुभवकथनरूप इत्ययं श्लोको द्योतयतीति मन्ये –

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्—
आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।

---

1. रामायणम्-(बाल. 37-31-33 2nd ed.·Madras. Law Journal Press Mylapore, Madras 1958) (M. Krishnamachariar, p. 114.

अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥1

शाकुन्तलम् :—

जगदभिनुतं नाटकमेतदेव विनुतम् ।

"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥"

वस्तुपात्ररसौचित्यानामिदमुत्तमोदाहरणम् यथा स्वप्नवासवदत्तम् । विक्रमोर्वशीयमालविकाग्निमित्रे च शृङ्गाररसप्रधाने हृदयरञ्जने । तथापि शाकुन्तलमेव प्रथमतया गण्यते । सहजसौन्दर्यवर्णनमिदं दशरूपावलोके माधुर्यस्योदाहरणम् —

"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥"2

सर्वशास्त्रविज्ञाता स्वतन्त्रोऽयं कविः । अनेन प्रयुक्ता वैदिकार्षशब्दाः—"त्रियम्बकं,3 अवैहि,4 विश्रामहेतोः"5 इत्यादयः समर्थिता मल्लिनाथादिभिः । अन्तिमप्रयोगो विश्रामो वा इति चान्द्रव्याकरणसूत्रस्य शरणमभवत् ।

---

1. मेघसन्देशः 102 (p. 74) Dr. S.K. De's ed. (Sahitya Academy New Delhi) 1957.
2. शाकुन्तलम्. I. 20 (p. 25.) 2nd ed of Monier Williams-Oxford. (1876)
3. कुमारसंभवम्. III. 44. 'त्रियम्बकं संयमिनं ददर्श'
4. रघुवंशम्. II. 35. 'अवैहि मां किङ्करमष्टमूर्तेः'
5. 'नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोः' (मे. I. 25)

"छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः।
अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम्।।1

वीर्यवन्त्यौषधानीव विकारे सन्निपातिके2 ।

"सङ्गवस्तु भिषजामनाश्रवः"3

"आमयस्तु रतिरागसम्भवः"4

"राजयक्ष्मपरिहानिरायर्यौ"5

"भोगीव मन्त्रौषधिरुद्धवीर्य"6

"छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम् "

"कथं समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः"7

"द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ।"8

"चीनांशुकैः कल्पितकेतुमालं"9

"चीनांशुकमिव केतोः ॥ 10

इत्यादिवाक्यान्यस्य विविधशास्त्रज्ञानं लौकिकविज्ञानं च प्रदर्शयन्ति । स्तुतेरतीतास्य प्रतिभेत्यलम् ।

....

1. कमारसंभवम्· VII· 1·
2. कु· सं· II· 48·
3. रघुवंशम्· XIX. 49·
4. रघु· XIX 48·
5 रघु. II. 32.
6. मालविका· IV v 4· (p· 62)-9th ed· (Nirnayasagar Press Bombay) 1950·
7. शाकुन्तलम्· VI· (p· 258)-2nd ed· of M· Williams. (1876)
8. रघुवंशम्· VI· 57· (N.S.P ed· VII ed-1929) Bombay.
9. कुमारसंभवम्· VII.3.
10. Sak· I. 34· (p· 58-monier William's-2nd ed.1876)

१४. मातृगुप्तः

सुशीलः सत्त्वगुणसम्पन्नोऽयं ब्राह्मणः कविः कञ्चित्कालं काश्मीरानपालयत्। अस्य चरितं विस्मयजनकं राजतरङ्गिण्यां वर्णितम्। तत्संग्रहेणाऽत्र निवेदयामि।

गोनन्दवंशे श्रेष्ठसेनतुञ्जीनापरनामा प्रवरसेनः काश्मीर-भर्ता। तस्यानुजो हिरण्यसेनापरनामा तोरमाणः तेन भ्रात्रा बन्दीकृतः। ततस्तावुभावपि ईषत्कालभेदेनैकस्मिन् समय एव मृतौ। तदा तोरमाणतनयः द्वितीयप्रवरसेननामको बालकः कयाचित् कुलालकान्तया सरहस्यं संवर्धितः। पश्चात् पितृवृत्तान्तं ज्ञात्वा देशं परित्यज्य तीर्थयात्राव्याजेन कुत्रापि गतः। काश्मीरराज्यमराजकमभूत्। तदा श्रीहर्षापरनामा विक्रमादित्य उज्जयिनी–चक्रवर्ती। स म्लेच्छान्तकः शकानां जेता। तस्याज्ञया मन्त्रिणः काश्मीरान् पालयन्ति स्म।

तत्काले श्रीहर्षस्य सभां प्रतिदिनं बहवः पण्डिताः कवयश्च प्रविश्य राजानं स्तुत्वा सत्कृतिं च लब्ध्वा गच्छन्ति स्म। एकदा मातृगुप्तस्तत्र गत्वा महाराजं दृष्ट्वा सन्तुष्टान्तरङ्ग एतद्दर्शन–मेवालमिति मत्वा कुत्रचिदुपविश्य तूष्णीमास। सभान्ते विबुधैः सह बहिर्जगाम। ततःप्रभृति प्रतिदिवसमायाति स्म। न किमपि याचते। किमर्थमागतोऽसि त्वमिति राज्ञा च न पृष्टः। तथैव रात्रिंदिवमयं बलीयसोद्योगेन राजानं सेवमानः षड् ऋतूनत्यवाहयत्।

एकस्यां रात्रावयं राजद्वारे भटैः सह स्थितः। तेषु सुप्तेषु अयं जागरूकोऽभवत्। तस्मिन् समये प्रासादे चण्डवायुना दीपाः प्रशमिताः। तान् दृष्ट्वा भूपालः कस्तत्रेत्यब्रवीत्। राजन्नयमहं

मातृगुप्त इति प्रतिवचनं दत्त्वा, तदाज्ञया प्रासादमारुह्य दीपानुज्ज्वलितान् कृत्वा पुनरधो गच्छन्तं तं भूपतिः तिष्ठेत्युक्त्वा पप्रच्छैवम् ।

राजा—कियत्यस्ति निशा ?

मातृ०– देव ! अर्धयामावशेषा यामिनी ।

राजा – कुतस्त्वया ज्ञातो निशाशेषः? कथं! न निद्रां गतः ?

मातृ०—तस्मिन्नेव क्षणे श्लोकं कृत्वा राजानमेवं व्यजिज्ञपत् ।

"शीतेनोद्धूषितस्य माषशिमिवच्चिन्तार्णवे मज्जतः
शान्ताग्नि स्फुटिताधरस्य धमतः क्षुत्क्षामकण्ठस्य मे ।
निद्रा क्वाप्यवमानितेव दयिता संत्यज्य दूरं गता
सत्पात्रप्रतिपादितेव वसुधा न क्षीयते शर्वरी ॥"[1]

सोऽयं श्लोको मातृगुप्तप्रणीत एव न तु कल्हणेन कल्पितः, किन्तु विद्वत्सम्प्रदायादागतः श्लोकोऽयं कार्पटिकस्येति क्षेमेन्द्रेणौचित्यविचारचर्चायां[2] यदुक्तं तत्प्रामाणिकम् ।

तदा श्रीहर्षश्चिरमुपेक्षितोऽयं साधुरिति मनसि विचिन्त्य गच्छेति मातृगुप्तमाज्ञाप्य राजहीनस्य काश्मीरस्यायं राजा भूयादिति निश्चित्य तदानीमेवाज्ञापत्रं दत्त्वा गूढचारान् प्रेषयामास काश्मीरान् । अपि च काश्मीरराज्यदानशासनं च लेखयित्वा रात्रिशेषमत्यवाहयत् । प्रभातायां शर्वर्यां यथापूर्वं राजसन्निधिं गतायास्मै राजादेशाच्छासनलेखमदाद्राजलेखाधिकारी । राजा चोक्तवान् प्रथीमं लेखं मा पठ । अद्यैव श्रीनगरं गच्छेति । तथेति प्रभोरज्ञां शिरसि कृत्वा, मातृगुप्तः पादचारी श्रीनगरं प्राप्य ततो-

1. राजतरङ्गिणी. III. 181.

2. 'क्षेमेन्द्रस्य. औचित्यविचारचर्चा' (Kavyamala-Part I. p. 124) 1929.

ऽपनीतप्राग्वेषः, प्रावृतो धवलांशुकैर्जगामान्तिकं मन्त्रिणां विक्रमादित्यशासनपत्रं चादात् । ते च लेखमुन्मुच्य वाचयित्वा मातृगुप्तमिममभिवन्द्य शुभे मुहूर्ते राज्याभिषिक्तं चक्रुः । कविरयं परमानन्दभरितः कृतज्ञतापूर्वकाभिवादनपत्रं श्रीहर्षाय प्रेषयित्वा प्रजानुरञ्जनं काश्मीरपालनं चकार । भर्तृमेण्ठादीनां कविशेखराणां चाश्रयोऽभवत् ।

अनन्तरं तोरमाणपुत्रः प्रवरसेनः स्वतपःसन्तुष्टाच्छिवाद्राज्यवरं लब्ध्वा ससैन्यस्त्रिगर्तादिशत्रून् विजित्य, विक्रमादित्यं जेतुमुज्जयिनीं गत्वा, तत्समये स राजा दिवंगत इति विज्ञाय, वशीभूताय तत्तनयाय प्रतापशीलापरनाम्ने शीलादित्यायाभयं दत्त्वा, पूर्वमुज्जयिनीनाथेनापहृतं काश्मीरराजसिंहासनं स्वायत्तं कृत्वा, श्रीनगराभिमुखोऽभवत् । तद्वार्तां श्रुत्वा मातृगुप्तो राज्यं परित्यज्य काश्मीरप्रयाणोन्मुखोऽभूत् । प्रवरसेनस्तद्वार्तामाकर्ण्य मध्येमार्गं मातृगुप्तमुपेत्य "यथा पूर्वं भवन्तः काश्मीरपालनं कुर्वन्त्विवति प्रार्थितवान् । न हि तथा वक्तव्यम् । त्वदीयं राज्यं त्वमेव पालयेत्युक्त्वा अयं ब्राह्मणः काशीं गत्वा, सन्यस्य योगनिष्ठो भूत्वा, तत्रैव सिद्धिं गतः । मातृगुप्तराज्यपालनकालः कतिपयमासोनाः षड्वत्सराः1।

मातृगुप्ताश्रयः शकजेतोज्जयिनीपालकः श्रीहर्षविक्रमादित्यः शा· शकपूर्वं १३४ तमे वत्सरे भवेदिति कालिदासजीविते पठितं पाठकैः ।2 राजतरङ्गिण्युक्तकाश्मीरपालकराज्यकालवत्सरगणनानुरोधेन शा. श· प्रान्ते यशोवर्माणं काश्मीरराजो ललितादित्यो जिगायेति ललितादित्यात्पूर्वं ६३८ संवत्सरमितकाले मातृगुप्तश्रीहर्षविक्रमादित्यावास्तामिति च वेद्यं भवति । तत इदानीं द्वयोः कालयोरन्तरं १२३ संवत्सरमितं दृश्यते । इदमन्तरं विचारणीयं

---

1. This story is narrated in राजतरङ्गिणी III. Taranga
2. See infra.

भवतु। तथापि मातृगुप्तश्रीहर्षयोः कालः पूर्वोक्त एवेति प्रतीतिः प्रबला।

प्रवरसेनेन रावणवधनामान्तरं सेतुबन्धकाव्यं विरचितमिति दण्डिभट्टबाणादिस्तुतिवचनैर्विज्ञातम्। तदीयश्लोकाः केचन क्षेमेन्द्रादिभिरौचित्यविचारचर्चादिषूदाहृताश्च। स काश्मीरपालः प्रवरसेनः शा श ४५ प्रान्ते स्थित इति काव्यमालाप्रकाशकैरुक्तम्1। न तु प्रथमो वा उत द्वितीयो वेति चिन्तितम्। 2 यदि सेतुबन्धकर्ता द्वितीयः स्यात् स राजा शा· श· १०२ प्रान्ते भवेदित्यन्येषामभिप्रायाद् ज्ञायते। तर्हि मातृगुप्तसमकालः प्रवरसेनः सेतुबन्धकर्ता न भवेत् तत्पितामहपौत्रयोः प्रवरसेनयोरन्तरं ४७ वत्सरमितम्। एवं स्थिते पुनरप्यन्यो विषयः।

प्रथमतुञ्जीनादिसप्तराजपालनानन्तरं मातृगुप्तो काश्मीर–राजत्वेन श्रीहर्षविक्रमादित्येन नियुक्तः। तद्राजसप्तकपरिपालन–कालः २२२ वत्सरा इति राजतरङ्गिणीतो ज्ञायते। अनेन गणनेन तावुभौ शा· श, ४० (क्रि· श. १२८) मितकाले भवतः। अयं निर्णयः शकारिर्विक्रमशककर्ता श्रीहर्षविक्रमादित्यः शा शकात्पूर्वं १३४ (क्रि. पू. ५६) वत्सर आसीदिति प्रसिद्धविश्वासस्य भञ्जको भवति। ततश्च मातृगुप्तकालः संदिग्धः। तथाप्ययं कविः कालिदासात्पर एवेति वक्तव्यम्। मातृगुप्तः कदापि कथमपि कालिदासो भवितुं नार्हति। न हि कालिदासो दीनः, न राजा न संन्यासी। न मातृगुप्तो रघुवंशादिप्रसिद्धकाव्यकर्ता। कालिदासवार्धकदशायां मातृगुप्त आसीदिति चिन्तनं वरम्। 3

---

1. सेतुबन्धम्-2nd ed. (N.S. Press; Bombay) 1935.
2. M. Krishnamachariar, p. 124.
3. For a discussion see under Kalidasa M. Krishnamachariar, pp. 101 ff.

विख्यातोऽभिनवगुप्ताचार्यः स्वीयत्रिंशिकाविवरणावतारिकायां निजवंशमूलपुरुषो मातृगुप्तोऽन्तर्वेदीतः काश्मीरमाजगामेत्युवाच, न तु काश्मीरपालकत्वेनागत इति। द्वयोरन्तरं वत्सरसहस्रम्। तत्प्राचीनकालचरितं कथमभिनवगुप्तो ज्ञातुं समर्थः ? तथाप्यभिनवगुप्तवंशमूलपुरुषोऽयमिति वक्तुमिदमलम्। अस्य जन्मभूमिरन्तर्वेदी कुत्रत्येति संशयः। राजतरङ्गिणी ललितादित्यमेवं वर्णयति।

"करं पूर्वदिशो गृह्णन् प्रतापानलसन्निधौ।
अन्तर्वेद्यां महाराजः स्वकीर्त्युष्णीषभृद् बभौ॥"1

प्रयागदेशीया गङ्गायमुनयोर्मध्यभूमिः (लङ्का) अन्तर्वेदीति तत्प्रकाशकाभिप्रायः। प्राग्गोदावरीमण्डलीयं नृसिंहस्वामिक्षेत्रं पुरातनमद्याप्यन्तर्वेदीनाम्ना चकास्ति। स्कान्दगौतमीमाहात्म्ये चेयं वर्णिता। अनयोर्ललितादित्यविजितान्तर्वेदी का वा? अनेन कविना निर्मितं काव्यं न लभ्यम्। औचित्यविचारचर्चायामुदाहृतोऽयं श्लोक एतन्निर्मितकाव्यस्थ इव भाति।

"नायं निशामुखसरोरुहराजहंसः
कीरीकपोलतलकान्ततनुः शशाङ्कः।
आभाति नाथ तदिदं दिवि दुग्धसिन्धु-
डिण्डीरपिण्डपरिपाण्डु यशस्त्वदीयम्॥"2

भरतनाट्यशास्त्रस्यैतेन व्याख्यानं रचितमिति सुन्दरमिश्रेण 'नाट्यप्रदीपे'3 सूचितम्। अभिनवगुप्तकुन्तकादिभिरस्य वाक्यान्युदाहृतानि स्वग्रन्थेषु4। शाङ्र्गदेवेन सङ्गीतरत्नाकरे प्रशंसितेषु संगीतशास्त्रप्रसिद्धेषु पूर्वेष्वयमप्यस्ति। एतेन सङ्गीतसाहित्ययोः सुगृहीतनामधेयो मातृगुप्त इति ज्ञायते।

1. राजतरङ्गिणी III. 132.
2. औचित्यविचारचर्चा-(Kavyamala, Part I, p. 142.
3. Composed in 1613 A.D. by Sundara Misra Aujagari. India office Catalogue vol III, pp. 347-48.
4. M. Krishnamachariar, p. 819.

१५. भर्तृमेण्ठः

काश्मीरराजस्य पूर्वोक्तमातृगुप्तस्यास्थानविद्वत्कविरयं पूर्वैः कविभिरतीवाभिनन्दित इत्थम् । तत्र परिमलकालिदास एवमाह—

"तत्त्वस्पृशस्ते कवयः पुराणाः
श्रीभर्तृमेण्ठप्रमुखा जयन्ति ।
निस्त्रिंशधारासदृशेन येषां
वैदर्भमार्गेण गिरः प्रवृत्ताः ॥"1

अत्र पुराणा इति विशेषणमयं कविः प्रभुणा मातृगुप्तेन सह प्राचीन इति सूचयति, वैदर्भमार्गशब्दोऽस्य विदर्भजत्वं च ।

अयमीश्वरस्य द्वितीयावतार इति राजशेखरकविरेवं स्तुतवान् —

बभूव वल्मीकभवः कविः पुरा
ततः प्रपेदे भुवि भर्तृमेण्ठताम् ।
स्थितः पुनर्यो भवभूतिरेखया
स वर्तते सम्प्रति राजशेखरः ॥2

बाणः एनमेवं स्तवीति –

"वक्रोक्त्या मेण्ठराजस्य वहन्त्या सृणिरूपताम् ।
आविद्धा इव धुन्वन्ति मूर्धानं कविकुञ्जराः ॥"3

---

1. नवसाहसाङ्कचरितम्. 1.5 (Bombay Sanskrit Series-LIII-Bombay)-1895.
2. Balaramayanam. I. 16 (Medical Hall Press, Benares)—1869.
3. हरिकविग्रथिता 'सुभाषितहारावली' (अमुद्रिता)

एवमेव मङ्खकादिभिरप्ययमभिनुतः कल्हणस्तु राजतरङ्गिण्यां तृतीयतरङ्गेऽस्य चरितमेवं वर्णितवान् –

"हयग्रीववधं मेण्ठस्तदग्रे (मातृगुप्ताग्रे) दर्शयन्नवम् ।
आसमाप्ति ततो नापत्साध्वसाध्विति वा वचः ॥
अथ ग्रथयितुं तस्मिन् पुस्तकं प्रस्तुते न्यधात् ।
लावण्यनिर्यागभिया तदधः स्वर्णभाजनम् ॥
अन्तरज्ञतया तस्य तादृश्या कृतसत्कृतिः ।
भर्तृमेण्ठः कविर्मेने पुनरुक्तं श्रियोऽर्पणम् ॥"1

अनेन मातृगुप्तस्य लक्ष्मीविलासः, भर्तृमेण्ठस्य सुवर्णसत्कारलाभश्च प्रदर्शितः । क्षेमेन्द्रः सुवृत्ततिलके,2 राजशेखरः काव्यमीमांसायां चोदाजहारेमम् अधोलिखितं श्लोकं भर्तृमेण्ठं स्मरन्–

"आसीद्दैत्यो हयग्रीवः सुहृद्वेश्मसु यस्य ताः ।
प्रथयन्ति बलं बाह्वोः सितच्छत्रस्मिताः श्रियः ॥"3

एतादृशमहाकवेरेवंविधं हयग्रीववधकाव्यं कालगर्भे लीनं दुर्दैवात् । अहो कालः । मेण्ठशब्दपर्यायं हास्तिपकपदमपि व्यवहृतम्,4 यथा हास्तिपकस्येति भोजराजेन शृङ्गारप्रकाशे नामद्वयमपि गृहीतम् । तेन तत्रोदाहृता इमे श्लोकाः सदुक्तिकर्णामृते च सन्ति ।

1. राजतरङ्गिणी. III, 250-262.
2. सुवृत्ततिलकम्. III. p. 16 (Haridas Sanskrit Series-26. Benares) 1933.
3. M. Krishnamachariar, p. 133.
4. Intro. to Jalhana's सूक्तिमुक्तावली. (pp. 47-48) Gaekwad's Series-Vol. IXXXII. Baroda.

"वाचो माधुर्यवर्षिण्यो नाभयः शिथिलांशुकाः ।
दृष्टयश्च चलद्भ्रूका मण्डनान्यान्ध्रयोषिताम् ।।

तथाप्यकृतकोत्तालहासपल्लविताधरम् ।
मुखं ग्रामविलासिन्याः सकलं राज्यमर्हति ।।

न तथा नागरस्त्रीणां विलासा रमयन्ति नः ।
यथा स्वभावमुग्धानि वृत्तानि ग्राम्ययोषिताम् ।।"1

अत्र प्रथममान्ध्रस्त्रीवर्णनमत्यन्तं स्वभावसिद्धं सत्कविरयमान्ध्रदेशं संचचारेति प्रथयति। द्वितीयं ग्रामविलासवर्णनमस्य सहजसौन्दर्यवर्णनचातुर्यं लोकविज्ञानं च प्रकटयति। अपि च गोदावरीतीरान्तर्वेदीग्रामात्प्रयातस्य मातृगुप्तस्यायमान्ध्रो विदर्भजः प्राणमित्रमिति, तेन हेतुना तदास्थानं गत इति च तर्कयत्यस्मन्मनः। आन्ध्रेण मया नातोऽधिकं वक्तव्यम्। दैवं जानाति तत्तत्त्वम्। सदुक्तिकर्णामृतेऽमू श्लोकौ दृश्येते भर्तृमेण्ठनाम्ना –

"घासग्रासं गृहाण त्यज करिकलभ! प्रेमबन्धं करिण्याम् ।
पाशग्रन्थिं व्रणानामविरतमधुना देहि पङ्कानुलेपम् ।।

दूरीभूतास्तवैते शबरवरवधूविभ्रमोद्भ्रान्तदृश्याः ।
रेवातीरोपकण्ठच्युतकुसुमरजो धूसरा विन्ध्यपादाः ।।2

1. M. Krishnamachariar, p. 133. Peterson's Intro. (pp. 93-94) to the सुभाषितावली. (1886)

2. शाङ्र्गधरपद्धतिः Val. I. 928 v. (Bombay Sanskrit Series-XXXVII-Bombay) 1888.

त्यक्तो विन्ध्यगिरिः पिता भगवती मातेव रेवानदी
ते ते स्नेहनिबन्धबन्धुरधियस्तुल्योदया दन्तिनः ।
त्वल्लोभान्नतु हस्तिनि स्वयमिदं बन्धाय दत्तं वपुः
त्वं दूरे ध्रियसे लुठन्ति च शिरःपीठे कठोरांशुकाः ॥1

– 0 –

1. Peterson,s Introduction (p. 94) to सुभाषितावली, (B. S. Series Bombay)-1886.

(१६) अश्वघोषः

प्रसिद्धोऽयं विद्वत्कविर्बौद्धमतगुरुः पाटलीपुत्रनिवासी प्रथमतः। ततः पुरुषपुरे (पेशावर्) कनिष्कराजाऽस्थाने सभ्योऽभवदिति चरित्रकारा वदन्ति।[1] कनिष्ककालस्तु विमर्शकलोकेऽतीव सन्दिग्धः। गौतमबुद्धनिर्वाणानन्तरं १५० वत्सरमिते काले स आसीदिति कल्हणेनैवमुक्तं राजतरङ्गिण्यां प्रथमतरङ्गे –

"अथाभवन् स्वनामाङ्कपुरत्रयविधायिनः
हुष्कजुष्ककनिष्काख्यास्तयस्तत्रैव पार्थिवाः।[2]
ते तुरुष्कान्वयोद्भूता अपि पुण्याश्रया नृपाः
शुष्कलेत्रादिदेशेषु मठचैत्यादि चक्रिरे॥

प्राज्ये राज्यक्षणे तेषां प्रायः काश्मीरमण्डलम्
भोज्यमास्ते स्म बौद्धानां प्रव्रज्योर्जिततेजसाम्।
तदा भगवतः शाक्यसिंहस्य परनिर्वृतेः
अस्मिन्महीलोकधातौ सार्धं वर्षशतं ह्यगात्॥"[3]

तेनैवं पुरातनमते प्रकटितेऽपि नैतावता बुद्धनिर्वाणकालः प्रकाशितः। अपि च कनिष्कस्यायं समकाल इति च न ज्ञातः।

---

1. M. Krishnamachariar, pp. 124, 125.
2. राजतरङ्गिणीं-I. 168.
3. ,, -I. 170-172.

तथा च चरित्रकारा बहुविधमामनन्ति कनिष्ककालम् ।1 अशोक-महाराजपौत्राद्दामोदरादनन्तरं कनिष्कः काश्मीरं गत इति राज–तरङ्गिणीतो ज्ञायते ।2 तथाप्यशोककाल इव कनिष्ककालोऽपि चरित्रकारमते न स्पष्टः । अश्वघोषः कनिष्केन साकं काश्मीरं गत इत्यत्रापि न प्रमाणम् । तस्मात् कौलपण्डितादिपरिशोधकमतानु-सारेणायं कविः शा· शकारम्भात् किञ्चित् पूर्वो वा, परो वा आसीदिति चिन्तनमेव वरमद्य ।3 अश्वघोष आर्यस्वर्णाक्षितनयः पार्श्वपण्डितशिष्यः । अनेन बुद्धचरितं सौन्दरनन्दं चेति काव्यद्वयं निर्मितम् ।4

आद्यस्यान्तिमसर्गचतुष्टयं शा· श· १७५२ प्रान्ते नेपाल–देशवासिना अमृतानन्देन रचितमिति किंवदन्ती । द्वितीयमष्टादश-सर्गात्मकम् ।5 गौतमोपदेशात्परित्यक्तसंसारस्य नन्दस्य पतिविर–हितायास्तत्पत्न्याश्च वियोगदुःखमभिवर्णितमस्मिन् । अनेनालङ्कार-ग्रन्थोऽपि निर्मित इति श्रूयते, न तु दृश्यते कुत्रापि । कविरयं बौद्धमततत्त्वज्ञः शान्तो विरक्तश्च । अपि च लोकज्ञः । अस्य कवित्वमपि निर्दुष्टं सरसं च । इमे विरक्तिबोधका श्लोका बुद्ध–चरिते ।

1· बुद्धनिर्वाणानन्तरं ६०० वत्सरमिते काले कनिष्क आसीदिति हुयिन्त्स्याङ्ग; ४०० मितकाल इति माँक्समुल्लरः; क्रि. श. २७८ मिते काल इति भाण्डारकरमिश्राः क्रि.श. प्रथमशताब्द्या-मश्वघोष इति केचन द्वितीयशताब्द्यामिति; M. Krishnama-chariar. 126.

2· राजतरङ्गिणी,

3. M. Krishnamachariar, p. 126.

4. ,, ,, 125.

5, ,, ,, 126.

"नावजानामि विषयाञ्जाने लोकं तदात्मकम् ।
अनित्यं तु जगन्मत्वा नाऽत्र मे रमते मनः ॥
जरा व्याधिश्च मृत्युश्च यदि न स्यादिदं त्रयम् ।
ममापि हि मनोज्ञेषु विषयेषु रतिर्भवेत् ॥
एतत्तत्परमं ब्रह्म निर्लिङ्गं ध्रुवमक्षरम् ।
यन्मोक्ष इति तत्त्वज्ञाः प्रवदन्ति मनीषिणः ॥"1

अयं गौरवबुध्या तत्र तत्र कालिदासकवितामनुससारेत्यत्र निदर्शनवाक्यानीमानि –

दिशः प्रसेदुर्मरुतो ववुः सुखाः2
दिशः प्रसेदुः प्रबभौ निशाकरः3
वाता ववुः सौख्यकराः प्रसेदुः4
वाता ववुः स्पर्शसुखा मनोज्ञाः5
कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा6
अतोऽपि नैकान्तसुखोऽस्ति कश्चि–
नैकान्तदुःख पुरुषः पृथिव्याम्7

परस्परेण स्पृहणीयशोभां
न चेदिमं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां वितथोऽभविष्यत् ॥8

1. बुद्धचरितम्.
2. रघु. III. 14.
3. बुद्ध.
4. कुमार. XI. 37.
5. बुद्ध. XIII. 73.
6. मेघ- 106.
7. बुद्ध. XI. 43.
8. रघु. VII. 14.

तां सुन्दरीं चेन्न लभेत नन्दः
सा वा निषेवेत न तं नतभ्रूः ।
द्वन्द्वं ध्रुवं तद्विकलं न शोभे-
तान्योन्यहीनाविव रात्रिचन्द्रौ ॥1

अरिष्टशय्यां परितो विसारिणा
सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो
बभूवुरालेख्यसमर्पिता इव ॥2

स हि स्वगात्रप्रभयोज्ज्वलन्त्या
दीपप्रभां भास्करवन्मुमोष ।
महार्हजाम्बूनदचारुवर्णा
विद्योतयामास दिशश्च सर्वाः ॥3

एतावन्मात्रेणास्य कवित्वप्रज्ञा न शङ्कनीया । कालिदासोऽपि भासमनुससार खलु कुत्रचिद्गौरवेण । एतादृशमनुसरणं कवि-

1. सौन्दरनन्दम्. IV. 7. (p. 23.)—Punjab University Oriental Publications. Edited by Dr. E.H. Johnston. (1928)

2: रघु. III. 15.

3, बुद्ध. I. 32. M. Krishnamachariar, pp. 127-128; Who imitated whom depends on the dates of both Asvaghosa and Kalidasa. (Vide infra) In this connection cf. Dr. S. K. De, p 69. and Winternitz vol II p. 256.

लोके सर्वत्र दृश्यत एव । एवमेव रघुवंशसप्तमसर्गीयपुरन्ध्रीवर्णनं कुमारसम्भवतृतीयसर्गीयकामवर्णनं चानेनानुसृतमिति बुद्धचरित-तृतीयत्रयोदशसर्गीयतद्वर्णनाभ्यां वेद्यम् । एतेनायं कालिदासात्पर इति विमर्शकविश्वासः समञ्जसमेव । न हि कालिदासेनानुकृता अश्वघोषकविता, किन्तु तेनैवानुकृता कालिदासेनानुकृता अश्वघोष-कविता, किन्तु तेनैवानुकृता कालिदासकविता तेति उभयकाव्यपाठकानां विदितमित्यलं पल्लवितेन ।

— o —

(१७) हरिषेणः

नष्टग्रन्थेषु प्राचीनकविष्वयमेकः। अलहाबादनगरस्थित-स्तम्भशासनादयमुत्तरदेशीयः समुद्रगुप्तसमकालस्तदास्थानविद्वत्क-विरिति ज्ञायते। अनुक्तकालं गद्यपद्यात्मकं तच्छासनं प्रथमतः फ्लीट्पण्डितेन1 परिशोधितम्।2 तदनन्तरं तदन्तर्गतसंस्कृत-भागपरिशीलकैस्तच्छासनं समुद्रगुप्तराज्यकाले निर्मितमिति निश्चि-तम्। "निशितविदग्धमतिगान्धर्वललितैर्व्रीडितगुरुतुम्बुरुनारदादेः विद्वज्जनोपजीव्यानेककाव्यक्रियाभिः प्रतिष्ठितकविराजशब्दस्य"3 इति समुद्रगुप्तं कविराजबिरुदाङ्कितं वर्णयता हरिषेणेन तदास्थान-विद्वत्कविना भवितव्यमिति च सम्भावितम्। समुद्रगुप्तः शा. श. २८२ समये स्थित इति केषांचिदभिप्रायः। एतेन समुद्रगुप्तः स्वयं महाकविरिति हरिषेणादिसत्कवीन्द्रपोषक इति च द्वौ चरि-त्रांशौ विज्ञाताविति सन्तोष्टव्यम्।

---

1. Dr. Fleet.
2. M. Krishnamachariar, p. 97.
3. ,, p. 98.

(१८) भर्तृहरिः

"महान्तः कवयः सन्तु महान्तः पण्डितास्तथा ।
महाकविर्महाविद्वानेको भर्तृहरिर्मतः ।।"

शब्दशास्त्राचार्यः, सार्वलौकिकविज्ञानमूर्तिः ब्रह्मवेत्ता अयमपि कालवशात् चित्रविचित्रकथाश्रयः समभवत् यथा वाल्मीकिप्रमुखाः परिणीतचतुर्जातिकन्यस्य चन्द्रगुप्तनामकब्राह्मणस्य ब्राह्मण्यां वररुचिः, क्षत्रियायां विक्रमार्कः, वैश्यायां भट्टिः, शूद्रायां भर्तृहरिश्च सञ्जाता इत्येका कथा[1] । वलभीपालकस्य भट्टारकापरनामकभट्टिराजस्य सभायामयं कविरित्येका कथा[2] । अन्या चैका कथा चाटुश्लोकाऽऽत्मिका: –

"ब्राह्मण्यामभवद्वराहमिहिरो ज्योतिर्विदामग्रणीः
राजा भर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत् ।
वैश्यायां हरिचन्द्रवैद्यतिलको जातश्च, शङ्कुः कृती
शूद्रायाममरः षडेव शबरस्वामिद्विजस्यात्मजाः ।।"

भर्तृहरिः कस्यचिद्देशस्य पालकः । तस्मै कश्चिद्विप्रः फलमेकं समर्पितवान् । स राजा तत्फलं भार्यायै प्रायच्छत् । सा तु स्वजारायादिशत् । स च निजकान्तायै दत्तवान् । तद्गृहीत्वा वीथ्यां गच्छन्त्यास्तस्याः हस्ते तत्फलं दृष्ट्वा, राजा तामाहूय तत्फललब्धि श्रुत्वा, तदनन्तरं तद्वृत्तान्तं सकलमाकलय्य राज्ञी–

1. M. Krishnamachariar, pp. 315 and 141.
2. " p. 141

दुश्चरितं विदित्वा, विरक्तः संसारमुत्सृज्य पर्यटन् सुभाषितत्रिशतीमुक्तवान्। स एवायं महाकविःभर्तृहरिरिति अपरा कथा1। एतां कथां विश्वस्य, त्रिशतीव्याख्याता अर्वाचीन आवञ्चिरामचन्द्रपण्डितस्तदवतारिकायामेवमुक्तवान्।

"विप्रेणाभूतपूर्वं फलमधितपसाऽलम्भि सूर्यप्रसादात्।"

इत्यादि। अपि च, भर्तृहरिनिर्मित इति श्लोकोऽयं कस्मिंश्चिन्मुद्रणे (शा. १८५९ निर्णयसागर) दृश्यते —

"यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृते च परिशुष्यति काचिदन्या
धिक् तां च, तं च, मदनं च, इमां च, मां च॥"

केवलं किंवदन्तीमूलकं अत्यर्वाचीनकल्पितमिदं कथासूचनं किं विश्वसनीयं स्यात्? तदेतादृशकथाः परित्यज्य, कवेरस्य सत्योदन्तं विज्ञातुं यतामहे यथालाभं, यथाशक्ति।

पातञ्जलमहाभाष्यस्य त्रिपदी दीपिकेतिव्याख्ययोर्निर्मातारमेनं कैयटः स्वीयप्रदीपाख्यव्याख्यावतारिकायामेवं तुष्टाव —

"भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः।
छात्राणामपहास्यत्वं यास्यामि पिशुनात्मनाम्॥

---

1. Sri Malladi Suryanarayana Sastri's Lives of Sanskrit Poets (Telugu) p. 85. (1911) for a discussion about Bhartrhari, see also as Gupta, pp. 101. ff. Intro (p. 73-75) to सुभाषितावली; Intro. (p. 47) to Jalhana's सूक्तिमुक्तावली. (Baroda) 1938.

तथापि हरिबद्धेन सारेण ग्रन्थसेतुना ।
क्रममाणः शनैः पारं तस्य प्राप्तोऽस्मि पङ्गुवत् ॥"[1]

काश्मीरराजमुक्तापीडस्य मन्त्रिणो लक्ष्मणस्य वंशे सम्भूतो भूपतिराजपुत्रो हेलराजो भर्तृहरिनिर्मितवाक्यपदीयस्य व्याख्यानं रचयन् तदवतारिकायामेनमेवं स्तुतवान् ।

"त्रैलोक्यगामिनी येन त्रिकाण्डी त्रिपदीकृता ।
तस्मै समस्तविद्याश्रीकान्ताय हरये नमः ॥

सूक्तिश्रियः स्फुटा एता जयन्ति जगतां गुरोः ।
हरेर्भाष्याब्धिपीयूषच्छटाच्छुरितविग्रहाः ॥"[2]

वाक्यपदीयस्यैवान्यद् व्याख्यानं निर्मितवता पुण्यराजेन तदन्ते भर्तृहरिरेवं कीर्तितः ।

"गुरवे भर्तृहरये शब्दब्रह्मविदे ।
सर्वसिद्धान्तसन्दोहसारामृतमयाय च" ।

अनेनायं भर्तृहरिरेव पूर्वश्लोकेषु नामैकदेशन्यायेन हरिसंज्ञया व्यवहृत इति फलितम् । एतावता अस्य हरिनामख्यातिः, महावैदुष्यविख्यातिश्च विदिता ।

अथ, इदानीमेतदीयसुभाषितत्रिशती—भट्टिकाव्य–पुरुषार्थ-दशकादीनां व्याख्यातृभिः तत्तदवतारिकासु तत्तन्मूलग्रन्थलेखकैः तदन्तेषु चायं कथं वा व्यवहृतः ? तद् द्रक्ष्यामः ।

1. Kaiyata's महाभाष्यप्रदीपः Introductory vv. 6-7 (Nirnayasagar Press, Bombay) 5th ed. (1951)
2. हेलराजस्य वाक्यपदीये.

सहृदयानन्दिनीव्याख्यान्तवाक्यानि इमानि 'श्रीभर्तृहरियोगीन्द्रविरचिता सुभाषितत्रिशती सम्पूर्णा' ।1

"पुरुषार्थदशकान्तस्थितानीमानि वाक्यानि इति आचार्य–भर्तृहरिप्रणीतं पुरुषार्थदशकं सम्पूर्णम् ।"

श्रीधरपण्डितकृतव्याख्यान्तश्लोकार्धोऽयम् – "व्याख्याने भट्टिकाव्यस्य श्रीधरीये मनोहरे।"

मुग्धबोधिन्याद्यन्तयोर्भरतपण्डित एवमाह । भर्तृहरिनामककविः श्रीरामकथाश्रयं महाकाव्यं चकार ।

'भट्टिटीकां प्रकुरुते भरतो मुग्धबोधिनीम् । मुग्धबोधिन्यां भट्टिटीकायाम् ।

"लिखितपुस्तकस्यैकस्यान्ते – इति भर्तृकाव्यटीकायां जयमङ्गलायाम् ।"

"अन्यस्मिन् लिखितपुस्तके - श्रीमद्गोविन्ददीक्षितसूनुविक्रमावरजभट्टिमहाकविविरचिते महाकाव्ये ।"

"परस्मिन् लिखितभट्टिकाव्यपुस्तके वलभीवास्तव्यस्य श्रीस्वामिसूनोः भट्टिमहाब्राह्मणस्य महावैयाकरणस्य कृतौ ।"

कस्मिंश्चिल्लिखितपुस्तकस्थानि जयमङ्गलावाक्यानि "श्री–स्वामिसूनुः कविर्भट्टनामा रामकथाश्रयं महाकाव्यं चकार ।"

"कन्दर्पचक्रवर्तिभाषितमिदं – अत्र तावत् महामहोपाध्याय-श्रीभर्तृहरिकविना विरचिते भट्टिकाव्ये शब्दकाण्डलक्षणम् ।"

नारायणविद्याविनोदोक्तिरियम् । "अत्र कविना श्रीधर-स्वामिसूनुना भर्तृहरिणा सर्गबन्धः । ईदृशानि बहूनि वचनानि

1. रामचन्द्रबुधेन्द्रनिर्मिता सहृदयानन्दिनीसमेता, सुभाषितत्रिशती (अष्टमसंस्करणम्) (N. s. Press, Bombay-1957)

सन्ति । प्रकृतविषयनिर्णयायेमान्यलम् । एभिस्तत्त्वमिदं वेद्यं भवति ।1

नामैकदेशन्यायेन तत्तत्प्रदेशेष्वयं हरिनाम्ना, भर्तृनाम्ना, तत्प्रकृतरूपभट्टिनाम्ना च व्यवहृतः । पाणिनीयमूर्तिनाऽनेन निर्मितं रामकथाकाव्यं तु विशेषतस्तत्र तत्र कविनाम्ना भर्तृकाव्यमिति सर्वत्र भट्टिकाव्यमिति प्रतीतिमगमत् । तेन भर्तृहरिरेव भट्टिरिति निःशङ्कं वक्तुं शक्यते ।

अस्य पितुर्नाम केनचिदेकेन गोविन्ददीक्षित इति लिखितम् । केवलचाटुकथाश्रयं तद्वचनमुपेक्ष्यम् । बहुभिर्लेखकैर्व्याख्यातृभिश्च श्रीधर–श्रीधरस्वामी – श्रीस्वामिनामान्येव प्रोक्तानि । श्रीधरस्वामिनः संग्रहनाम श्रीस्वामीति स्पष्टम् । तस्मादाबलवत्प्रमाणलाभमस्य पिता श्रीधरस्वामी भवेदिति सम्भावनीयम् ।

विषयेऽस्मिन्नेवं विस्पष्टेऽपि भट्टिकाव्यकर्ता भट्टिरेव न भर्तृहरिरिति भावयन्ति केचित् ।2 तत्र निर्णयसागरयन्त्रालयमुद्रितजयमङ्गलासहितभट्टिकाव्यान्तस्थितं श्लोकचतुष्टयं प्रधानं कारणं तदिदम् ।

"इदमधिगतमुक्तिमार्गचित्रं
विविदिषतां वदतां च सन्निबन्धात् ।
जनयति विजयं सदा जनानां
युधि सुसमाहितमैश्वरं यथास्त्रम् ।।"

1. M. Krishnamachariar, p. 140; For a discussion on the identity of Bhatti and Bhartrhari, see Dasgupta p. 616; History of Sanskrit Poetics, by Mm. Dr. P.V. Kane pp. 475. (1951)
2. पश्यन्तु पी.वी. काणेपण्डितनिर्मितसाहित्यदर्पणांग्लपीठिकाम् । (2nd Revised and enlarged edition-1951).

दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।
हस्तादर्श इवान्धानां भवेद् व्याकरणादृते ॥
व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् ।
हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया ॥1

काव्यमिदं विहितं मया वलभ्यां
श्रीधरसेननरेन्द्रपालितायाम् ।
कीर्तिरतो भवतान्नृपस्य तस्य
प्रेमकरः क्षितिपो यतः प्रजानाम् ॥2

पुनश्च काव्यमिदमित्यस्य श्लोकस्य जयमङ्गलव्याख्या मयेदं काव्यं विहितं कृतम् । श्रीधरसूनुना नरेन्द्रनाम्ना नृपेण पालि–तायाम्……वलभीनामकपुर्याम् । अत एव काव्यविधानाय या कीर्तिः सा तस्यैव राज्ञो भवतात् ।

अत्रायं विचारः — किमिदं श्लोकचतुष्टयं भट्टिकाव्य–कर्तृरचितं वा ? यदि तत्कविकर्तृकं तर्हि जयमङ्गलाव्याख्या-सहितेषु वा, केवलमूलमात्रेषु वा लिखितपुस्तकेषु कथमेतन्न स्यात् ? केवलजयमङ्गलासहितपुस्तकान्तस्थितत्वादिदं कविनिर्मितमिति न विश्वसनीयम् ।

पूर्वदृष्टचतुर्थश्लोके श्रीधरसेन इति तद्व्याख्याने श्रीधर-सूनुरिति पाठभेदो दृश्यते । श्रीधरसूनुना नरेन्द्रनाम्ना नृपेण पालितायां वलभीपुर्यामित्यादिव्याख्यानवचनबलान्मूलपाठो मुद्रण-

1. M. Krishnamachariar, p. 143. भट्टिकाव्यम् XXII. 32–34 Nirnayasagar Press, Bombay. (8th ed. 1934)
2. जयमङ्गलासहितेष्वपि बहुषु लिखितपुस्तकेषु नेदं श्लोक-चतुष्टयम् । M. Krishnamachariar, p. 141, भट्टिकाव्यम्. XXII. 35 (N. S. P. Bombay. 8th ed. 1934)

प्रमाद इति मन्तव्यमेव । तदा श्रीधर एव श्रीधरसेन इति वक्तव्येऽपि वलभीपालकश्रीधरसेनचतुष्टये भट्टिपोषकश्रीधरसेनस्य निर्णयः कथम् ? व्याख्यानं विश्वस्य नरेन्द्रनामा राजेति निर्णेतुं वा किं प्रमाणम् । तदिदं सर्वमसङ्गतमिति मत्वा, ते श्लोका अर्वाचीनेन जयमङ्गलेन विरचिता इति स्मरणमेवात्र शरणम् । अत्रेदं विवरणम्–

पूर्वश्लोकेषु प्रथमद्वितीयौ ग्रन्थप्रशंसात्मकौ । तृतीयश्लोकार्थस्तु दुरहंकारपूरितः । यः कोऽपि कविः पाठकोपयोगार्थं काव्यं प्रणीय "हता दुर्मेधसश्चास्मिन्निति" वदेद्वा ? भट्टिरेव भवतु । सोऽप्येतादृशदुरहंभाव इति कथं वक्तुं शक्यते ? अथ कीर्तिरतो भवतान्नृपस्य तस्येति चतुर्थश्लोकवाक्येन कविर्वलभीपालकाय काव्यकीर्तिं दत्तवानिति खलु वादः ? भवतु, कीदृशमिदं काव्ययशोदानम् ? काव्यं तन्नामाङ्कितं वा न हि तद्भट्टिकाव्यमेव । तद्राजवंशावली किमु वर्णिता तादृशावतारिकैव नास्ति । तद्राजगुणवर्णनलेशोऽपि न काव्ये कुत्रापि । अहो विचित्रा राजभक्तिः । अद्भुतं काव्ययशोदानम् । तदास्ताम् ।

व्याख्याता जयमङ्गलो वलभीप्रान्तवासी अर्वाचीनः, भट्टिविषयकचाटुकथाश्रोता, भट्टिकाव्यपाठकश्च । श्रुतिगोचरीभूतां किंवदन्तीं विश्वस्य भट्टिः श्रीधरसूनुनरेन्द्रास्थानकविरिति भ्रान्तः सन् पूर्वोक्तविषयं वर्णयितुं स्वीयव्याख्यानमहत्त्वं प्रकटयितुं चैतत्पद्यचतुष्टयं ग्रन्थान्ते निक्षिप्तवानित्यत्र न कोऽपि संशयः ।

भट्टिकाव्याद् भामहालङ्कारः परमर्वाचीनः[1] । तस्मिन् भामहः काव्यप्रशंसां कुर्वन् नानाधात्वर्था यमकव्यपदेशिनी प्रहेलिका न सुखबोध्येति वक्तुकामः शास्त्रमिव काव्यमीदृशमपि व्याख्यागम्यं चेत् किं प्रयोजनमिति तन्निरासपूर्वकमेवमुक्तवान् –

1. Vide M. Krishnamachariar, p. 144.

**"काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत् ।
उत्सवः सुधियामेव हन्त दुर्मेधसो हताः ॥"** 1

इमं श्लोकं भट्टिकाव्यस्याप्यनुगुणं मत्वा जयमङ्गलः स्वशक्तिप्रकटनाय भामहवाक्यानि उपयुञ्जन्, पूर्वोक्ततृतीयश्लोकं निर्मितवानिति विस्पष्टम् । भट्टिवाक्यान्येव भामहेनोपयुक्तानीति न कोऽपि विमर्शकः प्रवदेत् । भर्तृहरिरेव भट्टिः । शब्दशास्त्राचार्येण भर्तृहरिणैव भट्टिकाव्यं निर्मितमिति निःशङ्कं विश्वसनीयमित्यलमतिविस्तरेण ।

अस्य कृतयः

एतन्निर्मितमहाभाष्यव्याख्ये कालक्रमेणान्तरिते । अपि तु सुचिरं कीर्त्यंते वैयाकरणैः । अस्य वाक्यपदीयं त्वद्यापि विद्वदादरपात्रं भवत्येव । तन्महाकृतीनां लक्ष्यं यथाऽहं रामकथाश्रयं भट्टिकाव्यं चकारेति विदुषां विश्वासः ।

भट्टिकाव्यं द्वाविंशतिसर्गात्मकम् । प्रकीर्णादिचतुष्काण्डम् । तत्र प्रसन्नकाण्डे दशमादिसर्गचतुष्टये सलक्ष्याणि काव्यगुणालङ्कारादिलक्षणानि विशदीकृतानि । एतदर्वाचीनालङ्कारिकाणामयं भागो मार्गदर्शकः समभूत् ।

सुभाषितत्रिशती सकलजनहृदयानन्दिनी सरस्वतीकण्ठरत्नावली सहृदयरञ्जकमेतन्नीतिज्ञानवैराग्यवर्णनमनन्तरनीतिकाव्यानामाद्यं निदर्शनम् । शैली तु निरुपमाना । तत्रत्योऽयं कालस्तवः—

**"सा रम्या नगरी, महान् स नृपतिः, सामन्तचक्रं च तत्
पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।**

---

1. M. Krishnamachariar, p. 143; भामहीयः 'काव्यालङ्कारः' II. 20.

उद्वृत्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥"1

वर्णनमिदं दृष्ट्वा केचन राजा भर्तृहरिः प्राभवभ्रंशेन विरक्तः सन्नेवमाहेति कथामकल्पयन्। वलभीराजास्थानकविरयं तद्राज्यविनाशानन्तरमेवं चिन्तितवानिति केचनावदन्। कविनाम्ना जगति विख्यातमिदं काव्यमक्षरास्यैराबालगोपालमाराधितमिति विदितम्। क्रियापदप्रयोगचातुरीविशिष्टमिदं वैराग्यशतकपद्यं भट्टिकाव्यं भर्तृहरिनिर्मितमेवेति मुक्तकण्ठं कथयति। अत्र द्वितीयं, भट्टिकाव्ये —

अशीमहि वयं भिक्षामाशावासो वसीमहि।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥2
पपात राक्षसो भूमौ रराट च भयङ्करम्।
तुतोद गदया चारिं तदुद्रावाद्रिणा कपिः ॥3

लोके धनस्यैव प्राधान्यमिति ज्ञापयति निम्नलिखितः श्लोकः। विशेषतोऽस्य तुरीयपादः सार्वलौकिकः—

"यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः, स श्रुतवान्, गुणज्ञः।
स एव वक्ता, स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ते ॥4

1. सु. त्रिशती. III. 14. (N.S P ed)-1957.
2. सुभाषितत्रिशती–III. 55 v. (p. 147.) N.S. Press, Bombay. (8th ed. 1957)
3. भट्टिकाव्यम्. IV. 81 (p. 365) N.S. Press, Bombay. (8th ed. 1934)
4. सुभाषितत्रिशती. I. 32 (p. 20) N.S,P. ed. (1957)

विषयलोलुपहृदये जुगुप्सामुत्पादयितुं शक्तास्य वाणी यथा–

"कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ।
चारभटचोरचेटकविटनटनिष्ठीवनशरावम् ॥1
वेश्याऽसौ मदनज्वाला रूपेन्धनविवर्धिता ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥2

ज्ञानयोगी सर्वशास्त्रपारङ्गतः सोऽयं शुद्धाद्वैती । तथापि शिवभक्तः । यथा –

"दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्यैकमानाय नमः शान्ताय तेजसे ॥"3

"महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगदन्तरात्मनि ।
न वस्तुभेदप्रतिपत्तिरस्ति मे
तथापि भक्तिस्तरुणेन्दुशेखरे ॥"4

लोकज्ञोऽयं चित्रमिति जीवतत्त्वमित्थं प्रकटयति –

"व्याघ्रीव तिष्ठति जरापरितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भः
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥5

भट्टिकाव्यं पाणिनीयसिद्धशब्दस्वरूपविज्ञानार्थं निर्मितमपि तस्मिन् कविताचातुरी दृश्यते यथा–

1. सुभाषितत्रिशती II. 60 (p. 91) N.S.P. ed. (1957)
2. सु. त्रिशती II. 59.
3. सु. त्रिशती. I, 1. (p. 2)
4. ,, III. 84 (p. 163) N. S. P. ed. 1957
5 सु, त्रिशती. III. 38. (N.S.P. ed. 1957)

"हिरण्मयी साललतेव जङ्गमा
च्युता दिवः स्थास्नुरिवाचिरप्रभा ।
शशाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली ॥"1

"न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलम्
न गुञ्जितं तन्न जहार यन्मनः ॥" 2

जगतीव्याप्तायां सुभाषितत्रिशत्यां कालक्रमेण केचन श्लोकाः प्रक्षिप्ता इत्यत्रेदमुदाहरणम् मुद्राराक्षसद्वितीयाङ्कश्लोकोऽयं विषयसारस्य लोभेन केनचित् त्रिशतीधैर्यपद्धत्यां प्रक्षिप्तः ।

"प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥"3

अपि च भर्तृहरिनीतिशतकश्लोकोऽयं वक्ष्यमाणः सुभाषितावल्यां माघकविचाटुरिव दृश्यते । तत्प्रामादिकम् । भर्तृहरेः परस्य माघस्यायं श्लोकस्तस्मिन् केनाप्यारोपितः स्यात् । तावता माघस्य चाटुश्लोक एव नीतिशतके प्रविष्ठ इति न मन्तव्यम् । सोऽयं श्लोकः । (चिन्त्यं सुधीभिस्तत्त्वम्)

---

1. भट्टिकाव्यम्. II. 47.
2. भट्टिकाव्यम्. II. 19.
3. सु. त्रिशती. I. 72. (p. 42) N.S.P. ed. 1957-
मुद्राराक्षसम्. II. 17.

"शीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना
माऽश्रौषं जगति श्रुतस्य विफलक्लेशस्य नामाप्यहम् ।
शौर्यं वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु मे सर्वदा
येनैकेन विना गुणास्तृणबुसप्रायाः समस्ता अमी ॥1

अस्य कालः

सन्दिग्धकालेष्वयमेकः । बहुभिः परिशोधितोऽप्यस्य काल–निर्णयस्तु विभिन्न एव । माघात्पूर्वो भारविः । तस्मात्पूर्वो भर्तृहरिरिति पण्डितसम्प्रदायः । दण्डिभारविभ्यां पूर्वमेव वाक्यपदीयं सञ्जातमिति डा, ए, बी· कीथ्प्रभृतयः पाश्चात्याः, पण्डितत्रिवेदिप्रमुखा आस्माकीनाश्च विमर्शकाः सम्भावयन्ति । त्रिशतीपीठिकायां तेलंगपण्डिताः क्रि. प्रथमद्वितीयशताब्दीमध्यगतो भर्तृहरिरिति निर्णीतवान् ।2 अन्ये केचनायं क्रि· पञ्चमशताब्दीमध्यगत इत्युक्तवन्तः । भर्तृहरिर्बौद्ध इति वदतां मतेऽयं कविः परोऽभवत् । तत्तदभिप्रायान् पुरस्कृत्यैव भर्तृहरिः शा· श· ३७० प्रान्ते स्थितवानित्यहं तर्कयामि । चरित्रज्ञाः परिशीलयन्तु ।

—०—

1· सुभाषितावली, 3073 (p· 508)

2· History of Sanskrit Poetics by Mm· Dr. P·V·Kane, pp. 74–75.

१६. वत्सभट्टिः

अयं कविः प्राचीनोऽप्यस्य काव्यं मृग्यम् । मन्दसारशासन-प्रशस्तिरेकास्य कृतिरवशिष्टा ।1 सा चैकपञ्चाशत्पद्यात्मिका फ्लीटुमहाशयसम्पादितगुप्तशासनेषु भद्रीकृता । मन्दसरसूर्यदेवालय-लब्धामिमां प्रशस्तिमयं कविः (मालवशके ५२६) शा॰ श॰ ३६५ मितवत्सरे निर्मितवान् ।2

प्रशस्तिपरिशोधकाः किलहॉर्न्, बूल्हरप्रभृतयः कालिदास–कवितामनुचकार वत्सभट्टिरित्यवदन् । सम्पूर्णप्रशस्तिर्न मया दृष्टा । सप्तश्लोकास्तु लब्धाः ।3 तेनाऽस्मिन् प्रशस्तिकाव्येऽपप्रयोगाः सन्तीति यदुक्तं बूल्हरपण्डितेन4 तदवगन्तुं न शक्यते । यदि "मनोज्ञवधव" इति प्रयोगः शब्दशास्त्रविरुद्ध इति तदभिप्रायश्चे–त्तदा प्रामादिकः स्यात् । पुरुषविशेषणरूपमिदं समस्तपदं न व्याकरणविरुद्धम् । मनोज्ञा वध्वः येषां ते मनोज्ञवधवः–सोऽयं प्रयोगविशेषः समुचित एव । प्रशस्तिश्लोकेष्विमे चत्वारः–

"केचित्स्वकर्मण्यधिकास्तथान्यै—
विज्ञायते ज्योतिषमात्मवद्भिः ।
अद्यापि चान्ये समरप्रगल्भाः
कुर्वन्त्यरीणामहितं प्रसह्य ।।
प्राज्ञा मनोज्ञवधवः प्रथितोरुवंशाः
वंशानुरूपचरिताभरणास्तथाऽन्ये ।

---

1. M, K. p. 95.
2. ,, ,,
3. डा॰ कृष्णमाचार्याणाम्. Cl. Skt. Lit. p. 95,
4. Dr. G. Buhler.

सत्यव्रताः प्रणयिनामुपकारदक्षाः
विश्रम्भपूर्वमपरे दृढसौहृदाश्च ॥
विजितविषयसङ्गैर्धर्मशीलैस्तथान्यै—
र्मृदुभिरधिकसत्त्वैर्लोकयात्रामरैश्च ।
स्वकुलतिलकभूतैर्मुक्तरागैरुदारै—
रधिकमभिविभाति श्रेणिरेवं प्रकारैः ॥
रामासनाथरचने दरभास्करांशु—
वह्निप्रतापसुभगे जललीनमीने ।
चन्द्रांशुहर्म्यतलचन्द्रनतालवृन्त —
हारोपभोगरहिते हिमदग्धपद्मे ॥"[1]

श्लोकोऽयं तुर्यः, ऋतुसंहारपञ्चमसर्गस्थं "निरुद्धवाताय-नमन्दिरोदरम्" इत्यादिकं, न चन्दनं चन्द्रमरीचिशीतलम्[2] इत्यादिकं चानुकरोतीति यदुक्तं किल्हार्नपण्डितेन तदनुचितम् ।[3] अनुकरणमन्वेष्टुं यततां सर्वेषां काव्येषु तद् दृग्गोचरं भवत्येव । वत्सभट्टिस्तन्मते महाकविर्माभूत् । कविरिति वक्तुमियं प्रशस्तिरलम् ।

1. M. K. pp. 95-96.
2. ,, ,, 96.
3. ऋतुसंहारम्. V. 2-3 vv

(२०) चन्द्रगोमी

बौद्धः सोऽयं कविर्महान् वैयाकरणः, यस्तु स्वनाम्ना चान्द्रं व्याकरणमकरोत् ।1 शा. ४०० प्रान्तवर्तिनाऽनेन तारासाधन-शतक–शिष्यलेखाधर्मकाव्ये विरचिते । अत्र द्वितीयं नीतिज्ञान-बोधनात्मकम् । एतन्निर्माणविषये चैका कथा –

**"रत्नकीर्तिनामा सामन्तराजश्च चन्द्रगोमिनमवमानितवान् ।
हितमुपदिशन्निदं काव्यमयं विरच्य तस्मै प्रेषितवानिति ।।"**

काव्यमिदं रशियादेशे प्रकाशितम् ११४ श्लोका अस्मिन् सन्तीति च श्रूयते ।2 वल्लभदेवस्य सुभाषितावल्यां दृश्यमानमिदं श्लोकद्वयं तत्काव्यान्तर्गतमिति परिशोधका भावयन्ति ।

**"विषस्य विषयाणां च दूरमत्यन्तमन्तरम् ।
उपभुक्तं विषं हन्ति विषयाः स्मरणादपि ।।"**

**केचिद्भयेन हि भजन्ति विनीतभाव—
मन्ये जना विभवलोभकृतप्रयत्नाः ।
केचिच्च साधुजनसंसदि कीर्तिलोभात्
सद्भाववान् जगति कोऽपि न साधुरस्ति ।।3**

काशिकावृत्तिकर्ता जयादित्येनायं कीर्तितः । तेनास्य व्याकरणस्य विद्वल्लोके व्याप्तिरस्तीति विदितम् । अस्य व्याकरणं

---

1. M, K. p. 314,
2. M. Krishnamachariar, p. 314
3. सुभाषितावली; 3368; 3449 vv. M. K. p. 315.

सर्वथा पाणिनीयानुसरणमपि, तेनासाधिताः शब्दरूपा बह्वोऽनेन साधुत्वेन साधिताः। तस्मादेवेदं व्याप्तं तत्काले। तदिदं तत्कृति-मङ्गलाचरणपद्यम्।

"सिद्धं प्रणम्य सर्वज्ञं सर्वीयं जगतां गुरुम्।
लघुविस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम्॥"

— o —

(२९) बुद्धघोषः

अयं बौद्ध इति नामैव वदति। विद्वान् कविरयं पद्यचूडामणिनामकं[1] दशसर्गं काव्यं प्रणीतवान्। अश्वघोषस्य बुद्धचरितमिवेदमपि गौतमबुद्धप्रशंसात्मकम् इदमधुनैव पाठकानां दृष्टिपथं गतम्। कवेरस्य समयः क्रि· ३३७, ३८७, ४८३, ५५०, ६००, इति विभिन्नानि मतानि सन्ति। बौद्धमतग्रन्थसम्पादनार्थमयं सीलोनदेशं गत इत्युक्तवतां ग्रे-जॉनू-सेनवरत्ने[2]-प्रमुखानां तत्कालनिर्णये नैकमत्यं सञ्जातम्। पद्यचूडामणिनवमसर्गः शिशुपालवध–द्वितीयसर्ग इवाभातीति मत्वा, केचन माघादयं पर इत्यचिन्तयन्। सेनवरत्नेपण्डितपरिशोधनं समञ्जसमिति बुद्धचा बुद्धघोषः शा. ४०५ प्रान्तवर्तीति बहवो विश्वसन्ति। नायं माघकवितानुकारीत्येतद्ग्रन्थप्रकाशकानां सयुक्तिकं विमर्शनमाविष्करोति। तथापि शा. ३०९ प्रान्तवर्त्ययमिति वादस्तु प्रबलः। पाठकाः प्रमाणमत्र।

कविरयं ललितविस्तर-बुद्धचरितादिपूर्वकाव्यानि निरीक्ष्यैव कृतिमिमां बभाण। तथापि तैरनुक्ताश्चरित्रांशाः केचनास्मिन् स्फुरन्तीत्यत्र नाक्षेपः। अस्य कविता सरसा शैली च हृदयङ्गमा। यथा –

"यदीन्द्रनीलोपलकुट्टिमेषु
प्रविष्टबिम्बा प्रथमेन्दुलेखाम्।
मृणालखण्डस्पृहया मरालाः
चञ्चूपुटैश्चुम्बितुमुत्सहन्ते॥

---

1. M. K. p· 129.
2. Edited by Prof. M. Rangachariar & Sri. S. Kuppuswamisastri. 1921.

ररांज तस्या नवरोमराजि–
रारोहतस्तुङ्गपयोधराद्रिम् ।
शृङ्गारयोनेरवलम्बनार्थ -
मालम्बितेन्दीवरमालिकेव ॥

कृताभिषेकाः प्रथमं घनाम्बुभिः
धृतोत्तरीयाः शरदभ्रसंचयैः ।
विलिप्तगात्र्यः शशिरश्मिचन्दनैः
दिशो दधुस्तारकहारयष्टिकाम् ॥"1

1. M. K. p. 131. पद्यचूडामणि-II. 15; IV. 23; V. 47.

(२२) रणादित्यः

काश्मीरपालकोऽयं राजकविः । अस्य महिमा राजतरङ्गिण्यामभिवर्णितः कल्हणेन ।1 सोऽयं कारणजन्मा राजयोगी । चरित्रात्मिका राजतरङ्गिणी प्रमाणिकी परिशोधकानाम् । तदस्य राज्यकालस्त्रिशतवत्सरपरिमिता इत्युक्तिर्न विचारणीयाऽस्माकम् । अस्य राज्यसमाप्तिकालस्तु शा. ४४२ प्रान्त इति तद्वचनाद्विज्ञेयो भवति ।2

सोऽयं काश्मीरपालकेषु द्वितीयस्तुञ्जीनः । अस्य भार्या रणरम्भा । सा रतिसेननाम्नश्चेलराजस्य तनया । अनयोर्दम्पत्योः प्रथमः पुत्रो विक्रमादित्यनामा, द्वितीयस्तु बालादित्यापरनामा प्रतापादित्यः ।3 एतौ द्वावपि क्रमात्परिपालकौ । एतेषां प्रसक्तिः पुनरुत्तरत्राऽयास्यति ।

रणादित्यो विद्वान्, कविः, कविपोषकश्च । न काप्यस्य कृतिर्दृग्गोचरा । तथापि क्षेमेन्द्रादिभिर्निजग्रन्थेषूदाहृताः, सुभाषितावल्यादिसङ्कलनग्रन्थैः संगृहीताश्च केचन श्लोका अवशिष्टाः । तत्र द्वाविमौ—

"त्वन्मुखचन्द्रनिरीक्षणवर्त्मा
यः सुतरामिह निर्मलनेत्रः ।
सर्वजनस्य पुरः स्थितमेतत्
सोऽन्तकवर्त्म न पश्यति चित्रम् ॥"4

1: राजतरङ्गिणी-III. 386. v. onwards.

2. M. K. P. 386.

3. Sbhv. Intro. p. 96.

4. सुवृत्ततिलकम्-II. under कारिका 10 .(p.8)–(1933)-Benares.

"यद्यप्युन्नतवंशवान्नवसुधाधामाभिरामं वपुः
सम्प्राप्तोऽतिशयस्वभावसुभगच्छायः सतां तापहृत् ।
तत्राप्येष विसंस्थुलस्थितिरहो लक्ष्मीं निजात्मोचितां
प्रायश्चक्रिकया विना न लभते पश्यातपत्रं यथा ॥"1

1. Sbhv. 3075 v.

(२३) सुन्दरपाण्ड्यः

पाण्ड्यमण्डलपालकोऽयं राजा मधुरापुरवासी । अरिकेसरि-राजशासनेष्वयं पाण्ड्यराज्यस्थापक इति वर्णितः ।1 एतन्निर्मित–नीतिद्विषष्टिका2 श्लोकाः पञ्चतन्त्रे विष्णुशर्मणा संगृहीताः । तस्मादयं शा॰ ५०० प्रान्तवर्तीति तर्कयन्ति केचन विमर्शकाः ।

आत्मनो नीतिद्विषष्टिका सुकविस्तुतिपात्रमभवदित्यनेनैवोक्तमेवम् –

"इमां काञ्चनपीठस्थां समेत्य कवयो भुवि ।
आर्यां सुन्दरपाण्ड्यस्य स्नापयन्ति वधूमिव ।।"3

एतत्काव्यमार्यावृत्तबन्धुरम् । द्विषष्टिश्लोककलितम् । श्लोकास्तु लोकज्ञानबोधका, नीतिदायका मनोहराश्च । तत्र मनोहरेषु पद्येष्विदमेकम् –

"सह वसतामप्यसतां, जलरुहजलवद्भवत्यसंश्लेषः ।
दूरेऽपि सतां वसतां, प्रीतिः कुमुदेन्दुवद्भवति ।।"4

---

1. M. K. p. 3;3.
2. Edited by पण्डितसूर्यनारायणतीर्थ-Madras, 1928.
3. M. K. p. 314; नीतिद्वि. 116 v. (p. 29)
4. नीतिद्विषष्टिका. 108 v. (p. 28)

(२४) भारविः

किरातार्जुनीयकर्ता प्रौढकविरयमुत्तरदेशीयो, दाक्षिणात्यः, आन्ध्रदेशीय इति भिन्नमतानि सन्ति। एतत्सम्बन्धिन्यः कथा सर्वत्र व्याप्ताः। विद्वत्परम्पराप्राप्ता काचन कथाऽद्यापि विद्वद्गोष्ठीषु प्रचलति त्रिलिङ्गदेशे। तत्त्वं जानाति दैवम्। तथापि पाठकप्ररोचनार्थं संग्रहेण कथ्यतेऽत्र सा कथा 1

अष्टादशवर्षप्राय एवायं पाणिनीयविज्ञानेन साहित्येन, कवित्वेन च सुहृद्रञ्जकोऽभवत्। एकदा बन्धवोऽस्य पितरमुपागत्य सम्भाषणवशात् 'भवान् पुण्यशाली। विद्वत्कविख्यातिमायाति भवत्पुत्रः, सभापूज्यो भविष्यत्यचिरम्' इत्यस्तुवन्। पुत्राभ्युदयकांक्षी स पिता कुमारकीर्तनानुमोदनमनुचितमिति मत्वा, "नेतावताऽयं युष्मादृशानां स्तुतिपात्रम्। किमयं जानाति क्षीरकण्ठः? अद्य पठति शास्त्राणि पठनीयं चामितमस्तीति प्रत्युक्तवान्।

अनन्तरं भारविः स्वाभ्युदयमसहमान इव दृश्यते पितेत्यालोच्य, तस्मिन् जीवत्यात्मनः कीर्तिर्नायातीति निश्चित्य, पितुर्वचनानि मात्रे निवेद्य, तानि प्रेमपूर्वकवचांसि इति तन्मुखतः श्रुत्वापि चित्तशान्तिमनासाद्याऽयमेकदा पितृभोजनसमयात्पूर्वमेकमुपलमादाय, कुड्योपरिभागे प्रच्छन्न उपाविशत्। जनके भुञ्जाने सति जननी, बन्धुकृतामात्मनः प्रशंसां भवन्तो न सहन्त इति कुमारश्चिन्ताक्रान्तोऽभवत्; किमेतच्चित्रमिति तमब्रवीत्। तदा हसन् पिता "हन्त! त्वमपि मतिहीनासि। अस्मत्कुमारस्य प्रज्ञास्माकं न स्तुत्या, परकृता स्तुतिरपि नानुमन्तव्या। तेन तथा वदामि किन्तु जानामि वंशवर्धनो भविष्यत्यस्मद्बाल इत्यवोचत्। तदाकर्ण्य

1. For various, versions, see M. K. p. 149-50.

भारविर्विस्मितः पापचिन्तनभीतः कुड्यादवरुह्य मार्गान्तरेण भोजनशालां प्रविश्य पितुः पुरः स्थित्वा "तातपादाः ! पूज्यचरणान् हिंसितुमुद्यतस्य किं दण्डनं निहितमिति पप्रच्छ निर्विकारम् । अज्ञातकुमारोद्योगः स पिता तादृक् पापवृत्तेः श्वशुरगृहे षण्मासवसतिर्महती निष्कृतिरित्युवाच । तदायं मद्दोषं विज्ञायाऽनेन सूक्ष्मदण्डनं विहितमिति मनस्याशङ्क्य, कटिबद्धोत्तरीयं साष्टाङ्गं प्रणम्योत्थाय, बद्धाञ्जलिः सोऽहं तादृशः पापी, क्षम्यतामित्युक्त्वा, तदानीमेव श्वशुरगृहनिवासदीक्षां सङ्कल्प्य तद्ग्रामं ययौ ।

अचिन्तितागमनं जामातरं श्वश्रूश्वशुरौ श्यालकाश्च सम्भावयामासुः । उपदशा दिवसा गताः । नायं स्वग्रामं गन्तुकाम इव दृष्टः भाषणे भोजने च मन्दीभूतं गौरवम् । क्रमशः परोक्ष–निन्दावचनानि शृण्वन्नप्यशृण्वन्निव लज्जां परित्यज्य, मानमुत्सृज्य कर्मफलमवश्यमनुभोक्तव्यमिति हृदयमाश्वासयन्, यथापूर्वं ग्रन्थानवलोकयन्, श्लोकान् रचयन् कालमक्षिपत् । द्वौ मासौ गतौ । अनन्तरं श्वशुरादिभिर्निर्दाक्षिण्यमभिहितानि विविधानि कार्याण्याचरन्, मासद्वयमगमयत् । ततः श्वशुरेणायं यावनालसस्यरक्षणे नियुक्तः । सविनयं तत्र गत्वा भारविः सस्यक्षेत्रमभितः संचरन् पशून् पक्षिणश्च सञ्चालयन् तत्कर्मणि जागरूकोऽभवत् । कस्मिंश्चिद्दिने एकस्मिन् मञ्चे उपविश्य तदा कल्पितम् –

"सहसा विदधीत न क्रियाम्
अविवेकः परमापदां पदम् ।[1]
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ।।"[2]

---

1. श्लोकोऽयं पश्चात्किरतार्जुनीये प्रविष्ट इत्येको वादः । किरातार्जुनीयरचनं तत्काल एवारब्धम् । तत्रत्योऽयं श्लोक इत्यन्यो वादः ।

2. किरातार्जुनीये : II. 30. v.

इति श्लोकं तालपत्रे लिखित्वा, पुनः सस्यं पश्यति सति आसन्नयौवना मलिनवसना दीनानानाऽस्य भार्या मन्दं मन्दं तत्रागत्य, समानीतमन्नपात्रं मञ्चे निधाय नम्रमुखी साश्रुपातं पार्श्वतः पश्यन्तीं स्थत्वा तदायं कविरुद्विग्निमानसोऽपि धैर्यमवलम्ब्य, भोजनार्थं गृहं गन्तुमपि नार्हामि। आसायमत्रैव स्थातव्यं मयेति श्वशुरश्चर्यां कथयति। अहमिव सेयं मुग्धापि गृहे दुरवस्थामनुभवतीति स्पष्टम्। अहो दण्डनम्! मानिनामिदं षण्मासिकी नित्यमृतिः इति सञ्चिन्त्य, 'बाले! किं रोदिषि? कर्मानुभवार्थमहमागतस्ते पितृगृहम्। अनुभवश्च समाप्तप्रायः। इदं पत्रं ग्रामेऽस्मिन् यो महान् धनिकस्तस्मै वणिजे विक्रीणीष्व। स च किमपि धनं दास्यति। तद्विनियुज्य भवदिष्टं वस्त्रादिकं क्रीणीष्व, निर्विचारं गच्छेत्युक्त्वा तत्पत्रं ददौ। सा च ग्रामं गत्वा धनगुप्तनाम्ने वणिजे तद् ददौ। स तु तच्छ्लोकार्थं ज्ञात्वाऽतीव सन्तुष्टः शतं निष्काणि प्रायच्छत्। सा बाला भर्तृमहिमानं विज्ञाय मुमुदेऽन्तरङ्गे। एवं क्लेशमनुभूय पापान्निर्मुक्तो भारविः सप्तममासप्रथमदिवसे भार्यया साकं स्वगृहमागत्य पितृसेवां कुर्वन् सुखमनुबभूव सुचिरम्। कालान्तरेण द्वीपान्तरागतः स वणिगेकशय्यागतौ भार्याकुमारौ दृष्ट्वा, स परपुरुष इति भ्रान्त्या तौ हन्तुमिच्छन् खड्गमुन्नीय, तदा खड्गोपरि चलन्तं सहसेति श्लोकपत्रं दृष्ट्वा तामुत्थाप्य सत्यं ज्ञात्वा, तत्पापकृत्याद्विररामेत्यनुबन्धकथा चास्ति—

कालिदासादिमहाकवीनामारोपितकथा इवेयमपि केनापि कल्पितेति स्पष्टम्।

अथ भारविवंशचरितम् :—

इदमवन्तीसुन्दरीकथायां, तत्सारे च वर्णितमपूर्वम्। तत्कथा भोजप्रबन्ध इव चाटुकथाराशिरिति तत्त्वज्ञानां विदितमेव। तथापि यत्किञ्चित् —

अयं भारविर्नारायणस्वामिनः पुत्रः। प्रथमतोऽस्य नाम दामोदरः। सोऽयं कौशिकगोत्रः। उत्तरहिन्दूदेशे वायव्यभागे स्थितमानन्दपुरमस्य पितृपितामहादीनामावासः। अस्य पिता तत्पुरान्नासिक्यदेशमागतः।

सिंहविष्णुनामा काञ्चीपुरनाथः कविगोष्ट्यां भारवेः कविताचातुरीं विज्ञाय, तं सम्मानितवान्। तेन तत्कुमारस्य महेन्द्र-(विक्रमस्य) वर्मणोऽयं परममित्रमासीत्। (विष्णुवर्धन इत्यन्यः पाठः)

भारवेस्तनयो मनोरथः। तत्पौत्रः प्रसिद्धो दण्ड्याचार्यः- इत्यादि1 अत्राऽयं विचारः। महाकविर्भारविराचार्यस्य दण्डिनः प्रपितामह इति कथनं यदि सत्यं तत् सर्वेषां मुदावहं स्यादेव2। न तद् भाग्यमुपलब्धम्। दण्डिनाप्ययं स्वग्रन्थेषु कुत्रापि न स्मृतः। वस्तुतस्तु अनयोस्तावान् कालव्यवधिरपि न दृश्यते अन्यच्च नैकेनापि किरातार्जुनीयव्याख्यात्रास्य दामोदरनामोट्टङ्कितम् अपि चास्य पोषको

1. M. K. pp. 147-49.

2. कौशिकगोत्रस्य नारायणस्वामिनः पुत्रः दामोदरस्वामी। अस्य दामोदरस्वामिनः "सिंहविष्णुः, मनोरथः, अतिलोभः" चेति त्रयस्तनयाः। तेषु मध्यमस्य मनोरथस्य दामोदरः, भवदासः, सिंहविष्णुः, वीरदत्तः इति चत्वारः सुताः। तत्र वीरदत्तः गौर्यां दण्डिनामानं सुतमविन्दत। एष एव अवन्तीसुन्दर्यादीनां प्रबन्धानां निर्माता।

"को हि नाम भगवतीं भवितव्यतामतिक्रम्य यथासभीहितेन साधयति पथा, यतः कौशिककुमारो, महाशैवं महाप्रभावं गवां प्रभवं प्रदीप्तभासं भारविं रविमिवेन्दुरनुरूप्यदर्शं इव पुण्यकर्मणि विष्णुवर्धनाख्ये राजसूनौ प्रणयमन्वबध्नात्।"

आचार्यदण्डिनः-अवन्तीसुन्दरी (10 पृष्ठे)-अनन्तशयनसंस्कृतग्रन्थावलिः ग्रन्थाङ्कः 172 (1954)

राजा महेन्द्रवर्मेति न सूचितम् । किमु वक्तव्यम् ? ईदृशानि चाटु-वचनानि चरित्रप्रमाणानि न भवन्ति खलु ।

अस्य कालः

ऐहोलशासनगतं "येनायोजि न वेश्म[1] इत्यादि पद्यं कालिदासजीविते विमृष्टम् । भारविकालिदासौ रविकीर्तेर्न समकालाविति च निर्णीतम् ।

माघकवेर्भारविः पूर्वं इति अयमुद्भटश्लोकः स्पष्टं कथयति । बहुभिश्चाङ्गीकृतोऽयं विषयः —

"तावद् भा भारवेर्भाति यावन्माघस्य नोदयः ।
उदिते च पुनर्माघे भारवेर्भा रवेरिव ॥"[2]

अवन्तीसुन्दरीकथायां दामोदरस्वामी भारवि इत्येतौ द्वावपि भिन्नावित्युक्तम् । 'महाशैवम्, महाप्रभावम्, गवां प्रभावम्, प्रदीप्तभासम्' इति दण्डी भारविमवर्णयत् । भारविः दामोदरस्वामिनं प्राच्यचालुक्यान्वयस्य कूटस्थस्य विष्णुवर्धनाख्यस्य राज्ञः सकाशमनयत् । तयोर्मैत्री समजायत । एष दामोदरः गाङ्गेयकुलध्वजेन दुर्विनीतेनापि समादृतः । स दामोदरः सिंहविष्णुनाम्ना पल्लवराजेन आहूतः काञ्चीनगरमगच्छत् । तत्रैव च स निवासमकरोत् । अस्य दामोदरस्य प्रपौत्रः एव आचार्यदण्डी प्राच्यचालुक्यप्रभोर्विष्णुवर्धनः, गाङ्गवंशजो दुर्विनीतः, पल्लववंश्यः सिंहविष्णुः, महाकविः भारविः दण्डिनः प्रपितामहः दामोदरस्वामी एते सर्वे क्रि. षष्ठशताब्दस्य उत्तरार्धे व्यलसन्निति ज्ञायते ।

1. M. K. p. 149. Epigraphia Indica, vol. VI. p. 1.
2. ,, ,, 151.

दण्डिनः पूर्वोऽयमिति विषयः सर्वसम्मतः । तथा च किरातार्जुनीये प्रतिभटकिरातवर्णनं दृष्ट्वा दण्डी लक्षणमिदमुक्तवानिति च विदितं भवति —

"वंशवीर्यप्रतापादीन् वर्णयित्वा रिपोरपि ।
तज्जयान्नायकोत्कर्षकथनं च धिनोति नः ।।"1

तस्माद्भारविः शा. श. पञ्चमशताब्दीमध्यकाले (४५०) समासीदिति भावनं सुसङ्गतं स्यात् ।

अथ तत्काव्यम्

काव्येऽस्मिन् वर्णिता पाण्डवारण्यकथा, नायकोऽर्जुनः । प्रतिभटः किरातवेषधारी महेश्वरः । वीरः प्रधानो रसः । शृङ्गारादिरसोऽङ्गम् । दिव्यास्त्रलाभः प्रयोजनम् । अष्टादशसर्गात्मकेऽस्मिन्नादिमं सर्गत्रयं पाषाणत्रयमिति विद्वल्लोकप्रतीतिः । तदर्थमेव सूचयतीदं मल्लिनाथसूरिवचनमपि —

"नारिकेलफलसम्मितं वचो, भारवेः सपदि तद्विभज्यते ।"2
उपमा कालिदासस्य भारवेरर्थगौरवम् ।।3

इत्याद्यार्योक्तिरपि तदेव समर्थयति । "प्रकृतिमधुरा भारविगिरः"4 इत्युक्तिरस्य काव्यमाधुर्यं प्रकटीकरोति । पञ्चम-

---

1. काव्यादर्शः-I. 22. (Poona-1924)

2 किरात. 1. उपोद्घात. v. 6.

3. M. K. p. 152.

4. सदुक्तिकर्णामृतम्. Vide Peterson's Introduction (p. 57) to the सुभाषितावली. (1886).

सर्गारम्भेऽयं हिमालयमवर्णयत् यथा कालिदासः कुमारसम्भवे। ऋतुगिरिकाननादिप्रकृतिवर्णनानि, जलक्रीडापुष्पापचयादिवर्णनानि च मनोहराणि सन्त्यस्मिन्। काव्यं यमकादिशब्दालङ्कारप्रायमप्यर्थगम्भीरं रसगर्भनिर्भरं सदेकनाथ-जोनराज - नरहर्यादिमहापण्डितानाचकर्ष व्याख्यानाय। तत्रापि मल्लिनाथनिर्मितघण्टापथेन देशदेशान्तराणि जगाम। आजननमद्यापि सर्वतः पठनपाठनव्यवहारे प्रचुरस्यास्य काव्यस्य "भारवि" इति नामैव रूढम्। प्रतिसर्गमन्तिमश्लोके लक्ष्मी-वाचकपदस्य प्रयुक्तत्वादस्य लक्ष्मीपदलाञ्छनमिति यशः सञ्जातम्। तेनाऽयं कविर्लक्ष्मीभक्त इति, कोल्लापुरप्रान्तवासीति चाभिप्रायः स्फुरति विमर्शकलोके। न केवलं सर्गान्तिमश्लोकेषु अन्यत्राप्ययं लक्ष्मीशब्दं प्रयुक्तवान्। शोभार्थे लक्ष्मीपदप्रयोगस्येदमुदाहरणम् —

"उत्फुल्लस्थलनलिनीवनादमुष्मा -
दुद्भूतः सरसिजसम्भवः परागः।
वात्याभिर्वियति विवर्तितः समन्ता-
दाधत्ते कनकमयातपत्रलक्ष्मीम्॥"[1]

अनेनायं छत्रभारविख्यातिं च गतः।
"तादात्म्यं भावरसयोः भारविः स्पष्टमूचिवान्॥"

इति भावप्रकाशकर्त्रा शारदातनयेनायं विनुतः। अपरेण पण्डितेनायमेवं कीर्तितः –

"प्रदेशवृत्त्यापि महान्तमर्थं
प्रदर्शयन्ती रसमादधाना
सा भारवेः सत्पथदीपिकेव
रम्या कृतिः कैरिह नोपजीव्या॥"[2]

1. किरात. V. 39.
2. भारतचरितम् (कृष्णकविनिर्मितम्-1925)

एवं मृदुमधुरगम्भीरा कवितारीतिः जगद्विदितापि द्वौ श्लोकावत्र –

"शुचि भूषयति श्रुतं वपुः, प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः, स नयापादितसिद्धिभूषणः ॥1
जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥"2

एतत्काव्यात्मना शाश्वतजीवी, सकलशास्त्रविज्ञाता, नीतिपारदृश्वा लोकज्ञोऽयं कविशेखरो भारविः ।

–०–

1. किरात. II. 32.
2. तदेव. XI. 32.

(२५) विष्णुशर्मा

सारस्वतसारज्ञो नीत्यर्थशास्त्रपारदृश्वा लोकज्ञानी महानयं पुरुषः पञ्चतन्त्रनामकं ग्रन्थं प्रणिनाय। इदं नमस्काररूपमङ्गलाचरणमेवास्य नयशास्त्रविशारदत्वं प्रकाशयति –

"मनवे वाचस्पतये शुक्राय पराशराय ससुताय।
चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः॥"1

अस्य मते नेदं काव्यम्। किन्तु शास्त्रमेव यथा—

"सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम्।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम्॥"2

सत्यमिदं सुमनोमनोहरं शास्त्रम्। यतः पण्डितपामरसाधारणतया विज्ञेयं पाठ्यं, श्राव्यं सदाऽनन्ददायकं चित्रविचित्रकथोपेतम्।

दक्षिणात्यमहिलारोप्यपुरपालकस्यामरशक्तिनरनाथस्य प्रार्थनया दुर्विनीतांस्तत्सुतान् नीतिं बोधयितुमयं कविरिदं चकारेति अवतारिका कथयति। तेनाऽयं दक्षिणदेशीयोऽमरशक्तिराजास्थानविद्वत्कविरिति वक्तव्येऽपि विमर्शकलोकेऽस्य विषयस्य चरित्रदृष्ट्या प्राधान्यमेव न दृश्यते। तत एतत्कथनमर्थवादरूपं वा सत्यं वेति निर्णेतुं न शक्यते।3

1. पञ्च. 1. 2.
2. तदेव. 1. 3.
3. Dasgupta, p. 88; A. B. Keith; p. 248.

ग्रन्थोऽयं कासांचिद् बृहत्कथाकथानां वचनरूपः संग्रहानुवादोऽपि स्वतन्त्र इवाभाति । अनेन मनुस्मृत्यादिपूर्वग्रन्थेभ्यो बहवः श्लोका संगृहीताः । कालक्रमेणास्मिन्नर्वाचीनकविश्लोका अपि केचन प्रक्षिप्ताः । अत्रेदं निदर्शनम् –

दामोदरगुप्तः शा. सप्तमशताब्द्यन्तर्गतः । तन्निर्मितः "पर्यङ्कः स्वास्तरणः पतिरनुकूलः"1 इत्यादिकुट्टिनीमतश्लोकः प्रथमतन्त्रे2 दृश्यते । अन्यच्च, शा. अष्टमशताब्दीमध्यगतो रुद्रभट्टः । तद्रचितः "सार्थमनोरथशतैरित्यादि" शृङ्गारतिलकश्लोकोऽत्र चतुर्थतन्त्रे दृश्यते । कविकालदृष्ट्या ग्रन्थपरिशोधनं कुर्वतामयं विषयो दृग्गोचरो भवेत् । सि. पि. ब्राउन् पण्डितोऽप्याह "इंग्लण्ड-जर्मनीदेशयोर्मुद्रितात्पञ्चतन्त्राद्भरतखण्डे मुद्रितमाधुनिकं पञ्चतन्त्रं क्वचित् क्वचिद्भिद्यत इति । नौ षेर्वानीनाम्नि पारसिकराजे राज्यं कुर्वति सति (क्रि. ५३१-५७९) पञ्चतन्त्रं पह्लवीभाषायां परिवर्तितमिति विदितत्वात्तत्कालादिदं पूर्वमिति स्पष्टम् ।3 दौर्मन्त्र्यान्नृपतिः"4 इत्यादिभर्तृहरिसुभाषितश्लोकोऽस्मिन् दृश्यते इत्यनेनेदं तत्परमिति स्पष्टम् । अयं श्लोकः पश्चादस्मिन् प्रविष्ठ इति क्रि. द्वितीयशतकप्रान्त इदमुत्पन्नमिति च" केषांचिन्मतं श्रूयते । तस्मादस्य कालः सुनिश्चितो न भवति । तथापि शा. पञ्चमशताब्दीमध्यकालात् (शा. ४५०) किञ्चित्पूर्वं एव विष्णुशर्मा न तस्मात्पर इति वक्तुं शक्यते ।

परभाषासु परिवर्तनं गतानि संस्कृतकाव्यानि बहूनि सन्तु नाम । पञ्चतन्त्रवद् बहुभाषासु परिवर्तनं तु न दृश्यते । अस्य

1. सुभाषितावली, p. 2. 342 v.
2. पञ्चतंत्र, p. 273. 1 v-1950.
3. M. K. p. 423; S. K. De, p. 87.
4. भर्तृहरिसुभाषितसंग्रहः, v. 23 (p. 10) 1948.

तावद् द्विशतसंख्याकैः पञ्चाशद्विदेशभाषासु परिवर्तनमिति हेर्टेल्-पण्डितस्योक्तिरत्र प्रमाणम् ।1 कृतिमेनामनुसृत्योदितानि नीति-काव्यानि बहूनि । तत्तथास्ताम् । पञ्चतन्त्रकाव्य-पञ्चतन्त्रकाव्य-दर्पण-पञ्चोपाख्याननामभिः संक्षेपपञ्चतन्त्राणि च सन्ति । एतेष्व-न्तिमकृतिकर्ताऽनन्तभट्टः । तस्योक्तिरियम् ।

"पदवाक्यप्रमाणज्ञोऽनन्तभट्ट इति श्रुतः ।
भट्टश्रीनागदेवस्य तनूजः काण्वशाखिनः ॥
कौतुकात्तन्यते तेन पञ्चोपाख्यानसंग्रहः ।"2

एतेनास्य शास्त्रस्य पञ्चोपाख्यानं इति नामाप्यस्तीति ज्ञायते । अयं भारतचम्पूनिर्मातुरन्यः ।

सुलभगद्यकाव्यनिर्माणेऽनन्तरकवीनां मार्गदर्शकस्य विष्णु-शर्मणः काव्यमिदमेकमनेकदेशीयानां संस्कृतविद्याभिलाषिणां हस्त-भूषणं, वाग्भूषणं सद्विराजत इति पुनरुक्तिः पण्डितपामरसाधारणतया श्राव्यं पाठ्यं च सदानन्ददायकं चित्रविचित्रकथोपेतमिदं विरच्य, विष्णुशर्मा स्तुतेरतीत आसीत् । अत्र द्वौ श्लोकावस्य —

"मातृवत्परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥

विवादेऽन्विष्यते पत्रं तदभावे तु साक्षिणः ।
साक्ष्यभावात् ततो दिव्यं प्रवदन्ति मनीषिणः ॥"3

1. Dr. S. K. De. p. 86; M. K. p. 423.

2. M. K. p. 428.

3. पञ्चतन्त्रम्, p. 124, vv, 435-436.

(२६) शूद्रकः

अयमेकतमो राजकविः कविराजश्च। अवेद्यतत्त्वमप्येतच्चरितं विदुषो विमर्शकांश्चाकर्षयत्येवादितः। तद्यथा–सूक्तिमुक्तावलीचाटुश्लोक एवं कथयति —

"तौ शूद्रककथाकारौ वन्द्यौ रामिलसोमिलौ।
ययोर्द्वयोः काव्यमासीदर्धनारीश्वरोपमम् ॥"1

एवमेव शूद्रकं नायकं कृत्वा पञ्चशिखो नाम प्राकृतभाषा–कविर्वैक्रान्तशूद्रकमज्ञातनामा कश्चन शूद्रकचरितं चारचयत् इति ज्ञायते। श्रृङ्गारप्रकाशकाव्यानुशासनादिषूदाहृतैर्वाक्यैर्यथा शुको जरद्गिरः शूद्रककथायां हरिमतीवृत्तान्ते। यथा (भो· श्रृ· १८)—

"सम्भ्रान्तस्त्वरितमसौ मलिम्लुचाना-
मुर्वीशः शमितमयोधयद्धनुष्मान्
कालेऽस्मिन् विनयवती वनेषु चार्ता
वार्तायै कमितुरितस्ततो जगाम ॥"2

आनन्दः पञ्चशिखस्य शूद्रककथायां (हेम· का.)।3 अपि च राजनीतिज्ञोऽयं शूद्रको ब्राह्मणः शालिवाहनस्य परमं मित्रम्। स त्वेकदा विक्रमादित्यं जित्वा प्रभुरासीदुज्जयिन्याः। तदनन्तरं तत्कुमारः शक्तिकुमार उज्जयिनीमपालयत्। तस्मिन् मृते सत्य-

---

1· सूक्तिमुक्तावली, p· 43, v. 49·

2· M. K· pp. 573-74.

3. हेमचन्द्राचार्याणां 'काव्यानुशासनम्' M.J.V.P. Bombay-1938. p· 388. M. K. p. 574.

यमुज्जयिनीपालकः समभवत्। इत्यनन्तकविर्वीरचरिते वर्णितवान्।1 एतादृशरचनेषु पर्यालोचितेषु तत्तत्कवीनामयमतीव पूर्व इति शौर्यशालिनोऽगाधसत्त्वस्य चरितानि कालक्रमेण महिमाभिरामतया देशव्याप्तानि बहुविधं वर्णितानीति च ज्ञायते। अन्यच्च विख्यातमहाकविग्रन्थेष्वप्यस्य चरितं विभिन्नमेव दृश्यते।

शूद्रको विदिशापालक इति कादम्बरी कथयति। शोभावतीप्रभुरिति कथासरित्सागरः, वर्धमानपुरनाथ इति वेतालपञ्चविंशतिः, चकोरराजस्य चन्द्रकेतोः शत्रुरिति हर्षचरितम्। विक्रमादित्यशूद्रकप्रवरसेना महाधैर्यसम्पन्ना इति च राजतरङ्गिणी आचष्टे2। एवं स्थिते कस्य वचनं विश्वसनीयम्? कथं निर्णयः? पूर्वकविवाक्येष्वेवं विभिन्नेषु भ्रान्तिजनकेषु सत्सु कः शक्ष्यति वेत्तुमस्य जीविततत्त्वम्? आधुनिकविमर्शकमतान्यवलम्ब्य क्रिस्तपूर्वतृतीयशताब्द्याः क्रिस्तपरषष्ठशताब्द्या मध्य इतस्ततो दोलायमानस्य कः प्रभवेदस्य कालं निर्णेतुम्? 3

दशाङ्कं मृच्छकटिकं नाम प्रकरणं शूद्रकेण निर्मितम्। इदं दण्डिकविप्रणीतमिति पिश्चल्पण्डितः, मॅग्डोनेल्प्रभृतिभिर्यदुक्तं तदनाकरमिति निरस्तं तदर्वाचीनपरिशोधकैः। अस्य प्रस्तावनायां सूत्रधारमुखेनाविष्कृतानि कविवाक्यानीमानि –

"द्विरदेन्द्रगतिश्चकोरनेत्रः, परिपूर्णेन्दुमुखः सुविग्रहश्च
द्विजमुख्यतमः कविर्बभूव प्रथितः शूद्रक इत्यगाधसत्त्वः ॥"

---

1. हे. का. p 574 (para 597)
2. राजतरङ्गिणी. III. 343; M. K. p. para 596 p. 573.
3. In this connection, vide M.K. p. 574-78; p. 240. M.K. throws new light on this subject based on materials from Dandi's अवन्तीसुन्दरीकथा.

"ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां
ज्ञात्वा शर्वप्रसादाद् व्यपगततिमिरे चक्षुषी चोपलभ्य ।
राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा
लब्ध्वा चायुःशताब्दं दशदिनसहितं शूद्रकोऽग्निं प्रविष्टः ॥"

"समरव्यसनी प्रमादशून्यः
ककुदं वेदविदां तपोधनश्च ।
परवारणबाहुयुद्धलुब्धः
क्षितिपालः किल शूद्रको बभूव ॥"1

एतादृशमात्मप्रशंसनं यथाऽपूर्वं, तथेदृशसर्वलक्षणलक्षितः कविश्चापूर्वः। एभिः श्लोकैः सौन्दर्यराशेरस्य वेदशास्त्रवैदुष्यं सकलकलाविशारदत्वं विशेषतः संग्रामसामर्थ्यं च प्रकटितम्। तत्र चिरकालजीविना गणितजातकस्कन्धपारदृश्वना परित्यक्तशरीराभिमानेन तपोधनेनानेन करिष्यमाणयागाग्निप्रवेशः कृत इव सूत्रधारोक्त्या कथित इत्येवंरूपविशेषोऽवगन्तव्यः। अयमेव व्याख्यात्रा पृथ्वीधरेण समर्थितः जातकादिगणितद्वारा ज्ञात्वाऽऽगामिसूत्रधारवचनापेक्षया अग्निं प्रविष्ट इत्यादि भूतकालप्रत्ययो न विरुद्ध इति मर्मज्ञाः। एतेन प्रस्तावना शूद्रकानन्तरमन्येन निर्मितेत्यपवादोऽपि निरस्तः। शूद्रककविरेव निर्मितवानित्यत्र प्रसिद्धलाक्षणिकस्य वामनाचार्यस्य वचनं प्रमाणम्। यथा 'शूद्रकादिरचितेषु प्रबन्धेष्वस्य भूयान् प्रपञ्चो दृश्यते'।2 'द्यूतं हि नाम पुरुषस्याऽसिंहासनं राज्यम्'3 यद्यप्ययं शूद्रकः शूरः, शस्त्रास्त्रविन्नीतिनिपुणो महाबल-

1. मृच्छकटिकम्–I.4.5.
2. काव्यालङ्कारसूत्राणि. III. ii. (p. 39)–Bombay. (1953).
3. मृच्छकटिकम्–II. p. 59.

सम्पन्नो राजा। तथापि कं देशमपालयत्, कदा वेत्यत्र न कोऽपि निश्चयोऽद्यापि। पुराणादिवचनानि विभिन्नानि। विमर्शकमतानि च विविधानि। तथापि संग्रहेण वक्तुमुत्सहे किञ्चित्।

शा. सप्तमशतकान्तिमभागस्थितवामनाचार्यादयं शूद्रकः पूर्व इति विदितमस्माभिः। शा. ५०६ समये दिवं गताद्वराहमिहिरादप्ययं पूर्व इत्यत्रेदं ग्रान्थिकवचनं प्रमाणम्।

जातकस्कन्धे यवनेश्वरमतं प्रसिद्धं प्राचीनं च। तेन गुरुः कुजस्य शत्रुरित्युक्तम्। तमनुसृत्यायं मृच्छकटिकनवमाङ्के "अङ्गारकविरुद्धस्य प्रक्षीणस्य बृहस्पतेः" इत्युक्तवान्1 एतेन शूद्रककाले यवनेश्वरमतस्य प्रामाण्यं स्पष्टीभवति। अनन्तरं ग्रहमित्रत्वशत्रुत्वविषये सत्याचार्यहोराशास्त्रस्य प्रामाण्यं सञ्जातम्। तत्कालसमुद्भूतो वराहमिहिरः स्वीयबृहज्जातकद्वितीयाध्याये यवनाचार्यमतं स्मृत्वापि सत्याचार्यमनुसृत्य "जीवेन्दूष्णकराः कुजस्य सुहृद" इति निर्णीतवान्। तस्मान्न तु केवलं वराहमिहिरात्, सत्याचार्यादप्ययं पूर्व इवाभाति। तर्हि कस्मिन् कालेऽयमासीत्? स्कान्दादिपुराणवचनानुरोधेन ३३०० कलिवर्षेषु गतेषु सत्सु उत क्री. द्वितीय–शताब्द्यामाहोस्विच्चतुर्थशतकान्तिमभागे वा? किमत्र वक्तव्यम्। भासकालिदासयोः परमर्वाचीनत्वान्नायं शालिवाहनशकारम्भात्पूर्व इति स्थूलदृष्ट्या कथ्यते। अथास्य काव्यम् रूपकसारस्वते कीर्तितेषु केषुचिदिदमेकम्। भासमहाकवेश्चारुदत्तमवलम्ब्य वृद्धिं गतमपीदं ततोऽपि सहृदयहृदयङ्गमं नूतनकथांशकल्पनेन पात्ररसपोषणविधानेन च। दरिद्रचारुदत्तो धीरशान्तनायकोऽप्यस्मिन् धीरोदात्त इव वर्णितः। वसन्तसेना वेश्यापि धनविरक्ता, सुगुणानुरक्ता, सौशील्यराशिरुत्तमनायिकेव पोषिता। किमनेन गणनेन?

---

1. मृच्छकटिकम्. IV. iii. ad 23 (p. 65)-तदेव. II. p. 59.

कथापात्ररसौचित्यानामिदमालवालमित्येकोक्तिरलम्। चारुदत्ते सज्जलकश्चौर्योपायवक्तारं खरपटं दध्यौ। अस्मिंस्तु शर्विलकः कनकशक्ति सस्मार। एतेन भासादर्वाचीनं कनकशक्तिनिर्मितं चौर्यसूत्रमिति विदितम्। तच्छास्त्रमपीदानीं नष्टम्। 'यासां बलिर्भवति'1 'विषादस्त्रस्तसर्वाङ्गी'2 'मार्जारः प्लवने'3 इत्यादि चौरुदत्तश्लोकाः केचन यत्किञ्चित्पदभेदेन मृच्छकटिके दृश्यन्ते। नैतावता शूद्रके ग्रन्थचौर्यमारोपणीयम्। किन्तु शूद्रकेण भक्त्या चारुदत्तं बहुवारं पठितमिति भासे गौरवबुद्धया तत्पद्यसंग्रहणं कृतमिति च मन्तव्यम्। मृच्छकटिकस्य महती प्रसिद्धिराजन्मसिद्धा।

शूद्रककवित्वं जगद्विदितं मृदुमधुरं सुमनोहरमिति च। तथापि द्वित्राणि वर्णनानि। अत्र चारुदत्तवचनम् –

"वर्षोदकमुद्गिरता श्रवणान्तविलम्बिना कदम्बेन।
एकः स्तनोऽभिषिक्तो, नृपसुत इव यौवराज्यस्थः॥"4

वसन्तसेनाभाषितम् —

"यत्नेन सेवितव्यः पुरुषः कुलशीलवान् दरिद्रोऽपि।
शोभा हि पणस्त्रीणां, सदृशजनसमाश्रयः कामः॥"5

---

1. मृच्छकटिकम्. IX. 33. p. 252; (N.S.P. ed.-1953.)
रवेर्गुर्मित्रमतोऽन्यथान्ये, गुरोस्तु भौमं परिहृत्य सर्वे-(बृहज्जा –अध्या. २. श्लो. १६ व्याख्यायाम्)
2. चारुदत्तम्. I. 2. cf. मृ. श.1. 9.
3. चारुदत्तम् IV. 3. cf. मृ. श. IV. 8.
4. मृ. श. V. 38. (p. 148)
5. ,, VIII. (p. 212)

शार्विलकः–

"द्वयमिदमतीव लोके, प्रियं नराणां सुहृच्च वनिता च।
सम्प्रति तु सुन्दरीणां, शतादपि सुहृद्विशिष्टतमः ॥"1

चारुदत्तकृतं दारिद्र्यवर्णनमसमानम् नथा–

"सङ्गं नैव हि कश्चिदस्य कुरुते, सम्भाषते नादरात्
सम्प्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोकरते।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥"2

— o —

1. मृ·श. IV. 25. (p. 112)
2. ,, I. 37.

(२७) माघः

संस्कृतकवीनां देशकालादिनिर्णये भोजप्रबन्धादिचाटुकाव्यानि प्रमाणत्वेन नोपादेयानीति बहु परिशोधकैः सम्भावितमपि द्वित्रा विमर्शकाः प्रभावकचरितमनुसृत्य, "दारिद्र्यपीडितो माघः सपत्नीकः प्रययौ भोजसभां तत्पितृव्यपुत्रः सिद्धकविश्च भोजेनादृत इत्याद्य-भूतकल्पनं चक्रुः । तादृशवचनानि न विश्वासयोग्यानि ।1

आगर्भश्रीमानयं विद्वत्कविः शिशुपालवधकाव्यकर्ता । अनेन ग्रन्थान्ते स्ववंशवर्णनं कृतम् । मल्लिनाथादिभिः कैश्चिद् व्याख्यातं तद्वर्णनं संशयास्पदमिति केषांचिदाशयः । भवतु नाम । तेनेदं ज्ञायते—

"सर्वाधिकारि सुकृताधिकारः
श्रीवर्मलाख्यस्य बभूव राज्ञः ।
असक्तदृष्टिर्विरजाः सदैव
देवोऽपरः सुप्रभदेवनामा ॥
काले मितं तथ्यमुदर्कपथ्यं
तथागतस्येव जनः सचेताः ।
विनानुरोधात् स्वहितेच्छयैव
महीपतिर्यस्य वचश्चकार ॥
तस्याभवदत्तक इत्युदात्तः
क्षमी मृदुधर्मपरस्तनूजः ।
यं वीक्ष्य वैयासमजातशत्रोः
वचो गुणग्राहि जनैः प्रतीये ॥"

1. M. K. H. C. S. L. p. 154.

"सर्वेण सर्वाश्रय इत्यनिन्द्य-
मानन्दभाजा जनितं जनेन ।
यश्च द्वितीयं स्वयमद्वितीयो
मुख्यः सतां गौणमवाप नाम ॥
श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्म
लक्ष्मीपतेश्चरितकीर्तनमात्रचारु ।
तस्यात्मजः सुकविकीर्तिराशयादः
काव्यं व्यधत्त शिशुपालवधाभिधानम् ॥"1

श्रीवर्मलराजास्थाने सर्वाधिकारी सुप्रभदेवोऽस्य पितामहः । उदारः, सत्यसन्धो दत्तकोऽस्य पिता लिखितपुस्तकेषु तद्राजनाम धर्मनाभः, धर्मलातः, वर्मनामा, वर्मनाभः इति विविधं दृश्यते ।2 कविनानेन निजनिवासस्थानं तु नोक्तम् । तदस्य निवासः श्रीमालेति भीनमालेति कैश्चिदुक्तम् ।3 कस्मिश्चिल्लिखितपुस्तके "श्रीभिन्नमालववास्तव्यदत्तकसूनोर्महावैयाकरणस्य माघस्य कृतौ" इति ग्रन्थान्तगद्यमस्तीति दुर्गाप्रसादपण्डितैः कथितम् ।4 गुर्जरमालवदेशसन्धौ बिन्नमालनामकग्रामोऽस्तीति कैश्चिद् भावितम् । राजपुत्रस्थानान्तर्गतवसन्तगडग्रामे श्रीवर्मलातनृपतिना स्थापितमेकं शिलाशासनं दृष्टम् ।5 माघकवेः पितामहः तद्राज्ञः मन्त्री भवेदिति

1. शिशु. व. pp. 557-58. (N. S. Press, XII. ed. 1957)
2. M. K. H. C. S. L. p. 155, f. n. 3.
3. श्रीबलदेवोपाध्याय–संस्कृतकविचर्चा (हिन्दी)–19.
4. शिशुपालवधपीठिका (N. S. P. ed) 1957.
5. द्विरशीत्यधिके काले षण्णां वर्षशतोत्तरे ।
जगन्मातुरिदं स्थानं स्थापितं गोष्ठिपुङ्गवैः ॥
जयति जयलक्ष्म्यलक्षितवक्षःस्थलसंशयोदारः ।
श्रीवर्मलातनृपतिः पतिरवनेरधिकबलवीर्यः ॥

केश्चित्तर्किनम् । एवं स्थितेषु परिशोधकमतेषु माघपितामहस्याश्रयभूतो राजाऽयमिति तन्निवासोऽयमिति च निश्चेतुं कथं शक्यम् ? एवमेव माघस्य कालोऽपि बहुभिर्बहुधा सूचितः क्रिस्तशकसप्तमशताब्दीमारभ्य षट्सु शतकेषु यथेष्टम्1 । यथापीयं जिज्ञासा –

आनन्दवर्धनेन "त्रासाकुलः परिपतन् परितो निकेतान्" इत्यादिशिशुपालवधस्थश्लोकस्य ध्वन्यालोक2 उदाहृतत्वात् तस्मान्माघः पूर्व इति स्पष्टम् । स तु शा. ७७७–८०६ मध्यवर्ती । अथ तत्पूर्वावुद्भटजयापीडौ शा· ७०० समयवर्तिनौ काश्मीरे तारानाथतर्कवाचस्पतिर्वाचस्पत्यकोशे माघशब्दप्रसक्तावुद्भटाचार्यप्रणीतमिवामुं श्लोकमुदाहृतवान् –

"तावद्भा भारवेर्भाति यावन्माघस्य नोदयः ।
उदिते च पुनर्माघे भारवेर्भा रवेरिव ॥"

श्लोकोऽयमुद्भटनिर्मित इत्यत्र प्रमाणान्तरं न दृश्यते इति केषांचिदाशयः । अस्तु नाम । श्लोकः स्वयम्भूः किल । तर्हि येन केनापि विद्वल्लोकसम्प्रदायाद् अनयोः सन्निहितत्वं जानतैव निर्मितः इति वदामः । कोऽत्राक्षेपः ? तेन भारवेरनन्तरं माघः सञ्जात इति भावनमेव वरमिति वक्तुं शक्यते । तथाप्येतद्विरुद्धाभिप्रायः कश्चिदत्र परिहर्तव्यः । यथा –

वामनजयादित्याभ्यां पाणिनिसूत्राणां वृत्तिर्निर्मिता । तत्कालः शा. ५७०, भवेदीषद्वैषम्यम् तस्या वृत्तेर्जिनेन्द्रबुद्धिः न्यासाख्यं व्याख्यानं रचितवान् तत्कालश्च शा. ६२० भवेदिति बहूनां भावना । पाणिनीयाभिमानिना तद्वृत्तिन्यासाकर्षितबुद्धिना

1. M. K. . H. C. S. L. p. 155–56.
2. शिशु. V. 26-ध्वन्यालोक. II. 272. p. (K. S. Series-135)-1940.

मल्लिनाथसूरिणा न्यासोद्योतनामकं व्याख्यानं निर्मितम् ।1 सोऽयं सूरिः शिशुपालवधद्वितीयसर्गस्यास्य –

"अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना ।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ।।"2

अर्थं विवृण्वन् वृत्तिन्यासशब्दयोः "काशिकावृत्तिः तद्व्याख्यानग्रन्थबिशेष इति श्लेषार्थं लिखितवान् । न्यासोद्योतरचनात्तद् ग्रन्थनिरन्तरस्मरणमेवात्र कारणम् न तु तद् व्याख्ययोः शिशुपालवधस्य च पौर्वापर्यविज्ञानम् । चाटुकथाश्रुत्या दिङ्नागकालिदासौ समकालाविति भ्रान्तिमापन्नोऽयं व्याख्याता । कविकालनिवासादिचरित्रांशविज्ञाता न भवतीति विदितमेव । एवं च श्लोकेऽस्मिन् चारमुखेन परवृत्तान्तज्ञानं प्रधानम् । उपमानोपमेययोरपस्पशेत्येकं श्लिष्टविशेषणमत्र यथा सम्यगन्वेति, न तथा पूर्वार्धगतश्लिष्ट–विशेषणानीति, विमृशतां वेद्यं भवेदेव । तेनात्र वृत्तिन्यासशब्दौ श्लिष्टावितिबुद्ध्या, तद् ग्रन्थाभ्यां शिशुपालवधः पर इति यदुच्यते कैश्चित्परिशोधकैस्तदनालोचितरमणीयं भवेत्किल ! तथा च हरदत्तेन माघकविःस्मृतः पदमञ्जर्याम्3 । पदमञ्जरीवाक्यानि कानिचिज्जिनेन्द्रबुद्धिना गृहीतानि न्यासे ।4 अथ जिनेन्द्रबुद्धेः न्यासाच्छिशुपालवधः पूर्वं इत्यत्र का शङ्का ? अथ निर्णयः –

---

1. C. C. I. 3. Mallinatha's न्यासोद्योत was quoted in माधवीया धातुवृत्ति.
2. शिशु. II. 112.
3- Part 1-Edited by B. Damodara Sastri–Medical Hall Press, Benares-1895.
4. Srish Chandra Chakravarti's ed. in 3 Vols-Printed at Calcutta, Dacca and Rajshahi-1913-25.

पूर्वोक्तवसन्तगडशासनस्थापकः श्रीवर्मलातनृपतिर्माघपितामहस्य पोषक इति यद्यङ्गीक्रियते तन्मालवशककालापेक्षया (६८२) माघः शा ५५० समयेऽभवदिति वक्तव्यं किलहॉर्नपण्डितमनुसृत्य। किन्तु नेदं बहूनाम् सम्मतम्। जाकोबि-दुर्गाप्रसाद-पण्डिताभ्यां यद् भावितं माघकविः क्रि. षष्ठशकमध्यवर्तीति।

तत्पूर्वोदाहृत'तावद् भा भारवेर्भाति' इत्यादि श्लोकार्थस्य सुसङ्गतं भवति। तस्मान्माघकविः शा. ४८० प्रान्ते समासीदिति सम्भावनमेव वरमिति मन्ये।

माघः शब्दतर्कवेदान्तशास्त्रनिष्णातः, प्रौढकविः चित्रयमकबन्धकवित्वप्रियश्च। कश्चनैवं स्तुतवान् –

"उपमा कालिदासस्य, भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं, माघे सन्ति त्रयो गुणाः॥"[1]

अनेन दण्डी माघात् पूर्वं इति न चिन्तनीयम्। 'मेघे माघे गतं वयः' इति मल्लिनाथसूरिवचनमेवास्य महिमानं प्रकटयति। अयं पुराणप्रसिद्धां श्रीकृष्णशिशुपालकथामाहृत्य स्वेच्छया काव्यशैल्या विंशतिसर्गात्मकं काव्यमकरोत्। अस्मिन् काव्ये सर्वत्र वेदवेदाङ्गविज्ञानबीजान्युक्तानि। तत्रापि चतुर्दशसर्गे विशेषतः। नाट्यसङ्गीतबौद्धदर्शनपरिचयश्चानेन प्रदर्शितस्तत्र तत्र। अत्र कानिचिदुदाहरणानि –

"उदासितारं निगृहीतमानसै-
र्गृहीतमध्यात्मदृशा कथंचन।
बहिर्विकारं प्रकृतेः पृथग्विदुः
पुरातनं त्वां पुरुषं पुराविदः॥"[2]

---

1. Dr. M. K. H. C. S. L. p. 115; Dr. S. K. De; H. S. L. p. 188 ff.
2. शिशुपाल. I. 33.

"श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः ।
सततमृषभहीनं भिन्नकीकृत्यषड्जम् ॥ 1
सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्माऽन्यो नास्ति मन्त्रो महीभृताम् ॥2

द्वितीयसर्गश्लोका रक्तवृश्चिका इत्यान्ध्रविद्वत्प्रतीतिः । एतादृशप्रौढकाव्यनिर्माता माघकविर्विष्णुभक्तः, शुद्धाद्वैती इति कृतिरेव बोधयति । एतन्निर्मितं काव्यान्तरं न क्वापि दृष्टमद्यापि । तथाप्यौचित्यविचारचर्चासुभाषितावल्यादिषु माघनाम्ना त्रिचतुराः श्लोका दृश्यन्ते । तेषु "शीलं शैलतटात्पतत्वभिजन"3 इत्यादिक-श्लोको भर्तृहरिनीतिशतके वर्तते । अन्ये तु –

"बुभुक्षितैर्व्याकरणं न भुज्यते पिपासितैः काव्यरसो न पीयते ।
न विद्यया केनचिदुद्धृतं कुलं हिरण्यमेवार्जय निष्फला कला4

"नारीनितम्बफलके प्रतिबध्यमाना
हंसीव हेमरशना मधुरं ररास ।
तन्मोचनार्थमिव नूपुरराजहंसाः
चक्रन्दुरार्तमुरवरं चरणावलग्नाः ॥"5

"अम्बरं विनयतः प्रियपाणेर्योषितश्च करयोः कलहस्य ।
वारणामिव विधातुमभीक्ष्णं कक्षया च वलयैश्च शिशिञ्जे "6

1. शिशुपाल, XI. 1
2. तत्रैव II. 28.
3. सुभाषितावली. 3073.
4. सुभाषितत्रिशती. I. 31. सूक्तिमुक्तावली-3073 ('माघस्य') Kshemendra औचित्यविचारचर्चा (30-कारिका) ('माघस्य') किन्तु शिशुपालवधे नास्ति)
5. सुभाषिता. 1561. (माघस्य)
6. शिशुपाल, X. 62.

"स जयति गिरिकन्यामिश्रिताश्चर्यमूर्तिः
त्रिपुरयुवतिलीला निर्ममभ्रंशहेतुः ।
उपचयवति यस्य प्रौन्नतैकस्तनत्वाद्-
उपरि भुजगहारः स्थानवैषम्यमेति ।।"1

इमे माघेन निर्मिता, उत तस्मिन्नारोपिता इति निश्चेतुं न शक्नुमः ।

अस्य काव्यस्य विंशत्यादिका व्याख्याः समुत्पन्ना भरतखण्डमभितः । तासु मल्लिनाथसूरिसर्वंकषया सर्वदिक्कूलंकषमभूदिदं काव्यमिति नातिशयोक्तिः । वल्लभदेवकृतसन्देहविषौषधव्याख्या काश्मीरे प्रसृता । चारित्रवर्धनादिव्याख्यानां कासांचित्तत्र तत्र व्याप्तिरस्ति काचित् ।

लोकप्रसिद्धं माघकवित्वम् । किमिति वर्ण्यतेऽत्र । अस्य लोकज्ञताप्रदर्शनायेमे –

"मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी ।
क्रियासमभिहारेण विराध्यन्तं क्षमेत कः ।।
अन्यदा भूषणं पुंसां शमो लज्जेव योषिताम् ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ।।
मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ।
तस्याऽजननिरेवास्तु जननीक्लेशकारिणः ।।"2

वक्ष्यमाणरैवतकाद्रिवर्णनेन कविरयं 'घण्टामाघ' इति ख्यातिमाप्तवानिति श्रूयते –

1. सदुक्तिकर्णामृतम्-I. 27. 1 (p. 35)-Bibliotheca Indica edition Calcutta (1912)
2. शिशुपाल. II. 43-45.

"उदयति विततोर्ध्वरश्मिरज्जा-
वहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टा-
द्वयपरिवारितवारणेन्द्रलीलाम् ॥"1

1. शिशुपाल. IV. 20

(२८) दण्ड्याचार्यः

काव्यादर्शदशकुमारचरिताभ्यां सरस्वत्याः कर्णावलङ्कृतवानयं कविब्रह्मा भामहात्पूर्वं इति, पर इति च मतद्वयं प्रचलति परिशोधनवीथ्याम् । मयापि परिशीलितोऽयं विषयो मदीयसंस्कृतवाङ्मयचरिते । तत्सारांशमत्राक्षिपामि ।1

भरताचार्य इवायमप्यपार्थव्यर्थादिदशविधकाव्यदोषान् परिगणय्य, प्रतिज्ञाहेतुदृष्टान्तहानिर्दोषो वा न वेति,2 विमर्शनं निष्प्रयोजनमित्याह काव्यादर्शे3 । भामहस्तु दण्डिवाक्यानुल्लिखन्4 अथ प्रतिज्ञाहेत्वादिहीनं दुष्टं च वर्ण्यत इत्यारभ्य, तद्दोषं साधयितुं पञ्चमपरिच्छेदं विनियुक्तवान् स्वीयकाव्यालङ्कारे । हेतुसूक्ष्मलेशा अलङ्कारा इति यद् दण्डिनो मतं तन्निरस्तं भामहेन । अनेन प्रहेलिकाभेदस्योदाहृतोऽयं श्लोकः5 –

"विजितात्मभवद्वेषि गुरुपादहतो जनः ।
हिमापहामित्रधरैर्व्याप्तं व्योमाभिनन्दति ।।"6

अस्योत्तरार्धं गृहीत्वा "हिमापहामित्रधरैर्व्याप्तं व्योमेत्यवाचकम् ।" इति भामहेनात्र वाचकदोषो गणितः । एवं रात्रिप्रशंसने, कथाख्यायिकभेदगणने, उपमादोषपरिगणने च दण्डिमतं खण्डितं

---

1. संस्कृतकविजीवितम् pp. 145–150. (in Telugu)-1950.
2. काव्या. III. 127.
3. काव्या. III-125, 126, काव्यालङ्कार. IV. 1-2.
4. ,, II–23-25, ,, III. 86.
5. ,, III–130, ,, II. 42.
6. ,, III. 120, ,, II. 41.

भामहेन । एतेन भामहाद् दण्डी पूर्व इति एतयोर्न विशेषकालव्यवधिश्चेति विदितम् । अपि च भारवेरयं प्रपौत्र इति वादो न विश्वसनीय इति माघादयं किञ्चित् पर इति च पठितमितः पूर्वम् । तस्माद्दण्डी शा· पञ्चमशताब्द्यन्तिमभागे वा, षष्ठशतकारम्भे वा भवेदिति सम्भावयामः । अथाप्यत्र केचन परिशोधकाभिप्रायाः स्मर्यन्ते । दण्डी क्रि· षष्टशतकवर्तीति आर्· बी· कृष्णमाचार्याः, एम्· रङ्गाचार्याश्चावदन् ।1 आर्· सी· दत्तमहाशयस्तु शिलादित्यराज्यकाले (क्रि. ५७०-६२०) दण्डी वयोवृद्ध इत्युक्तवान् । अतोऽयं भोजराजात् किञ्चित्पूर्वः, भवभूतेः समकाल इत्यादिमतान्यत्र न विचारणीयानि अथास्य कृतयः –

"त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥"2

इत्येकः श्लोको राजशेखररचित इव सूक्तिमुक्तावल्यामस्ति । के ते प्रबन्धा इत्याकांक्षायां दशकुमारचरितकाव्यादर्शौ बहुभिर्गणितौ । त्रिवेदिपण्डितेन तावत्प्रतापरुद्रीयपीठिकायां दशकुमारचरितं न दण्डिनिर्मितमिति लिखितम् । तदभिप्रायस्तु नाङ्गीकृतः परिशोधकैः । अथ तृतीयग्रन्थविवक्षायां छन्दोविचितिः मृच्छकटिकम्, कविहृदयम्, अनामयस्तवः इत्यादिकाव्यान्यहमहमिकया विमर्शनरङ्गं प्रविष्टानीति विदितमेव ।3 तेनात्र तत्तद्विमर्शनविचारणा न क्रियते ग्रन्थविस्तरभिया, कालहरणशङ्कया च । एतेष्वनामयस्तवो दण्डिनिर्मिततृतीयग्रन्थ इति मन्यतेऽद्य कैश्चिद्विमर्शकैः ।4 तद्विवृणोमि –

1. M· K.-p. 457; Kane-H.S.P. p. 140,
2. Kane–p. 88; M·K· p. 461; सूक्तिमुक्तावली. p. 45. (74v.)
3. M.K. p. 471.
4. ,, p. 462.

विद्वन्मणिरयं दण्डी पूर्वकर्मवशादुत्तरे वयसि कुष्ठरोगेन बाधितः सकलविद्यौषधसेवयापि फलमलब्ध्वा तदा सिद्धवाचं सद्गुरुमुपसृत्य, तदुपदेशेन शिवाराधनतत्परः शिवस्मरणं शरणं मत्वा, तदेकध्याननिष्ठः सन् निजनिर्मितशिवस्तुतिश्लोकान्निरन्तरं पठन्नामयोऽभवत् । तेन तद्रचितशिवस्तवोऽनामयस्तवनाम्ना प्रतीत इति शैवसम्प्रदायविश्रुता कथाऽस्ति । तदुपोद्बलकश्चायं फलश्रुतिश्लोकस्तवान्ते –

"इति विरचितमेतच्चारुचन्द्रार्धमौले-
र्ललितपदमुदारं दण्डिना पण्डितेन ।
स्तवनमवनकामेवात्मनोऽनामयाख्यं
भवति विगतरोगो जन्तुरेतज्जपेन ॥"

अत्र यदुक्तं कविना ललितपदं निजकाव्यमिति तत्सङ्गच्छते "दण्डिनः पदलालित्यम्" इति चाटूक्तिरपि अपि च "वन्दे रुद्रं वरदममलं दण्डिनं मुण्डधारम्" इत्यादिश्लोकस्थं दण्डिनमिति शिव–विशेषणपूर्वम् । स्वनामस्फोरकमिवात्र प्रयुक्तं कविनेति वक्तुं शक्यम् । अथवा ध्यातृध्येययोरभेदत्वेन केनचिद्विज्ञात्रा 'मह्यमेव नमो नम' इत्युक्तम् ।1 तद्वदिदमपि स्यात् अनेनास्य तृतीयः प्रबन्धोऽनामस्तवो भवेदिति मदाशयश्च ।

अयं स्तवो द्वात्रिंशत्पद्यात्मकः मन्दाक्रान्तावृत्तबद्धः । अन्तिमं श्लोकद्वयं तु मालिनीवृत्तम् ।

"विश्वं प्रादुर्भवति लभते त्वामधिष्ठापकश्चेद्-
न ह्युत्पत्तिर्यदि जनयिता नास्ति चैतन्ययुक्तः ।
क्षित्यादीनां भवति च कलावत्तया जन्मवत्ता
सिध्यत्येवं सति भगवतः सर्वलोकाधिपत्यम् ॥"2

---

1. Cf. 'मह्यं नमोऽस्तु कवये निरपत्रपाय' –(यामुनाचार्यकृतं स्तोत्ररत्नम्)
2. काव्या· I. 2.

अथ काव्यादर्शः

वृद्धभरतभरताचार्यादीनां शास्त्राणि भासादीनां काव्यादीनि च परिशील्य तत्फलमिवानेन साहित्यापणमानीतोऽभिनवः पदार्थः काव्यादर्श इतीयं प्रतिज्ञैव ज्ञापयति ।

"पूर्वशास्त्राणि संहृत्य प्रयोगानुपलभ्य च,
यथा सामर्थ्यमस्माभिः क्रियते काव्यलक्षणम् ।"

काव्यस्यालङ्काराः शरीरमिति पूर्वलक्षणमनादृत्य "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली"1 इति यदुक्तमनेन तल्लक्षणमेवार्वाचीनानां शब्दार्थौ काव्यमित्यादिविविधलक्षणानामवलम्बनमभूद् । एतदेव ज्ञापयति कः काव्यस्यात्मेति साहित्यमीमांसाविषयकसूक्ष्मपरिशीलनाय मार्गदर्शी दण्डीति । अपि चायमेव मार्गसञ्ज्ञया वैदर्भगौडीयादिभेदानां वक्ता प्रथम इति 'अस्त्यनेको गिरां मार्गः' इत्यादिकं तद्विवरणं च मुक्तकण्ठं प्रवदति । एतदुक्तवैदर्भगौडीयप्रभेदं निरसितवान् भामहः ।2

"गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक् ।"3 **इत्यादिना**

परन्तु बाणभट्टेन वामनेन च प्रशंसितं दण्डिमतं । भरताचार्येण प्रशंसोपमेत्याद्युपमाभेदा पञ्चैव प्रोक्ताः । दण्डी तु –

"यथा कथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते ।
उपमा नाम सा तस्याः प्रपञ्चोऽयं प्रदर्श्यते ॥"4

1. About the relative priority of Bhamaha and Dandin vide discussion by Kane : H.S.P. pp. 96. ff–काव्या. I. 10b.
2. तत्रैव. I. 40.
3. भामह. I. 32.
4. काव्यादर्शः–II. 14.

इति प्रतिज्ञाय धर्मोपमादि चतुस्त्रिशद्भेदान् प्रदर्शितवान् । अलङ्कारविभागा बहुविधाः पूर्वसूरिभिः प्रदर्शिताः । तदेव प्रतिसंस्कारपूर्वकं मया विशदीक्रियते इत्युक्त्वा पञ्चत्रिंशदलङ्कारानदर्शयदयम् । अस्मिन् ग्रन्थे समुदाहृताः श्लोकाः प्रायश एतदीया अपि केचिदन्यदीया अपि सन्तीत्यत्रायं भासकविश्लोक उदाहरणम् –

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥"1

किम्बहुना, काव्यदोषविवरणावसरे यत्कृतं सत्काव्यस्वरूपवर्णनं तदेवास्य वैदुष्यवैदग्ध्ययोरेकं निदर्शनम्. तरुणवाचस्पति–मल्लिनाथादिभिर्बहुभिः कृता प्रशंसा त्वपरम् ।

अथ दशकुमारचरितम्

ओजःप्रसादगुणाविशिष्टस्य मृदुमधुरपदललितवाक्यविन्यासस्य कथारचनस्य चादिममुदाहरणमिदं गद्यकाव्यमस्य सुश्लोकतायाश्चाद्यं कारणम् । तद्यथा –

"जाते जगति वाल्मीकौ शब्दः कविरिति स्मृतः ।
कवी इति ततो व्यासे कवयश्चेति दण्डिनि ॥"2

गद्यरचनं नापूर्वं भारतादिषु पञ्चतन्त्रेऽपि तद् दृश्यते । तथाप्येतादृशी हृदयङ्गमा रीतिः, पठनश्रवणयोरुत्कण्ठाजनकं माधुर्यं च न तत्र वीक्ष्यते । अत्र चित्रविचित्रा मानवप्रकृतिः बहुविधा देशाचाराः, नीतिः कार्यचातुरी च. सम्यग्वर्णिताः राजवाहनापहारवर्मादिदशकुमाराणां चित्रचरित्रेऽस्मिन् कुमारोत्पत्तिः द्विजोपकृतिः

1. चारुदत्त. I, 19. Also in मृच्छकटिकम् I.34..
2. Dhananjaya's 'निघण्टुः'–II. 42. (Vavilla Ramasvamisastri's edition in Telugu type. 1949-Madras)

सोमदत्तचरितं पुष्पोद्भवचरित्रावन्तीसुन्दरीपरिणये इति पञ्च-विषयात्मिका पूर्वपीठिका। राज्यप्राप्तिरुत्तरपीठिकेति प्रायो वादः।1 मालवराजविजितस्य राजहंसनाम्नो मगधराजस्य वनगमनेन कथाऽरभ्यते।

आजन्मनः सकलदेशव्याप्तमिदं काव्यमवलम्ब्य अप्पय-दीक्षितः, चक्रपाणिकविश्च दशकुमारचरितनामकं पद्यकाव्यं चकार। तत्रोत्तरकथा प्रपञ्चिता।2 अप्पयामात्यकविर्दशकुमारकथासाराख्यं पद्यकाव्यमरचयत्। अप्पयदीक्षितो दशकुमारचरितसंक्षेपं निर्मित-वान्। राजाधिराजगोपीनाथस्तु दशकुमारकथां गद्यकाव्यरूपेण प्रणीतवान्।

"गोपीनाथो द्विजाधीशः सतां कौतुकहेतवे।
दशानां च कुमाराणां संशोधयति सत्कथाम्॥"

आन्ध्रकर्णाटादिदेशभाषासु चेदं परिवर्तनमगमत्। घन-श्यामकविः 'सञ्जीवनं' नाम टिप्पणं कृतवान्।3 भोजप्रबन्धकथां विश्वस्यायमित्थमवतारिकायामलिखत् –

अथ भोजसभायां कालिदासभवभूतिप्रमुखवदखिलमाननीयो बाण इव कादम्बरीं दशकुमारचरिताख्यां प्रहेलिकां रचयिष्यन् दण्डी. . . . भोजप्रबन्धादिचाटुकाव्यानामप्रमाणिकत्वमनेनैव स्पष्टी-भूतम्। एतादृशवचनैरेव दण्डिनः सत्यचरितं संशयास्पदमासीत्।

एतत्काव्यनिर्माणसमये मतभेदाः सन्ति। तत्र अवन्ती-सुन्दरीकथा न दण्डिनिर्मितेति वादः प्रबलः।4 तदर्वाचीन-कविनैकेन

1. Vide discussion in M. K. H. C. S. L. pp. 462–64
2. For other poetic versions see ,, p. 464.
3. M. K. H. C. S. L. p. 249.
4. For discussion see H. C. S. L. p. 458 ; Kane : H. S. P. pp. 92-93.

निर्मितः स भागोऽस्मिन् प्रक्षिप्त इति मन्येऽहमपि । अनर्घेऽस्मिन् गद्यरत्नहारेऽयमेकः पद्यमुक्तामणिः –

"किं क्रूरं ? स्त्रीहृदयम्
किं गृहिणः प्रियहिताय ? दारगुणाः ।
कः कामः ? सङ्कल्पः,
किं दुष्करसाधनम् ? प्रज्ञा ॥"1

कवितापरिपाकं विज्ञातुमत्र काव्यादर्शश्लोकौ द्वौ –

"कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः ।
पारावतः परिभ्रम्य रिरंसुश्चुम्बति प्रियाम् ॥2
अरत्नालोकसंहार्यमहार्यं सूर्यरश्मिभिः ।
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥"3

अत्र द्वितीयश्लोको बाणेनानुकृत इत्थम् ।4 "केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्" एवं स्थिते बाणाद्दण्डी पर इति स्वाभिप्रायमाविष्कर्तुमयमेव बाणमनुकृतवानिति यदुक्तं पीटर्सन् पण्डितेन दशकुमारचरितपीठिकायां तत्साहसं खलु ! अथ सुभाषितावल्यादिषु दण्डिनिर्मिता इव द्वित्राः श्लोकाः सन्ति । तत्रैकः –

1. Kale's दशकुमारचरितम्-VI. p. 156. (3rd ed. 1926)
2. काव्या. II. 10.
3. तत्रैव. II. 197.
4. कादम्बरी-There is the other view that Dandin studied Kadambari see H. C. S. L. p. 459.

"क्वचिदमरसरित् क्वचित्कपालं
क्वचिदुरगाः क्वचिदैन्दवी च रेखा ।
इति विषमविभूषणैरुपेता
प्रमथपतेरवताज्जटाटवी वः ॥"

शिवस्तुतिरियमनामयस्तवकर्ताऽयं दण्डीति भावं पोषयति सम्यक् ।

— o —

(२६) भट्टारहरिचन्द्रः

अस्य काव्येषु मृग्येष्वपि प्राचीना इति बुध्या सप्रश्रयं स्मर्यमाणेषु कविष्वयमेकः। हर्षचरितावतारिकायां भट्टबाणोऽस्य कृतिमेवं प्राशंसत् –

"पदबन्धोज्ज्वलो हारी कृतवर्णक्रमस्थितिः।
भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते ॥"1

अनेन भट्टारपदविशिष्टमस्य नाम तात्कालिकविद्वज्जनव्यवहारे रूढमिति, तत एव भासकालिदासादिमहाकविप्रशंसायामप्यदृष्टं पूजार्थकविशेषणमत्रैव दृष्टमिति चावगम्यते। तथाप्याधुनिकपरिशोधकव्यवहारमाश्रित्यायं हरिचन्द्र इत्येव ब्रूमः। तर्हि कोऽयं हरिचन्द्रः ? एतन्नामानश्चत्वारः सन्ति।

तेषु यस्तु बाणकवेः पूर्वः, यश्च गद्यबन्धनिर्माता सोऽस्माभिरन्वेष्टव्यः धर्मशर्माभ्युदयनामकमेकविंशतिसर्गात्मकं मुम्बयां मुद्रितं काव्यमनेनैव विरचितमिति कैश्चिन्निर्णीतम्। तत्पद्यकर्ता जैनः कायस्थवंश्यः, लक्ष्मणस्य सोदरः।3 अपि च तत्काव्यनेता तु इक्ष्वाकुवंशजातस्य रत्नपुरपालकस्य महासेनस्य सुव्रतायां सञ्जातो धर्मनाथः पञ्चदशतीर्थङ्कर इति तेनैव विदितं भवति। सर्वमिदमुपपन्नमपि, कविना स्वनिर्मितप्रसिद्धगद्यबन्धो न क्वापि स्मृतः।4

---

1. कादम्बरी· उच्छ्वासः. I.
2. जीवंधरचम्पूनिर्माता हरिचन्द्रः- शा० ८५० प्रान्तवर्ती। देवगिरिसंस्थानपण्डितः रुद्रसुधीतनयो हरिचन्द्रस्तु शा· १०२०॥
3. Kavyamala-8-N. S. P. Bombay. (1888)
4. M· K. H. C· S· L. pp. 146-47.

भवतु । पद्यकाव्यमेव प्रथमं निर्मितमित्युच्यताम् । बाणादयं पूर्वं इति विश्वसितुमेतन्मतवादिभिर्न किमपि प्रमाणान्तरं निरूपितं किल ! एवं स्थिते भट्टबाणस्तुतोऽयमिति कथं वाच्यम् ? भूयश्च संशयकारणमन्यत् । भासकालिदासादिपूर्वकविकाव्यान्तगद्येषु दृश्यमानमहाकविबिरुदः काव्यलेखकैर्वा व्याख्यातृभिर्वा ग्रथितः, न तु तैः स्वयं विहितः । अयं पद्यकर्ता तु स्वयमेव महाकविबिरुदं दधार । बाणविनुतभट्टार एवमहङ्कारभरित आसीद्वा ?

"स कर्णपीयूषरसप्रवाहं
रसध्वनेरध्वनि सार्थवाहम् ।
श्रीधर्मशर्माभ्युदयाभिधानं
महाकविः काव्यमिदं व्यधत्त ॥"1

तस्मादयं पद्यकर्ता हरिचन्द्रोऽस्मदुद्दिष्टभट्टारो न भवतीति ममाशयः । अथ विश्वप्रकाशकोशकर्तुर्महेश्वरस्य पूर्वपुरुषेषु कश्चन हरिचन्द्रो दृश्यते । स तु विद्वत्कविर्वैद्यश्च ।2 तद्विद्वद्वैद्यवंशसंभवत्वेन महेश्वरोऽपि वैद्यख्यातिमलभतेति तत्कोशान्तवाक्यैरेव ज्ञायते –

"यः साहसाङ्कचरितादिमहाप्रबन्ध-
निर्माणनैपुणगुणगतगौरवश्रीः ।
यो वैदिकत्रयसरोजवनैकबन्धुः
बन्धुः सतां च कविकैरवकाननेन्दुः ॥"

1. M. K. H. C. S. L. p. 147.
2. तत्रैव. p. 146. (F. N. 9)

इति श्रीवैद्यराजचक्रमुक्ताशेखरस्य कविराजपरमेश्वरस्य पद्यगद्यविद्यानिधेः श्रीमहेश्वरस्य विश्वप्रकाशे।

अपि चायं स्वप्रणीतचरकसंहिताव्याख्यावतारिकायां स्ववंशमूलपुरुषं हरिचन्द्रं सस्मार। अयं कोशकर्ता शा. १०३३ समयवर्ती ।1 बाणभट्टस्यास्य च महत्कालव्यवधानमस्ति। तथाप्येतद्वंशमूलपुरुषो वैद्यभट्ट हरिचन्द्रो बाणकवेः किञ्चित्पूर्वो वा, समकालो वा भवेदिति तर्कयामि। वेदशास्त्रवैद्यचतुरत्वेन स तु भट्टारविशेषणस्य च समर्हः स्यादिति च मन्ये। एवं चात्रापि कश्चित् संशयः समुदेति। धर्मसूत्रभाष्यकारस्य शबरस्वामिनश्चतुर्जातिपत्नीषु वराहमिहिरादयः षट् कुमारा उत्पन्ना इति, तेषु वैश्यायामुद्भूतो वैद्यहरिचन्द्र इति च कश्चन विद्वल्लोकविश्रुतश्लोकोऽयं प्रसरति –

"ब्राह्मण्यामभवद् वराहमिहिरो ज्योतिर्विदामग्रणीः,
राजा भर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत्।
वैश्यायां हरिचन्द्रवैद्यतिलको जातश्च शंकुः कृती
शूद्रायाममरः, षडेव शबरस्वामिद्विजस्यात्मजाः ॥"2

अत्यर्वाचीनेन केनापि कल्पितोऽयं श्लोको न विश्वासपात्रं भोजप्रबन्धादिचाटुग्रन्थवचनानीव। विभिन्नकालवर्तिनो विख्यातपुरुषा एते शबरस्वामिपुत्रा इत्युक्ते को नु विश्वसिति ? तथापि

1. **"रामनलव्योमरूपैः (चन्द्रैः) शककालेऽभिलक्षिते।**
कोशं विश्वप्रकाशाख्यं निरमात् श्रीमहेश्वरः ॥"
(केषुचिल्लिखितपुस्तकान्तेषु दृष्टोऽयं श्लोकः)

2. See ch. 18. भर्तृहरिः (p. 104)

वैद्यतिलको हरिचन्द्रः प्राचीन इत्यंशमिदं समर्पयतीति सन्तोष्टव्यम् । अनेनाऽयं वैद्यतिलको विश्वप्रकाशकर्तुर्मूलपुरुष इति, अयमेव बाणभट्टविनुतः भट्टारहरिचन्द्र इति कथं न विश्वसनीयम् ? परिशोधकाः परिशीलयन्तु कोऽयं हरिचन्द्र इत्येतद्विचारणायाः फलन्तु शून्यम् । नृपायमानतद्गद्यबन्धस्य मृग्यत्वात् ।

—०—

(३०) भामहः

महानयमालङ्कारिकः। अस्य काव्यालङ्कारग्रन्थश्चिरमन्वभूद्1 विद्वल्लोकविनुतिं कतिपयाब्दशतकेभ्यः पूर्वम्। पश्चाल्लिखितपुस्तकालयेषु विलीनोऽयं पण्डितलोके।

आचार्यदण्डिनः परोऽयमितीतः पूर्वमेव निर्णीतम्। भट्टिकाव्यान्तस्थितं व्याख्यागम्यमिदं काव्यमित्यादिश्लोको न भट्टिरचितः। किन्तु काव्यान्यपि यदीमानीत्यादि भामहश्लोकं दृष्ट्वा व्याख्यात्रा जयमङ्गलेन निर्मित इति च भर्तुहरिजीविते विशदीकृतम्।2 तेनाऽयं शा. ५३० समये सजीव इति वदामः 'प्रणम्य सार्वं सर्वज्ञम्' इत्यादिमङ्गलाचरणश्लोकानुरोधाद् भामहो बौद्ध इति कृतिप्रकाशकाभिप्रायः।3 नायं बौद्ध इति काणेपण्डितस्याशयः। ग्रन्थे बहुत्र वेदशास्त्रब्राह्मणयागप्रशंसा दृश्यते।4 एकत्र बौद्धानामन्यापोहवादस्य खण्डनं चास्ति।5 तेन सार्वसर्वज्ञप्रयोगादयं बौद्ध इति कथनमयुक्तमित्येव वक्तव्यम्। अयं रक्रिलगोमिपुत्र इति कृत्यन्तपद्यं कथयति –

1. Edited with an Introduction by Prof. Batuk Nath Sarma and Baladevopadhyaya. (Haridas Skt Series-61)—Banaras. (1923)
2. See anto ch. 18; Kane : H. S. P. p. 75.
3. भामह. I-1. M. K. H. C. S. L. p. 724.
4. काव्यालं. II. 55; III. 36; IV. 22; 47; V. 37.
5. काव्यालं. VI. 16-17.

"अवलोक्य मतानि सत्कवीना-
मवगम्य स्वधिया च काव्यलक्ष्म ।
सुजनावगमाय भामहेन
ग्रथितं रक्रिलगोमिसूनुनेदम् ॥"1

अत्रस्थरक्रिलसंज्ञामाश्रित्यायं बौद्ध इति न वक्तव्यम् । गोमिन् पूज्ये, गोमानन्यः इति चान्द्रव्याकरणम् । एतेनास्य पितापि प्रसिद्धः पण्डित इति ज्ञातम् । ग्रन्थेऽस्मिन् बुद्धदेवप्रशंसा न क्वापि दृष्टा । तस्मादाबलवत्प्रमाणलाभमयं वैदिक इत्येव मन्तव्यम् । "शब्दार्थौ सहितौ काव्यं, गद्यं पद्यं च तद्द्विधा" इत्यस्य काव्यस्य लक्षणम् ।2 अस्मिन् काव्यालङ्कारे षट्परिछेदकलिते काव्यशरीरम्, अलङ्काराः, काव्यदोषाः, न्यायनिर्णयः शब्दशुद्धिश्चेति पञ्च प्रधानविषयाः सन्ति । कस्मिंश्चिल्लिखितपुस्तकान्ते2 द्वौ श्लोकावेतौ –

"षष्टया शरीरं निर्णीतं शतषष्टया त्वलङ्कृतिः ।
पञ्चाशता दोषदृष्टिः सप्तत्या न्यायनिर्णयः ॥
षष्टया शब्दस्य शुद्धिः स्यादित्येवं वस्तुपञ्चकम् ।
उक्तः षड्भिः परिच्छेदैर्भामहेन क्रमेण वः ॥3

सर्वलक्षणविमर्शनपरेऽस्मिन् पाणिनिकणभक्षन्यासकारादिमतान्युद्घाटितानि । अपि च "श्रद्धेयं जगति मतं हि पाणिनीयम् ।"4 इत्येकत्रानेन पाणिनिमतं प्रशंसितम् । अन्यत्र स्फोटवादः परिहसित एवम् –

1. भामहालंकारः VI. 64.
2. ,, V. 16.
3. ,, VI. 65.
4. ,, VI. 63.

"शपथैरपि चादेयं वचो न स्फोटवादिनाम् ।
नभः कुसुममस्तीति श्रद्दध्यात् कः सचेतनः ।।"1

साहित्यविमर्शकोऽयं लाक्षणिकः सगौरवमर्वाचीनालङ्कारिकैर्व्याख्यातृभिश्च विनुतः । तदेवास्य महत्त्वस्य गमकम् ।

भरतमुनेरनन्तरं दण्डिनः पूर्वं कानिचित् काव्यलक्षणान्युद्गतान्यपि भट्टिकाव्यान्तर्गतं प्रसन्नकाण्डमेव तदनन्तरालङ्कारिकाणां मार्गदर्शकमभवदित्यत्र न कापि शङ्का । तथापि दण्डिभामहाभ्यां न तत् स्मृतमित्याक्षेपोऽस्ति । न तत्प्रत्येकं काव्यलक्षणम्, किन्तु काव्यमित्येतत्समाधानमत्र ।

अनेन स्तुतान्यनेककाव्यान्यद्य न लभ्यानि । महतां मेधाविरामशर्मशाखवर्धनादीनां काव्यानि क्वेवान्तर्हितानि । दण्डिना चत्वार उपमादोषाः कथिता, मेधाविना तु ते सप्तेति निर्णीताः । इममर्थमयं निवेदितवानिति द्वितीयपरिच्छेदे –

"त एत उपमादोषाः सप्त मेधाविनोदिताः ।"2

रामशर्मणोऽच्युतोत्तरग्रन्थमेवं स्मृतवान् द्वितीयपरिच्छेदे –

"नानाधात्वर्थगम्भीरा यमकव्यपदेशिनी ।
प्रहेलिका सा ह्युदिता रामशर्माच्युतोत्तरे ।।"3

शाखवर्धनस्यायं श्लोक उदाहृतो द्वितीये –

"निष्पेतुरास्यादिव तस्य दीप्ताः
शरा धनुर्मण्डलमध्यभाजः ।

1. भामहालंकार. VI. 12.
2. भामहालंकार. II. 40.
3. ,, II. 19.

जाज्वल्यमाना इव वारिधारा
दिनार्धभाजः परिवेषिणोऽर्कात् ।।"1

वक्रोक्तिरस्याभिमतेत्येवं ज्ञायते —

"सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ।।"2

अस्य पद्यरचनं सहृदयरञ्जकं च —

"किंशुकव्यपदेशेन तरुमारुह्य सर्वतः ।
दग्धादग्धमरण्यान्याः पश्यतीव विभावसुः ।।3
तस्या हारी स्तनाभोगः वदनं हारि सुन्दरम् ।
हरिणी तनुरत्यन्तं कियन् न हरते मनः ।।4"

एतन्निर्मितमन्यत् काव्यं न दृश्यते । तथापि भामहोक्त इवायं श्लोकः सदुक्तिकर्णामृतेऽस्ति–

"कुकुभि कुकुभि भ्रामं भ्रामं विलोक्य विलोकितं
मलयजसमो दृष्टोऽस्माभिर्न कोऽपि महीरुहः ।
उपचितरसो दाहच्छेदैः शिलातलघर्षणै–
रधिकमधिकं यत् सौरभ्यं तनोति मनोहरम् ।।"

महद्भिरानन्दवर्धनादिभिः कीर्तितोऽयमालङ्कारिकशेखर इति पुनरुक्तिः ।

— o —

1. भामहालङ्कारः. II. 47.
2. भामहालंकार. II. 85.
3. ,, II. 92.
4. ,, VI. 47.

(३१) कुमारदासः

पूर्वलाक्षणिकैः प्रशंसितस्यास्य महाकवेश्चरितं प्रच्छन्नमासीत् कालवशाच्चिरम् । अयं जानकीहरणं1 नाम काव्यं व्यधत्तेति ग्रन्थान्तश्लोकैर्गद्येन च कथ्यते तदित्थम् –

"नित्यं सद्गुणभक्तिरिन्द्रियदमश्रीसंयतः संयतः
शस्त्रद्योतितमूर्ध्नि मुक्तहृदयोऽभीसङ्गतः सङ्गतः ।
विद्वानस्य कवेः पितार्यहृदयं धीमानितो मानितो
लङ्कैश्वर्यभुजः कुमारमणिरत्यासन्नयः सन्नयः ॥
येनान्यप्रकृतिं निराकृतवता सम्मानितो मानितो
यस्य स्वाङ्गमभिघ्नतो रिपुव भृ?)शं नाशोभितः शोभितः
श्रीमेघोऽस्य कवेरसौ किल बृहद्धामातुलो मातुलो
दृष्टत्रासजडं द्विषामधिगतत्रासेनया सेनया ॥
श्रीमानेकः शरण्यः परिभवविपदां भाजनानां जनानां
रूपेणानुप्रयातो दिवमतिसुभगं रञ्जयन्तं जयन्तम् ।
भ्राता तन्मातुरस्याः शशिधवलयशाः कारणानां रणानां
कर्तुं पुत्रोऽग्रबोधिर्जनशिरसि लसद्भासुराज्ञः सुराज्ञः ॥

---

1. Cantos I-V. With a commentary by Narayana-sastri Vasudeva Nigudkar and English notes & Translation by K. M, Joglekar–Bombay–1908.
Cantos I-X-edited with English notes & trans-lation by Pandit G. R. Nandargikar–Bombay–1907.

आदायैनं दशायां स्थितमपि तदहः स्त्रस्तनाभ्यां स्तनाभ्यां
तुष्टे तस्मिन् गदानामरिहतपितृके पारयन्तौ रयन्तौ ।
आत्मापत्याविशेषं पुपुषतुरहतप्रेमदान्तो मदान्तौ
यत्सानाध्यात् सकाव्यं व्यरचयदसुरद्विण्महार्थं महार्थम् ।।

इति श्रीसिंहलस्य कुमारदासस्य कृतौ जानकीहरणे विंशतिः सर्गः परिसमाप्तिमगमत् ।1

इदं श्लोकचतुष्टयमेकस्मिन् लिखितपुस्तके विंशस्य सर्गस्यान्तेऽभिलक्षितमिति अन्यस्मिन् पुस्तकान्ते गद्यमेव दृष्टं, न तु पद्यानीति च तत्सम्पादकैरभिहितमिव श्रूयते । अपि च धर्माराम पण्डितैः प्रकटितेऽस्मिन् काव्ये तु पञ्चविंशतिसर्गाः सन्तीति, तदन्ते पूर्वोदाहृतचतुर्थश्लोकस्योत्तरार्धमेवास्ति. नातोऽधिकमिति च ज्ञायते ।2

एतेनायं कविः सिंहलराज इति पितरि कुमारमणौ रणे निहिते सति तत्कालसम्भूतो मातुलाभ्यां प्रवर्धित इति च विदितम् । श्लोकविषयमिमं पुरस्कृत्य पाश्चात्यपरिशोधकाः केचन यस्तु महावंशग्रन्थेऽभिवर्णितः, यश्च क्रि॰ श॰ ५१५–५२४ मध्यकाले सिंहलमपालयत् स कुमारधातुसेन एवायं कुमारदास इति निर्णयामासुः । अयं तु केवलमूहः । तत्कालसिंहलप्रभुः कुमारधातुसेनः तस्य पिता मोग्गलान इति महावंशः कथयति । कविरयं कुमारदासः अस्य पिता कुमारमणिरिति चेदं काव्यं कथयति ।3 एवं

1. जा॰ ह. (XX. 6)

2. ,, H. C. S. L. 133. 134.

3. M. K. H. C. S. L. pp. 134-35. S.K. De - H. S. L. p. 185.

स्थिते तेषां निर्णयः कथं विश्वास्यः ? अथ पूर्वविद्वत्कृतकुमारदासप्रशंसा काचित् । राजशेखरः काव्यमीमांसायामेवम्–

प्रतिभानिध्यो मेधाविरुद्रकुमारदासादयो जात्यन्धा अपि महाकवय आसन्निति शृणुमः ।1 उदयसुन्दरीकथावतारिकायां सोड्ढल एवम् –

"बभूवुरन्येऽपि कुमारदासभासादयो, हन्त कवीन्दवस्ते ।
यदीयवाग्भिः कृतिनां द्रवन्ति, चेतांसि चन्द्रोपलनिर्मलानि।।2

राजशेखरनिर्मित इव सूक्तिमुक्तावल्यामयं श्लोकः—

"जानकीहरणं कर्तुं रघुवंशे स्थिते सति ।
कविः कुमारदासश्च रावणश्च यदि क्षमः ।।"3

एवमुज्ज्वलदत्तादिविरचितेषूणादिसूत्रवृत्त्यादिषु अस्य प्रशंशा दृश्यते । तथापि नैकेनाप्ययं सिंहलराज इत्युक्तम् । भूयश्च औचित्यविचारचर्चायां 'न तु कुमारदासस्य' इत्ययं श्लोक उदाहृतः–

'अयि ! विजहीहि दृढोपगूहनं
त्यज नवसंगमभीरु ! वल्लभम् ।
अरुणकरोद्गम एष वर्तते
वरतनु सम्प्रवदन्ति कुक्कुटाः ।।"4

एतदन्तिमपादस्तु "व्यक्तवाचां समुच्चारणे" (१–३–४८) इति पाणिनिसूत्रस्य भाष्ये भगवत्पतञ्जलिनाप्युदाहृतः' । श्लोकोऽयं

1. काव्यमीमांसा-p. 12. (G. O. Series-1.
2. उदयसुन्दरी (p.)-G. O. S. 11.
3. सूक्तिमुक्तावली-p. 45. (G. O. S.)
4. का. माला-part I. p. 144.

जानकीहरणे मारतु नाम। कुमारदासस्येति विदितम्। तेनायं पतञ्जले: पूर्वं इति मतं चोदगात्। पुनश्चायं पादोऽन्यत्रापि दृश्यते। यथा हरदत्तस्य पदमञ्जर्यां –

"अपनयपादसरोजमङ्कतः शिथिलय बाहुलतां गलादृताम्।
क्व च वदनेऽशुकमाकुलीकृतं वरतनु सम्प्रवदन्ति
कुक्कुटाः॥"1

वस्तुतस्तु नायं पादोऽस्य कवेः। छन्दोबद्धमिदं वाक्यम्, अत्र दृष्टान्त इव दार्ष्टान्तिको न सहृदयहृदयङ्गमः पतञ्जलेर्वा, तत्पूर्वस्य वा भवेत्। तदर्वाचीनैः कुमारदासादिभिः कैश्चित् समस्येव गृहीतं, पूरितं च तत्तद्विधमिति ज्ञेयम्। एवं परिशीलितेऽस्य चरिते ग्रन्थपरिमितिः सन्दिग्धैव, पूर्वोदाहृतश्लोकचतुष्टयं प्रक्षिप्तमिव दृश्यते इति भावः प्रस्फुरति। कालश्च विनिश्चेतुमशक्यः। तथापि राजशेखरादतीव पूर्वत्वात् कुमारदासः शा. ५४० समयवर्ती भवेदिति मन्ये।

प्रौढकविरयम्। कवित्वं मृदुलं मधुरं च यथा —

"स्त्रियो न पुंसामुदयस्य साधनं
त एव तद्धामविभूतिहेतवः।
तटिद्वियुक्तोऽपि घनः प्रजृम्भते
विना न मेघं विलसन्ति विद्युतः॥2
करोति शीलेन पतिव्रता पतिं
गुणस्पृहं वश्यमवश्यमङ्गना।
पराभवं भर्तुरुपैति दुस्तरं
विनष्टचरित्रगुणा गुणैषिणः"

1. पदमञ्जरी.
2. जा. हृ. IX. 5.

"फुल्लं यदीदं कमलं किमेव—
मत्रैव नीलोत्पलयोर्विकासः ।
इत्यात्तशङ्को वदनं सुदत्या
हंसः सिषेवे न सरस्तरन्त्याः ॥"1

दैववशाच्चिरमिदमन्तर्हितमपि प्रसिद्धेषु रघुवंशादिमहाकाव्येषु गणनीयं जानकीहरणमिति सत्यम् ।

— 0 —

1. जा. ह. 3. 44.

(३२) हर्षदेवः

राजकविरयं रत्नावलीप्रियदर्शिकानागानन्दरूपककर्ता श्रीहर्षदेवः श्रीहर्ष इति च तत्प्रस्तावनाभिः ख्यायते यथा —

"राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः ।
श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी ।।"

कोऽयं श्रीहर्षः, केन राज्ञा निर्मितमिदं रूपकत्रयम् ? कोऽस्य कालो, निवासश्चेत्यादिविषयाः प्राच्यपाश्चात्यविमर्शकैरनेकैश्चर्चिता, निर्णीताश्च यथेष्टमेतावत्पर्यन्तम् ।

पुनस्तत्तदभिप्रायोद्घाटनमद्य चर्वितचर्वणं भवति । बहुसंशयभूयिष्टमस्य चरितम् । तच्च मदीयसंस्कृतवाङ्मयचरित्रद्वितीयसम्पुटे प्रपञ्चितम् । तदेवात्र संक्षिप्यते ।

शा. ६७७-७०८ मध्यकाले दामोदरगुप्तेन निर्मिते कुट्टिनीमते2 रत्नावलीवृत्तस्य वर्णितत्वात्ततः पूर्वमेव तद् रूपकं प्रसिद्धमित्यवगम्यते ।3 तेन रत्नावल्यादिरूपककर्ताऽयं न काश्मीरराजस्य कलशभूपतेः पुत्रः श्रीहर्षदेवो वा, नापि दशरूपककृतिपोषकस्य मुञ्जमहीपालस्य पिता हर्षवर्धनो वा भवितुमर्हतीति स्पष्टम् । तौ द्वावपि तत्कालादत्यन्तमर्वाचीनौ । विद्वत्कविपोषकः श्रीहर्षविक्रमादित्यः शा. शकपूर्वम् १३४ वत्सरेऽपालयदुज्जयिनीमिति विदितमपि तदाश्रितेन धावकापरनाम्ना प्रकटितमिति च यदुच्यते तदसङ्गत-

---

1. रत्नावली-नाटिका-। 5.
2. Kavyamala-part III.
3. M. K. H. C. S. L. p. 586; S. K. De. H. S. L. p. 258.

मिति भासकविजीवितचरिते स्पष्टीकृतम् ।1 तस्मात्सोऽप्यस्य रूपकत्रयस्य निर्माता श्रीहर्षदेव इति वक्तुं न शक्यम् । अथ प्रसिद्धः कन्याकुब्जपालकः श्रीहर्षोऽस्ति । यद्यपि तस्य हर्षवर्धन इति नामान्तरं रत्नावल्यादिषु न दृश्यते ।2 नापि हर्षचरितादिषु च । तथापि द्वितीयशिलादित्य इति प्रतीतिं गतो हर्षवर्धन एव श्रीहर्षदेव इति बहवश्चरित्रकारा मन्यन्ते । ततोऽयं राजकविः शा. ५२८–६७ मध्यकाले कन्याकुब्जं पालयन् रराजेति विश्वसिमः ।3

"कालिदासादीनामिव यशः, श्रीहर्षादेर्धावकादीनामिव धनम्" इति काव्यप्रकाशवाक्यं.4 तद्व्याख्यातृवचनानि बाणादीनामिव धनमिति पाठान्तरं च पुरस्कृत्य, रत्नावल्यादिकं बाणभट्टेन वा, तदन्येन वा निर्मितमिति तर्कितेपि बहुभिः परिशोधकैस्तद्रूपकत्रयं कन्याकुब्जराजस्य श्रीहर्षदेवस्य काले समुत्पन्नमित्येव निर्धारितम् । तदेवालम् ।

धावकनामा कश्चन कविर्हर्षवर्धनास्थान आसीदिति निर्णेतुं न कदापि साध्यम् । आगर्भश्रीमान्, आत्मगौरवाभिमानी, महाकविर्बाणभट्टो धनाशया स्वनिर्मितं रूपकत्रयं राज्ञे श्रीहर्षदेवाय व्यक्रीणादिति भावनं न कुतोऽपि समुचितम् । राजनाम्ना विलसितं काव्यं तदास्थानकविना निर्मितमित्यालोचनं न सर्वत्रापि कर्तव्यम् । कान्याकुब्जेश्वरस्य श्रीहर्षस्य विद्वत्कवित्वं कथं वा शङ्कनीयमिति न जानीमः ।

---

1. see anti chapter Bhasa p. 61.
2. M. K. H. C. S. L. p. 585.
3. ,, ;, p. 584; De. H. S. L. p. 255.
4. Prof. A. B. Gajendragadkar's 2nd ed. of काव्यप्रकाशः. (chapter I. p. 2)–Bombay (1959)

तस्माच्चिरन्तनविश्वासानुरोधात् रत्नावल्यादिकर्ता बाणादिकविपोषकः श्रीहर्षो हर्षवर्धनापरनामा कन्याकुब्जमहाराज इत्येव वक्तव्यम्। विश्वास्यं च। बाणेन हर्षचरितादिषु रत्नावल्यादिकं न प्रशंसितमित्यादिहेत्वाभासा अत्र न गणनीयाः। भासकालिदासादयः स्वकाव्यमेव स्वीये परस्मिन् काव्ये नास्मरन् खलु! तादृशाभ्यासोऽतीव विरलस्तत्काले। उदयसुन्दर्यां सोढ्ढल एवमलिखत् —

श्रीहर्ष इत्यवनिवर्तिषु पार्थिवेषु,
नाम्नेव केवलमजायत, वस्तुतस्तु।
गीर्हर्ष एष निजसंसदि येन राज्ञा,
सम्पूजितः कनककोटिशतेन बाणः ॥1

अस्य रूपकेभ्यः श्लोकाः सङ्गृहीताः सर्वैरालङ्कारिकैः। विशेषतो दामोदरगुप्तः स्वीयकुट्टिनीमते रत्नावलीनाटकानुकूलं नाटचवर्णनं कुर्वन् तन्नाटिकां च वर्णयन् श्लोकमिमं जग्राह।

"उदयनगान्तरितमिमं
प्राची सूचयति दिङ् निशानाथम्।
परिपाण्डुना मुखेन
प्रियमिव हृदयस्थितं रमणी ॥"2

रत्नावलीप्रियदर्शिके नाटिके, नागानन्दनाटकं चास्य कृतयः। आद्ये बृहत्कथामूले अपि भाषामार्दवेन, रसपात्रौचित्येन च स्वातन्त्र्यं दर्शयतः —

कालिदासमालविकाग्निमित्रं दृष्ट्वायं रत्नावलीं चकारेति परिशीलकाभिप्रायः। दयावीरं नागानन्दं प्रणीयायं सार्वजनीन-

1. M. K. H. C. S. L. p. 586. (f. n. 5)
2. कुट्टिनीमतम्.

विख्यातिं गत इति नातिशयोक्तिः । कथावस्तु उदयनकथान्तर्गतमपि तद्रचनमपूर्वमसदृशम् । रतिशोकशमस्थायिभावसम्मिश्रस्य प्रधानस्य दयारसस्य निरूपणे धनञ्जय-धनिकादिलाक्षणिकैः प्रदर्शितं प्रज्ञा-चातुर्यमेवास्य नाटकस्य महत्त्वे निदर्शनम् ।

कुवलयानन्दकर्त्रा, अनुभयताद्रूप्यरूपकालङ्कारस्योदाहृतोऽयं रत्नावलीश्लोकः —

"किं पद्मस्य रुचिं न हन्ति, नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते
दर्पस्यादमृतेन चेदिह तवाप्यस्त्येव बिम्बाधरे ॥"1

प्रियदर्शिकां रक्षेति वासवदत्तया प्रार्थितस्य नायकस्योक्ति-रियम् स्वगतम् —

"सञ्जातसान्द्रमकरन्दरसां क्रमेण
पातुं गतश्च कलिकां कमलस्य भृङ्गः ।
दग्धा निपत्य सहसैव हिमेन चैषा
वामे विधौ न हि फलन्त्यभिवाञ्छितानि ॥"2

स्वभक्षकं गरुत्मन्तं प्रति जीमूतवाहन एवमवादीत् —

"शिरामुखैः स्यन्दत एव रक्त—
मद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि च ते महात्मन्
किं भक्षणात्त्वं विरतो गरुत्मन् ॥"3

1. कुवलयानन्दः कारिका. 20. V. 4.
2. प्रियदर्शिका. (IV. 8.)
3. नागानन्द (V. 16.)

सोऽयं महाकविर्यशःकायः शाश्वतजीवी । बाणमयूरादि-महाकवीनामाश्रयः, संस्कृतभाषापोषकः, कविराजो, राजकविरयं श्रीहर्षः केषाञ्चिन्मते हर्षवर्धनोऽभूद्वा, पाठकानामस्माकं सर्वदा हर्षवर्धन एव रूपकत्रयरूपेणेत्यलम् ।

नास्य कृतिरपरा संलक्ष्यते; तथाप्येतन्निर्मित इवायं श्लोकः सदुक्तिकर्णामृते दृश्यते । अत्र रतिक्रोधावङ्गौ शमस्येव प्राधान्य-मिति धनिकेन दशरूपकव्याख्यायाम् ।

"एकं ध्याननिमीलनान्मुकुलितं चक्षुर्द्वितीयं पुनः
पार्वत्या वदनाम्बुजस्तनतटे सम्भोगभावालसम् ।
अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥"1

1. दशरूपावलोक. IV. 34. कारिकाव्याख्यायाम्.

(३३) मयूरकविः

विद्वल्लोके प्रत्यक्षो भवत्ययं सूर्यशतकेन साकम्। अयं भट्टबाणस्य श्वसुर इति, स्याल इति च द्वौ पाठौ स्तः।

वृद्धभोजस्य सभायामस्तीति भक्तामरस्तोत्रव्याख्याया मानतुङ्गाचार्यः, प्रबन्धचिन्तामणौ मेरुतुङ्गाचार्यश्चाकथयताम्। एतादृशचाटूक्तिभिर्वेद्यांशस्त्वेक एव, बाणस्यायं समकाल इति।1 इममर्थं पोषयति शार्ङ्गधरपद्धतौ वीक्ष्यमाणमिदं राजशेखरकवि-वचनम्। विशेषतः श्रीहर्षदेवसभायामस्य सभ्यत्वं च निगदति।

"अहो ! प्रभावो वाग्देव्या यन्मातङ्गदिवाकरः।
श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः॥"2

परिमलकालिदासापरनामा पद्मगुप्तोऽपि नवसाहसाङ्कचरिते स्थिरीकृतवान् पूर्वोक्ताभिप्रायमेवम् –

"सचित्रवर्णविच्छित्तिशालिनोरवनीपतिः।
श्रीहर्ष इव संघट्टं चक्रे बाणमयूरयोः॥"3

मातङ्गदिवाकरः श्रीहर्षस्य सभ्य इत्यत्र राजशेखरवचनमेव प्रमाणं, नान्यत्। कोऽयं दिवाकरः, किमनेन निर्मितमिति प्रश्नौ निरुत्तरौ। अपि च, जगद्गुरुः शङ्कराचार्यः शास्त्रवादे बाणमयूर-दण्डिप्रभृतीन् जिगायेति यदुक्तं माधवाचार्येण संक्षेपशङ्करविजये तदपि प्रमाणान्तरबद्धं, न विश्वसनीयं च। सेयं तदुक्तिः।

1. M. K. H. C. S. L. p. 327.
2. शार्ङ्गधरपद्धतिः – 189. श्लो.
3. नवसाहसांकचरितम्.

"स कथाभिरवन्तिषु प्रसिद्धान्,
विबुधान् बाणमयूरदण्डिमुख्यान् ।
शिथिलीकृतदुर्मताभिमानान्,
निजभाष्यश्रवणोत्सुकांश्चकार ॥"1

नेदं वचो विचार्यं बाणमयूराभ्यामत्यन्तार्वाचीनत्वाज्जगद्गुरोः तेन मयूरो बाणभट्टेन सह कन्याकुब्जे श्रीहर्षसभायां शा. ५२८–६७ मध्ये समासीदिति वेद्यम् । सूर्यशतकं भक्तलोके प्रसिद्धम् । वल्लभदेवत्रिभुवनपालमधुसूदनादिभिर्व्याख्यातम् । जयमङ्गलोऽस्य वाणीमेवं स्तुतवान् –

"भक्तमयूरवक्त्राब्जपदविन्यासशालिनी ।
नर्तकीव नरीनर्ति सभामध्ये सरस्वती ॥"

राजशेखर एवं प्राशंसत् –

"दर्पं कविभुजङ्गानां गता श्रवणगोचरम् ।
विषविद्येव मायूरी मायूरी वाङ् निकृन्तति ॥"2

सूर्यशतकमहिमा कविनैवं वर्णितः –

"श्लोकालोकस्य भूत्यै शतमिति रचिताः श्रीमयूरेण भक्त्या
युक्तश्चैतान् पठेद्यः सकृदपि पुरुषः सर्वपापैर्विमुक्तः ।
आरोग्यं सत्कवित्वं मतिमतुबलं कान्तिमायुःप्रकर्षं
विद्यामैश्वर्यमर्थं सुतमपि लभते सोऽत्र सूर्यप्रसादात् ॥"3

---

1. सं. शं विजयः
2. सूक्तिमुक्तावली-p. V. G. O, Series-Baroda (1938)
3. सूर्यशतकम् (101)

मयूरकविनिर्मिता इति सदुक्तिकर्णामृते नोपचितेष्वयमेकः –

"सव्यानां शुकपल्लवेषु तरलं वेणीगुणेषु स्थितं
मन्दं कञ्चुकसन्धिषु स्तनतटोत्संगेषु दीप्तार्चिषम् ।
आलोक्य त्रिपुरावरोधनवधूवर्गस्य धूमध्वजं
हस्तत्रस्तशरासनो विजयते देवो दयार्द्रेक्षणः ।।"[1]

अनेन शिवस्तवश्च कृत इति जनश्रुतिरस्ति । न तत्काव्यमद्यापि लब्धम् । सूर्यशतकानि सूर्याष्टकानि च बहूनि सन्ति । तथापि न तेषां तादृशी प्रशस्तिर्यादृशी मयूरकृतस्य सूर्यशतकस्य ।

1. सदुक्तिकर्णामृतम्-I. 15. 3v.

(३४) भट्टबाणः

निवेदितनिजोदन्तानां पूर्वकवीनामयमाद्यः। हर्षचरित-प्रथमोच्छ्वासाद्यत्किञ्चिदेतच्चरितमेवमुपलब्धम् अस्य वंशस्य मूल-पुरुषो वत्सः, सकलविद्यापारङ्गतस्तपोधनो ब्राह्मणः ; तस्य निवासः प्रीतिकूटः स तु विन्ध्यप्रदेशे प्रवहतो हिरण्यवाहनामक महानदस्य तीरेऽस्ति। स नद एव शोण इत्युच्यते। तमेवाद्य शोणा नदीति कथयन्ति।[1]

बाणस्य पितामहोऽर्थपतिनामा वेदवेदाङ्गविद्वरः। तस्यैकादशपुत्रेषु चित्रभानुरस्य पिता, माता तु राजदेवी। चन्द्रसेन–मातृसेनावस्य पारशवौ भ्रातरौ। भाषाकविरीशानोऽस्य परं मित्रम्। शैशवेऽस्य माता दिवं गता। अस्मिन् चतुर्दशवर्षदेशीये पिता च स्वर्गमगात्। तत्कालेऽधीतवेदशास्त्रोऽयं बाणो बाल्य-चापल्येन देशान्तरदिदृक्षाकुलहृदयः पितृपितामहार्जितं विभवमस्मरन्, विद्याव्यासङ्गमगणयन्, मित्रैः साकं गृहाद् निर्गत्य पर्यटन्, तत्र तत्र राजकुलानि च सेवमानः परिभ्रम्य, चिराय वात्स्यायनवंशाश्रयां जन्मभूमिं पुनराजगाम। आगत्य च कृतदारपरिग्रहो गृहमेधिविधी-नाचरन् विवधविद्याविज्ञानमुद्दीपयन् सुखमनुभवन् कतिपयाब्दा–ननैषीदात्मनो गृहे। अनन्तरं स्वविख्यातिं शृण्वता श्रीहर्षसोदरेण कृष्णभूपतिना समाहूतः, कन्याकुब्जं गत्वा, तद्राजास्थाने महासचिव-पदवीमलञ्चकार, चकार च हर्षचरितमष्टोच्छ्वासं सुललितं गद्यम्।

1. For details vide M. K. H. C. S L. p. 445. Dr. S. K. De-H. S. L. p. 225.

प्राच्यां कलिङ्गान्, दक्षिणायां नर्मदातीरजनपदान्, प्रतीच्यां वलभीराज्यम्, उत्तरस्यां नेपालविषयं च स्वायत्तीकृत्य, यस्तु द्वितीयशिलादित्यः सार्वभौमख्यातिमलभत स एव हर्षवर्धनः कन्याकुब्जपालकः श्रीहर्ष इति चरित्रप्रथितत्वात्। तत्समकालोऽयं बाणः शा. ५२८–६७ मध्यकाले कन्याकुब्जे आसीदिति कथनं समुचितमेव स्यात्।1

अस्य द्वितीयं गद्यकाव्यं कादम्बरी यद् बाणोच्छिष्टं जगत्सर्वमिति लोकोक्तेः –

"कादम्बरीरसज्ञानामाहारोऽपि न रोचते।"

इति प्रशंसायां च मूलम्। गुणाढचकृतबृहत्कथातः संगृहीता कादम्बरीचन्द्रापीडकथेयमवान्तररसवत्कथाभिर्मनोहरव र्ण ना भि श्च चमत्कृता। काव्यमिदमाजन्मतो देशमभितः पाठकविनुतिपात्रमासोत्। काश्मीरीयः काशीनाथकविरनेन कृष्टहृदयः संक्षिप्तकादम्बरीं व्यरचयत्। तदुक्तिरियम् –

"काश्मीराभिजनो द्विजः सुमतिमान् दृष्ट्वा तु कादम्बरीं
बाणाख्येन कवीश्वरेण रचितां दीर्घां सुगूढार्थकाम्।
काशीनाथसमाख्यया सुविदितः श्रीपद्मराजप्रभो-
रादेशादकरोदिमां सुललितां संक्षिप्तकादम्बरीम्॥"

मणिरामकविरेतत्सारमाहृत्य, कादम्बर्यर्थसारं काव्यं व्यधत्त2। सौमेश्वरदेवेन बाणस्य कवित्वमहत्वं कीर्तिकौमुद्यामेवं वर्णितम् –

1. M. K. H. C. S. L. p. 447.
2. कादम्बरी नाम्ना समुदिता अर्वाचीनग्रन्था बहवः सन्ति।

"युक्तं कादम्बरीं श्रुत्वा कवयो मौनमाश्रिताः ।
बाणध्वनावनध्यायो भवतीति स्मृतिर्यतः ॥"[1]

अस्य महिमा गोवर्धनाचार्येणैवं वर्णितः –

"जाता शिखण्डिनी प्राग् यथा शिखण्डी तथावगच्छामि ।
प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति ॥"

गङ्गादेव्याऽस्य वाणी वर्णितैवम् –

"वाणी पाणिपरामृष्टवीणानिक्वाणहारिणीम् ।
भावयन्ति कथं नान्ये भट्टबाणस्य भारतीम् ॥"

त्रिविक्रमकविरेवं स्तुतवान् नलचम्पूग्रन्थे –

"शश्वद्बाणद्वितीयेन नमदाकारधारिणा ।
धनुषेव गुणाढ्येन निःशेषो रञ्जितो जनः ॥"

राघवपाण्डवीयकर्ता कविराजसूरिः एवमाह –

"सुबन्धुर्बाणभट्टश्च कविराज इति त्रयः ।
वक्रोक्तिमार्गनिपुणाश्चतुर्थो विद्यते न वा ॥"

धर्मदाससूरिणा विदग्धमुखमण्डने विनुतोऽयमेवम् –

"रुचिरस्वर्णपदा रसभाववती जगन्मनो हरति ।
तत्किं तरुणी ? न हि न हि वाणी बाणस्य मधुरशीलस्य ॥"

---

1. कीर्ति-कौमुदी–I. 15. (Bombay Sanskrit Series–25)–1883. भट्टबाण-स्तुति-कुसुमाञ्जलिः-ई. वे. वीर–वीरराघवाचार्येण संकलिता (संस्कृत-साहित्यपरिषत्पत्रिका. XIII 38 पृ-1930; कलकत्ता)

चन्द्रदेवकविकृता प्रशंसेयम् –

'श्लेषे केचन शब्दगुम्फविषये केचिद् रसे चापरेऽ
लङ्कारे कतिचित् सदर्थविषये चान्ये कथावर्णने ।
आसर्वत्रगभीरधीर कविताविन्ध्याटवीचातुरी-
सञ्चारे कविकुम्भिकुम्भभिदुरो बाणस्तु पञ्चाननः ॥"1

एवं कादम्बरीकाव्यमखिलसुधीस्तुतिपात्रं भविष्यतीति प्रथमतो ज्ञात्वैवानेन कृतात्मस्तुतिरपि समर्हति, यथा–

'अस्ति कविसार्वभौमो वात्स्यायनवंशसम्भवो बाणः ।'

सत्यमयं गद्यकविसार्वभौमोऽद्वितीयोऽद्यापि । तथाप्येवं गुणविशेषणविशिष्टो गद्यप्रबन्ध एवंविध प्रणुतिपात्रस्यकविचक्रवर्तिनो हस्ते न समाप्तिमगमदिति सन्तापमनुदत्यस्य तनयेन भूषणभट्टेन पूरित इति सन्तोषः । तद्भागः उत्तरकादम्बरीत्युच्यते । सर्वथा पितृवचनमनुसृत्य भक्तिश्रद्धाभ्यामनेन निर्मितोऽप्ययं भागः पूर्वभागवन्न प्रौढः । अपि तु सुगमः सुखबोध्यश्च प्रियविरहपीडितायाः कादम्बर्याः सन्तापवचनानि पत्रलेखामुखात् चन्द्रापीडः शृणोतीति कथांशेनारब्धोऽयं ग्रन्थः शुभान्तमगमत् । भूषणभट्टवाक्यमिदम् –

"याते दिवं पितरि तद्वचसैव सार्धं
विच्छेदमाप भुवि यस्तु कथाप्रबन्धः ।
दुःखं सतां तदसमाप्तिकृतं विलोक्य
प्रारब्ध एष स मया, न कवित्वदर्पात् ॥"2

1. 'भट्टबाणस्तुतिकुसुमाञ्जलिः' द्रष्टव्यः. (Journal of the Sanskrit Sahitya Parisad-XIII. 38 पृ. 1930-calcutta) स एव डाक्टर् कृष्णमाचार्यमहाभागैः स्वकीये संस्कृतवङ्मय चरिते समद्घृतः (448-49 पृ.)
2. कादम्बरी-उत्तरभागस्य भूमिकाश्लोकः.

उदयसुन्दरीकथायां सोड्ढलेन कृतेय स्तुतिरस्य महाकवेर्महिमानमावेदयति सम्यक् कालिदासादीनां महत्त्वेन साकम् –

"बाणस्य हर्षचरिते निशितामुदीक्ष्य
शक्ति न केऽत्र कवितासु मुदं त्यजन्ति ।
मान्द्यं न कस्य च कवेरिह कालिदास-
वाचां रसेन रसितस्य भवत्यधृश्यम् ॥1

वागीश्वरं हन्त भजेऽभिनन्द-
मर्थेश्वरं वाक्पतिराजमीडे ।
रसेश्वरं स्तौमि च कालिदासं
बाणं तु सर्वेश्वरमानतोऽस्मि ॥2

श्रीहर्ष इत्यनिर्वतिषु पार्थिवेषु
नामैव केवलमजायत, वस्तुतस्तु ।
गीर्हर्ष एष निजसंसदि येन राज्ञा
सम्पूजितः कनककोटिशतेन बाणः ॥"3

अनेन श्रीहर्षस्य विद्याप्रियत्वं बाणस्य कनकाभिषेकगौरवं च प्रकटीकृतम् ।

अथास्य काव्यान्यन्यानि :—

मुकुटताडितकशारदचन्द्रिकानामकरूपके अनेन निर्मिते इति प्रवादः प्रसरति परिशोधकलोके । अत्र भोजेन शृङ्गारप्रकाशे मुकुटताडितकश्लोक उदाहृत इत्येकं कारणम् । नलचम्पूव्याख्याने

1. उदयसुन्दरीकथा-I. 5 (.GO.S. II-Baroda; 1920)
2. "
3. तत्रैव

गुणविजयगणिः "यथा मुकुटताडितकनाटके बाणः" इत्येकमिमं श्लोकमुदाहृतवानित्यपरं कारणम् ।

"आशाः प्रोषितदिग्गजा इव, गुहा प्रध्वस्तसिंहा इव
द्रोण्यः कृत्तमहाद्रुमा इव, भुवः प्रोत्खातशैला इव ।
बिभ्राणाः क्षयकालरिक्तसकलत्रैलोक्यकष्टां दशां
जाताः क्षीणमहारथाः कुरुपतेर्देवस्य शून्याः समाः ॥1

अपि च शारदातनयेन भावप्रकाशे शारदचन्द्रिका स्मृतेत्यन्यत्कारणम् । यथा –

"कल्पितं भट्टबाणेन यथा शारदचन्द्रिका ।
दिव्येन मर्त्यस्य वधः काव्यस्यावश्यभावतः ॥"2

दशरूपकेऽयं श्लोकः प्रकारान्तरेणास्तीति यदुच्यते तदसत् । न तत्रायं श्लोकः –

"चन्द्रापीडस्य मरणं यत् प्रत्युज्जीवनान्तिमम् ।
कल्पितं भट्टबाणेन यथा शारदचन्द्रिका ॥"3

नातोऽधिकं प्रमाणमनयोर्बाणकर्तृत्वे लब्धम् । यथा च कैश्चित्कृतानि काव्यानि केषांचिच्छिरस्यारोपितानि चाटुप्रबन्धैः, किंवदन्तीभिश्चेति जानीमः । एवं च कादम्बरीकर्तैवायमिति विमृश्य निर्णेतुमपीदं रूपकद्वयं नाममात्रावशेषत्वान्न शक्यतेऽद्य । ततोऽयथार्थोऽयं प्रयास इति तूष्णींभाव एव वरम् ।

---

1. द्रष्टव्या (63. पृ.) पीटर्सन्पण्डित-निर्मिता सुभाषितावली–भूमिका.
2. भावप्रकाशः. 252. G.O.S. 45–Baroda. (1920)
3. M.K.H.C.S.L. p. 452. (f. n. 4)

अथ पार्वतीपरिणयनाटकम्, शिवाष्टकम्, चण्डीशतकं च, बाणभट्टेन विरचितानीति महती प्रतीतिः प्रचलति । अत्र नाटकं नानेन निर्मितं, तद् वामनभट्टबाणेन रचितमिति प्रतिवादश्च प्रबलः आमूलाग्रं नीरसं, समन्ततः शब्दतोऽर्थतश्चानुकृतकालिदासकुमारसम्भवम् न केनापि पूर्वालङ्कारिकेण स्मृतमिदं कविसार्वभौमस्य वाचि नारोपणीयमिति प्रतिवादिनः ।1 यद्यपि बाणस्य पद्यकविता गद्यकवितावन्न प्रौढा, नापि सुमनोहरा, तथापीदं नाटकं बाल्येऽनेन रचितमित्यङ्गीकार्यमेवेति वादिनः । रचने परिशीलिते पात्रानौचित्यमपि प्रत्यक्षं भवति । पश्यन्तु –

"आभोगशालिकुचकुट्मलमायताक्ष्याः
वक्षोऽवकाशमभिवाञ्छति सन्निरोद्धुम् ।
अप्यस्तिनास्तिवचसां विषयेऽवलग्ने
तन्वी समुल्लसति काचन रोमरेखा ।।" 2

हिमवद्वचनमेतत् । पित्रा स्वकुमारीस्तनद्वयमध्यरोमावलीवर्णनमेवं कृता रङ्गस्थले ! ईदृशमश्राव्यमनुचितं वर्णनं कस्य वाचि स्थापनीयम् ? नाहं निर्देष्टुं शक्तः । पाठकैः परीक्ष्यताम् ।

अथ बाणस्य शिवाष्टककर्तृत्वं प्रतिहतम्, शिवभक्तत्वात् । हर्षचरितमङ्गलाचरणमेवात्र ज्ञापकम् 'नमस्तुङ्गशिरश्चुम्ब' इत्यादि —

अथ चण्डीशतकम् :—

इदमनेन निर्मितमित्यत्र न कापि विप्रतिपत्तिः तथाप्येतदुत्पत्तिकारणमिव बाणमयूरसम्बन्धिनी या चाटुकथा श्रूयते सा न विश्वसनीयापि विलिख्यतेऽत्र ।

1. M. K. H. C. S. L. p. 452.
2. पार्वतीपरिणयम्–I. (4 पृ)

जनश्रुतिः

भट्टबाणस्य धर्मपत्नी मयूरकवेः स्वसा ।[1] एकदा भावुक-गृहमागतो मयूरो रात्रौ भोजनानन्तरं बहिर्वेदिकायां स्वपिति । तदा शयनगृह एकशय्यागतयोर्दम्पत्योः प्रणयकलह आसीत् । तेन प्रति-कूला जाया पराङ्मुखी शयिता । न कीदृशेनापि सान्त्वनेन प्रसन्नाऽभवत् । तदा परितप्तहृदयो बाणकविः इतिकर्तव्यतामूढः सन्, तस्याः कोपशान्तिमभिलषन् पुनः पुनश्च सान्त्वयन्नेवं स्तोतुमुपचक्रमे –

'गतप्राया रात्रिः, कृशतनु शशी शीर्यत इव
प्रदीपोऽयं निद्रावशमुपगतो घूर्णित इव ।
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो'

तस्मिन् समये सुप्तप्रबुद्धो मयूरस्तृतीयपादं श्रुत्वाऽनुपद-माशुनैवं चतुर्थचरणं पूरितवन् ।

"कुचप्रत्यासत्या हृदयमपि ते चण्डि ! कठिनम् ?"[2] चरणेऽस्मिन् श्रवणपथं गते सति, कोपारुणलोचनो भूत्वा बाणो बहिरागत्य, भवतः स्वसैवमनुचितं पराभूता भवता कुष्ठरोगी भवेति शशाप । तदा विस्मितो मयूरः शयनादुत्थाय, निष्कारणशाप-विषादाकुलः 'रे भावुक ! निरपराधोऽहं, न हि जानामि मत्सहो-दरीसांत्वनं भवता क्रियत' इति सविलासं कुपितनायकानुवर्णनं करोषीतिबुद्ध्या मया पूरितोऽयं श्लोकः । तत्त्वमविज्ञाय मां शेपिथ क्षयरोगी भवेति प्रत्यशपत् । अनन्तरं सूर्यध्यानेन मयूरः, चण्डि-काराधनेन बाणश्च रोगशान्तिमलभत । तदेव सूर्यशतकचण्डी-शतकयोर्जन्मकारणमिति ।

---

1. M.K.H.C.S.L. pp. 327, 451.
2. सुभाषितावली–1612. सूक्तिमुक्तावली. p. 284.

नेदं सत्यमपि ग्रन्थस्थमभवद्यथा:– आदित्यादेर्मयूरादीनामिवानर्थनिवारणमिति मम्मटोक्ति: काव्यप्रकाशे ।1 सेयं कथा जैनग्रन्थेषु केषुचिदस्तीति श्रूयते ।

अस्य महाकवेर्हर्षचरितं चरित्रकर्तृणां मार्गदर्शकम् । साहित्यसर्वस्वं कादम्बरी तु भाषातत्त्वजिज्ञासूनां सद्गुरूपदेश: । अत्र मुन्याश्रमहिमालयाच्छोदसरोवर्णनान्यनुकर्तुमप्यशक्यानि । महाश्वेताप्रस्ताव: स्तुतेरतीत: । शुकनासोपदेशो निरुपमान: । हर्षचरितकाव्यारम्भे व्यासभासकालिदासादिप्राचीनमहाकवीन् नमस्कुर्वता बृहत्कथादिपूर्वग्रन्थान् स्मरताऽनेन वाल्मीकिमहर्षिराद्यकविर्न ध्यात:, रामायणमपि न स्मृतम् । किंवा कारणमत्र न विद्म: । तथाप्येतादृशसदाचारस्यायं मार्गदर्शीति वेद्यम् । बाणवाणी दिव्यवाणीति शिवम् ।

---

1. का· प्र· ।.

(३५) धर्मकीर्तिः

अयं महान् बौद्धमतप्रचारकः, दिङ्नागाचार्यनिर्मितप्रमाण-समुच्चयस्य व्याख्याता, बुद्धनिर्वाणस्तोत्र-बौद्धसङ्गत्यादिकृतिकर्ता, स्वकाले बौद्धमतखण्डनं कुर्वाणस्य विख्यातविदुषः कुमारिलभट्टस्य प्रत्यर्थी मताभिमानी ।1

आदौ देशे व्याप्तमस्य ग्रन्थजातं बौद्धमतेन साकमन्तरितमपि कानिचिद् वाक्यानि केचन श्लोकाश्च परग्रन्थेषूदाहृताः संलक्ष्यन्ते तत्र तत्र । यथा –

सुबन्धुर्वासवदत्तायां "बौद्धसङ्गतिमिवालङ्कारशोभिताम्" इत्येतत्कृतिं सस्मार2 । आनन्दवर्धनो ध्वन्यालोकतृतीयोद्योते –

"लावण्यद्रविणव्ययो न गणितः, क्लेशो महानर्जितः
स्वच्छन्दं चरतो जनस्य हृदये चिन्ताज्वरो निर्मितः ।
एषाऽपि स्वयमेव तुल्यरमणाभावाद्वराकी हता
कोऽर्थश्चेतसि वेधसा विनिहितः तन्व्यास्तनुं तन्वता ।।3"

इतीमं श्लोकमुदाहृत्य, नात्र व्याजस्तुत्यलङ्कारः, किन्त्व-प्रस्तुतप्रशंसैवेति निर्णीय, न चायं श्लोकः क्वचित्प्रबन्ध इति श्रूयते तथा चायं धर्मकीर्तेः श्लोक इति प्रसिद्धिः सम्भाव्यते च तस्यैव, यस्मात् इति विलिख्य, पुनरिमं श्लोकं चोदाहृतवान् –

---

1. M.K.H.C.S.L. p. 733.
2. वासवदत्ता–p. 208. Chowkhamba series No. 2.
3. ध्वन्यालोकः 3. (कारिका ६७.३)

"अनध्यवसितावगाहनमनल्पधीशक्तिना-
प्यदृष्टपरमर्थतत्त्वमधिकाभियोगैरपि ।
मतं मम जगत्यलब्धसदृशप्रतिग्राहकं
प्रयास्यति पयोनिधेः पय इव स्वदेहे जराम् ॥"1

प्रथमः श्लोक ईषत्पाठभेदमौचित्यविचारचर्चायामप्यस्ति । बहुभिः परिशोधकैरयं कविः क्रि· ६–७ शताब्द्योर्मध्यकाले स्थित इति निर्दिष्टम् । अस्य कालनिर्णये प्रत्यक्षसाक्ष्यं नास्ति । तथाप्ययं शा. ५२०–६०० मध्यसमये आसीदिति मन्ये । अपि च धर्मकीर्तिः कुमारिलभट्टं जानातीति च मदभिप्रायः ।2 अनेन रूपावतार इति व्याकरणग्रन्थो निर्मितः ।3 एकं शृङ्गारप्रधानं काव्यं च निर्मितमित्यालङ्कारिकैरुदाहृताः सुभाषितावलीसदुक्तिकर्णामृतादिषु दृष्टाश्च श्लोकाः कथयन्ति । तेषु केचन यथा –

कुवलयानन्दे विभावनालङ्कारस्य –

"अविवेकि कुचद्वन्द्वं हन्तु नाम जगत्त्रयम् ।
श्रुतिप्रणयिनोरक्ष्णोरयुक्तं जनमारणम् ॥"4

सदुक्तिकर्णामृते चन्द्रोदयवर्णनमिदम् –

"शशिनमसूत प्राची नृत्यति मदनो हसन्ति ककुभोऽपि ।
कुमुदरजः पटवासं विकिरति गगनाङ्गणे पवनः ॥"5

---

1. ध्वन्यालोकः 3. (कारिका ६७. ४)
2. M.K. p. 733.
3. M.K. H. C. S. L. p. 733 (f. n. 8)
4. कुवलयानन्दः. (का. 81-2.)
5. M.K.H.C.S.L. p. 733. (f. n. 5); सुभाषितावली. Intro. p. 48. सूक्तिमुक्तावली-p. 172. (v.)

कवीन्द्रवचनसमुच्चये –

"नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः ।
तत्तु तत्रैव रमते हताः पाणिनिना वयम् ॥1

हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः ॥2

सुभाषितावल्यादिषु –

"सङ्गमविरहकल्पे वरमिह विरहो, न सङ्गमस्तस्याः ।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥3

शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः ।
तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥"4

"वक्त्रेन्दोर्न हरन्ति भाष्पपयसां धारा मनोज्ञां श्रियं
निःश्वासा न कदर्थयन्ति मधुरां बिम्बाधरस्य द्युतिम् ।
तन्व्यास्तद्विरहे विपक्वलवलीलावण्यसंवादिनी
छाया कापि कपोलयोरनुदिनं तस्याः परं शुष्यति ॥5

---

1. क.व.स. (v. 226); सुभाषितावली. (v. 1232)
2. अमरुकशतकम्–(Appendix) 138 v. K.V.S. 227 v. ('धर्मकीर्तेः')
3. सदुक्ति. II. 91 (4. v.)
4. सुभाषितावली. (2030 v.)
5. ,, Intro. p. 47.

वैदिकैर्बौद्धग्रन्था दूषिता इति सोल्लुण्ठनमेवं वदति –

"शैलैर्बन्धयति स्म वानरहृतैर्वाल्मीकिरम्भोनिधि
व्यासः पार्थशरैस्तथापि न तयोरत्युक्तिरुद्भाव्यते ।
वागर्थौ च तुलाधृताविव तथाप्यस्मत्प्रबन्धानयं
लोको दूषयितुं प्रसारितमुखस्तुभ्यं प्रतिष्ठे नमः ॥"[1]

आलोचितेऽस्य श्लोकस्य भावे बौद्धवैदिकमतविवादे साधारणेऽपि, तत्काले सविशेषं तत्परमतखण्डनाय देशयात्रां कुर्वतः प्रतिष्ठानपुरे बौद्धान् जित्वा, पूर्वोक्तं कोपमाविष्कृतवान् धर्मकीर्तिरिति द्योत्यते । श्लोकेऽस्मिन् प्रतिष्ठाशब्दः प्रतिष्ठान पुरपरत्वेन प्रयुक्त इति च वक्तुं शक्यते । तावेतौ समकालौ । धर्मकीर्तिर्वृद्धः, कुमारिलो युवेति चात्रावगमः । तत्त्वं जानन्तु पाठकाः ।

1. सुभाषितावली p. 48

(३६) कुमारिलभट्टः

तात्कालिकपूर्वमीमांसकेष्वग्रगण्यः, पण्डितसार्वभौमोऽयमसहायशूरः, परमतविदलनेन वैदिकमतं ररक्षेति प्रख्यातिं गतः। सोऽयं शास्त्रकविरपि भवभूतिमहाकवेर्गुरुत्वेन श्लोकात्मकशास्त्रकृतिकर्तृत्वेन चास्यां कृतौ कृतप्रवेशोऽभत्।।[1]

कुमारिल आन्ध्रः, तैत्तिरीयाध्येता, विज्ञातसकलवेदवेदाङ्गः, आन्ध्रोत्कलानां संयोगे जयमङ्गलग्रामे समजनीत्यादिकं जैनमत–विदलनादिकमस्य चरितं जिनविजयाख्ये परमतग्रन्थे वर्णितमेवम्। तेनेदमतिविश्वास्यम् –

"आन्ध्रोत्कलानां संयोगे पवित्रे जयमङ्गले।
ग्रामेन्तिके महानद्या भट्टाचार्यः कुमारिलः॥
आन्ध्रजातिस्तित्तिरिको माता चन्द्रगुणा सती।
यज्ञेश्वरः पिता यस्य स वैदिकमहापथे॥
महावादी महान् घोरः श्रुतीनां चाभिमानवान्।
जिनानामन्तकः साक्षाद् गुरुद्वेष्टाऽतिपापवान्॥"[2]

तृतीयश्लोके जिनविजयकर्त्रायमति परुषं निन्दितः; तत्सहजं तत्स्वभावोचितं च। तथापि यत्किञ्चित् सत्योदन्त आविष्कृत इत्येव सन्तोषः। नाहं जिनविजयद्रष्टा। एते श्लोकाः, कुमारिलविजयकथाश्च, आन्ध्रहिन्दूदेशचरित्रग्रन्थात् संगृहीताः।

---

1. H. C. S. L. pp. 618-19.
2. Sri K. V. Lakshmana Rao - Hindu - Mahayug (in Telugu)

अस्य महावादित्वं, जिनविद्वेषित्वं च धर्मकीर्तेर्मनःशल्यं सत्, पूर्वोक्तस्य शैलेर्बन्धयति इति श्लोकस्य कारणमभूदित्यनेनायं शा. ५५०–६४० मध्यस्थश्चिरकालजीवीति कथ्यते। मीमांसक-सम्प्रदायविदां च मतमेवम् –

अस्य भवभूतिगुरुत्वमुत्तरत्र द्रक्ष्यामः। तदप्युक्तकालस्य समर्थकं भवेत् श्लोकवार्तिकारम्भेऽयमेवमुवाच –

"प्रायेणैव हि मीमांसा लोके लोकायतीकृता।
तामास्तिकपथे कर्तुमयं यत्नः कृतो मया॥"

जैमिनिर्न निरीश्वरवादी, परन्त्वात्मास्तित्ववादीत्येवमुद्-बोधयामास कुमारिलः प्रतिवादिनः –

"इत्याह नास्तिक्यनिराकरिष्णु-
रात्मास्तितां भाष्यकृदत्र युक्त्या।
दृढत्वमेतद्विषयः प्रबोधः
प्रयाति वेदान्तनिषेवणेन॥"

अस्य श्लोकवार्तिकमङ्गलाचरणश्लोकोऽयम् –

"विशुद्धज्ञानदेहाय त्रिवेदिदिव्यचक्षुषे।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे॥"

नायं शिवस्तुतिपर इति केचित्, ईश्वरास्तित्वमङ्गीकृत-मपीश्वरो जगत्कारणमिति कुमारिलेन नोक्तमिति केचिच्च वदन्ति। तन्त्रवार्तिकादिमहाग्रन्थकर्तुरस्य चरितं जगद्विदितम्। नात्र तद्विवरणस्यावकाशः। अस्य तु तातनाम प्रसिद्धं; शास्त्रप्रपञ्चे तु तातबिरुदकथा त्रिधा दृश्यते; मीमांसाग्रन्थेषु तन्नाम्ना द्वित्राः श्लोकाः सदुक्तिकर्णामृतादिषु दृश्यन्ते। तत्रायं श्लोकः कुमारिलनिर्मितो वा न वेति निर्णयन्तु पाठकाः –

"द्वारस्तम्भनिषण्णया दयितया वक्रीकृतग्रीवया
नासाग्रागत वारिबिन्दुविसरैः संसिच्यमानाङ्गया ।
मन्युस्तम्भितकण्ठगद्गदगिरा प्रोच्चारितार्धाक्षरं
सन्दिष्टं तव कान्तया पथिक ! तद् वक्तुं न यत्
पार्यते ॥"

अत्रायं विशेषविषयः। नालन्दायां बौद्धविद्यापीठे वृद्धिं जिगमिषति सति धर्मकीर्तिस्तत्रैवासीत्। तत्काले विजयार्थं तत्र गतेन कुमारिलभट्टेन स महाविद्वान् दृष्ट इत्यत्र न शङ्का कर्तव्या। बौद्धान् तदुक्तिभिरेव निरुत्तरान् कुर्वाणस्य कुमारिलस्य युक्ति-प्रमाणवादविधानमेव जगद्गुरुशङ्करस्यावलम्बनमभवदिति सम्भावन-मपि सुसङ्गतं भवतीति मन्तव्यम्।

—०—

(३७) ललितादित्यः (मुक्तापीडः)[1]

काश्मीरपालकोऽयं महाराजो महाशूरः, संस्कृतभाषापोषकः, कविश्च वक्ष्यमाणकाश्मीरराजकविजीवितेष्वप्युपयुक्तो भविष्यतीत्यस्य वृत्तान्तः कथ्यतेऽत्र सङ्ग्रहेण ।

द्वितीयतुञ्जीनसंज्ञया विख्यातस्य रणादित्यस्य द्वितीयः पुत्रो बालादित्यापरनामा प्रतापादित्यः । तस्य बिम्बादेव्यामनङ्गलेखा नाम तनया सञ्जाता । तस्यां सम्प्राप्तयौवनायां सत्यामेकदा कश्चन दैवज्ञो राजसभामागत्य, प्रसङ्गवशाद् भवज्जामाता काश्मीरपालको भविष्यतीत्यवोचत् - राज्यमन्यगोत्रायत्तं माभूदिति, अक्षत्रियो राज्यानर्ह इति च मत्वा, कर्कोट–नागवंशजाताय दुर्लभवर्धनाय तां कुमारीमयच्छत् । पितृकृत्यमनुचितमिति दुःखिता सा बाला भर्तारं न चकमे । अनन्तरं प्रतापादित्ये दिवं गते दुर्लभवर्धनः काश्मीरप्रभुरभूत् । पश्चात्तस्यानङ्गलेखायामुत्पन्नो दुर्लभो मातामहवंशवर्धनो भूत्वा, तन्नाम्ना प्रतापादित्य इति व्यवहृतः । क्रमेण पितुरनन्तरं काश्मीरराज्यमलभत ।

अनेन मातामहप्रतापादित्येन गोनन्दवंशः समाप्त इति दौहित्रप्रतापादित्येन कर्कोटकनागवंशः आरब्धः इति च विदितम् ।

दैववशादयं काश्मीरनगरवर्तिनो नोणनामकस्य वणिजो

---

1. तस्य राज्यपालनकालः क्रि॰ श. 699–735. मुक्तापीडम् (ललितादित्यम्) अधिकृत्य, आन्ध्रभाषानिबध्दा, ई॰ वे. वीरराघवाचार्यस्य रचना. द्रष्टव्या. Commemoration vol. in honour of Sri. J. Seshadri Sarma)

भार्यां नरेन्द्रप्रभां पत्नीत्वेन जग्राह। अस्य तस्यामुदितेषु त्रिषु पुत्रेषु तृतीयोऽयं कविर्मुक्तापीडललितादित्यः ।1

शत्रुजेता महाशूरोऽयं, शा. ६१७-६५४ मध्यकाले काश्मीरमपालयत्। शा. ६५१ वत्सरेऽयं कन्याकुब्जराजं यशोवर्माणं विजित्य, तेन सम्मानितः उदन्तोऽयं राजतरङ्गिणीतः संगृहीतः।

राजकवेरस्य कृतिरेकापि न लब्धा। सुभाषितावल्यादिष्वेतदीयाः केचन श्लोकाः सन्ति। एतत्पठनमेव प्रयोजनमस्माकम् –

"वसन्त्यरण्येषु, चरन्ति दूर्वां, पिबन्ति तोयान्यपरिग्रहाणि।
तथापि वध्या हरिणा नराणां, को लोकमाराधयितुं समर्थः ॥2

"त्यक्तं जन्मवनं तृणाङ्कुरवती मातेव मुक्ता स्थली
विश्रम्भस्थितिहेतवो न गणिता बन्धूपमाः पादपाः।
बालापत्यवियोगदुःखविधुरा नापेक्षिता सा मृगी
मृग्यन्तः पदवीं तथाप्यकरुणा व्याधा न मुञ्चन्त्यमी ॥3

— o —

1. राजतरङ्गिणी.
2. सुभाषितावली. Intro. p. 91. शार्ङ्गधरपद्धतिः (945 v.)
3. M.K.H. C. S. L. p. 399; सुभाषितावली–654. v.

(३८) यशोवर्मा

इदानीमेव कन्याकुब्जेश्वर इति विज्ञातोऽयं महाराजः कविपण्डितपोषकः कविः शा. ६१२-६५५ मध्यकाले स्थितः। भवभूत्यादिनामाश्रयः सोऽयं मुक्तापीडललितादित्येन विजित इति राजतरङ्गिणी कथयत्येवम्।

"कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम्॥"1

सोऽयं राजकविः रामाभ्युदयादिकाव्यकर्तेति क्षेमेन्द्रधनिकादिलाक्षणिकवचनैस्तदुदाहृतश्लोकैश्च ज्ञायते। तत्कृतयस्तु नाममात्रावशेषा एव। अहो कालो गरीयान्। ईदृशानां महाकवीनां कियन्ति काव्यानि कालगर्भेऽन्तरितानीति न वयं जानीमः! उपलब्धाः श्लोकाः यथा-क्षेमेन्द्रस्य सुवृत्ततिलके 'यथा यशोवर्मणः'–

"यत्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं,
मेघैरन्तरितः प्रिये! तव मुखच्छायानुकारी शशी।
येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गताः
त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते॥"2

वर्षाकाले सीताविरहदुःखितस्य रामस्येदं वचनमेतन्निर्मितं

---

1. राजतरं. 4-144. यशोवर्म-महाराजस्य समयः क्रि. श. अष्टमशतकस्यपूर्वार्धः (700–744. A. D.)

2. सु. वृ. ति. II. 71 v. (p. 14)–Haridas Skt Series-24. (1933) सुभाषितावली. 1366 v.

रामाभ्युदयं स्मारयतीव अभिनवगुप्ताचार्यो ध्वन्यालोकलोचने "यदुक्तं कथामार्गे न चातिक्रमः। इति रामाभ्युदये यशोवर्मणा"।

शारदातनयो भावप्रकाशे –

"षडङ्गं दृश्यते लोके रामाभ्युदयनाटकम्।"

आनन्दवर्धनेनोदाहृतोऽयं श्लोकः–

"रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैः
त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताःसखे मामपि।
कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः
सर्वं तुल्यमशोक ! केवलमहं धात्रा सशोकः कृतः॥"1

अयं रामाभ्युदयश्लोक इति सुभाषितावली प्रवदति। कुवलयानन्दे चायमुदाहृतः।2 पुनः सुवृत्ततिलके 'साक्षेपो यथा यशोवर्मणः' –

'स यस्य दशकन्धरं कृतवतोऽपि कक्षान्तरे,
गतः स्फुटमवध्यतामधिपयोधि सान्ध्यो विधिः।
तदात्मज इहाङ्गदः प्रहित एष सौमित्रिणा
क्व स? क्व स? दशाननो ननु निवेद्यतां राक्षसाः॥'3

यशोवर्मणः कवित्वं रसोदञ्चितमित्येभिर्विदितम्।

— o —

1. ध्वन्यालोकः. II. 42. 3.
2. कुवलय. 57. 2.
3. सु. वृ. ति. III. 88. v.

(३८) भवभूतिः

"प्राचेतसेन याऽऽनीता पालिता भवभूतिना ।
सर्वतश्चर्व्यते वाणी सैवाद्य कविमानिभिः ।।"

संस्कृतसारस्वते विश्वविख्याता दृश्यकाव्यकर्तारः पञ्चषा गण्यन्ते ; तेषु च भासकालिदासाभ्यां समं स्थातुं समर्हतीति प्रशस्यतेऽयं भवभूतिः । एषां त्रयाणां रूपकाणि बहूनि सन्तु नाम ; तेषां च प्रशस्तिरस्तु नाम । स्वप्नवासवदत्तम्, शाकुन्तलम्, उत्तर-रामचरितमित्येतत्त्रितयमेव नाट्यरसपीपासूनां वाचि प्रथमतो वरीवर्तीति विदितमेव ।

वंशनिवासादिकम्

अस्य चरितं लोकोत्तरं परमपावनम् । यत् किञ्चिदनेन च कथितं मालतीमाधवमहावीरचरितप्रस्तावनयोः । दक्षिणापथे पद्मपुरं नाम नगरमस्य जन्मभूमिः - पद्मावतीति विदर्भेष्विति पाठौ केषुचिल्लिखितपुस्तकेषु दृष्टाविति विमर्शकोक्तिः - पद्मपुरं बहुभिर्बहुधा निर्धारितम् । तथापि विदर्भेष्विति पाठं कविवर्णितं तैत्तिरीयशाखाध्ययनादिकं च पश्यतामिदं पुरं विदर्भदेशीयमित्येव विश्वासो जनिष्यति । अस्मिन् विषये डाँ भाण्डारकरमहाशयस्य निर्णयः समञ्जसः प्रतिभाति । अपि च भवभूतिर्विदर्भज इति प्रतीतिरनादिरस्मद्देशे[1] तैत्तिरीयशाखाध्यायिनः, आपस्तम्बसूत्राः ब्राह्मणाः अद्यापि नागपुरप्रान्ते तन्नगरस्याग्नेयदिग्भागसम्बन्धिनि तेलङ्गानां जनपदे च वसन्ति । तस्मादद्य 'चान्दा' इति व्यवहृतस्य

1. H. C. S. L. p. 615.

चन्द्रपुरस्य दक्षिणतो गोदावरीनिकटेऽस्य जन्मस्थलं पद्मपुरमासीदिति भावनमुचितमेव । तत्पुरं नष्टं वा, नामान्तरेणास्ति वा ज्ञातुमशक्यम् । तात्कालिकविदर्भसीमानश्च न निरूपणीयाः सम्प्रति । तथाप्यद्य दृश्यमानस्तेलङ्गाणभूभागो विदर्भराष्ट्रस्याग्नेयप्रदेश इत्युक्तिरुचितैव स्यात् पद्मपुरे तैत्तिरीयाः, काश्यपगोत्राः, सोमपीथिनः, पङ्क्तिपावनाः उदुम्बरेत्युपनामानो ब्रह्मवादिनः प्रतिवसन्ति । तदामुष्यायणस्य तत्र भवतः वाजपेययाजिनः महाकवेरयं पञ्चमः पुरुषः । विद्वद्वरस्य भट्टगोपालस्य पौत्रः । पवित्रकीर्तेर्नीलकण्ठस्य जतुकर्णीदेव्यां च पुत्रः । पूज्यपादस्य ज्ञाननिधेः शिष्यः, श्रीकण्ठपदलाञ्छनः, पदवाक्यप्रमाणज्ञो, भवभूतिर्नाम कविरिति प्रस्तावनाभिरेव विदितम् । तेनायामुदुम्बरो भवभूतिर्विदर्भदेशसम्बन्धिन्यां तेलङ्गाणसीमायां पद्मपुरे सम्भूत इति, अस्य पितृकृतं नाम श्रीकण्ठ इति, बिरुदनाम भवभूतिरिति च ज्ञायते अत्रामू जनश्रुती कञ्चन राजानमुपेत्य, "साम्बा पुनातु भवभूतिपवित्रमूर्तिः" इत्याशीर्वदतेऽस्मै भवभूतिबिरुदं दत्तवानित्येका1 । एकदा–

"तपस्वी कां गतोऽवस्थामिति स्मेराननाविव ।
गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ ॥"2

इतीश्वरं स्तुवन्तमेनं भवभूतिरिति ख्यापयामासुस्तत्रत्याः सुधिय इत्यपरा । इत्थमेव भोसलराजास्थानकविना घनश्यामेन, व्याख्यात्रा वीरराघवाचार्येण चैतन्नाम समर्थितम् । किं चास्मै कवये भवः (ईश्वरः) भिक्षुरूपेणागत्य भूतिं दत्तवानिति3 केचन वदन्ति । एवं च भवाद् भूतिर्यस्येति भवभूतिरिति तदर्थः, इति

---

1. महावीरचरिते वीरराघवटीका ॥.
2. आर्यासप्तशती 1. 39. (अनन्तपण्डितटीका)
3. घनश्यामटीका on उत्तररामचरितम्.

आहुरिति च वीरराघवाचार्योऽलिखत्। अस्य उम्बेक इति शैशवे बान्धवाभिहितं प्रेमपूर्वकं कृतकं नामाप्यस्ति। तदुत्तरत्र विशदीक्रियते।

अस्य कालः

अयं यशोवर्मास्थानकविरिति, कुमारिलभट्टशिष्य इति च विदितमेवैतत्पूर्वम्[1]। तेन भवभूतिः शा. ५८०–६६० मध्यकाले स्थित इति निःशङ्कं विश्वसन्तु।

अथास्य कुमारिलभट्टशिष्यत्वम् —

नेदं किंवदन्तीमूलम्, परन्तु ग्रान्थिकप्रमाणबद्धम्।

यथा —

"यद्वेदाध्ययनं तथोपनिषदां सांख्यस्य योगस्य च।
ज्ञानं तत् कथनेन किं न हि ततः कश्चिद्गुणो नाटके॥[2]
"यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः।"

पदवाक्यप्रमाणज्ञः[3] इति नाटकप्रस्तावनेषु स्वेनैव लिखितम्।[4] न कुमारिलो कुत्रापि गुरुरित्युक्तम्। तथापि सकलवेदशास्त्र–गुरुरस्य ज्ञाननिधिरेक एवेति कथं वक्तुं शक्यम्? वेदाध्ययन-सम्पन्ने गृहे सम्भूतोऽयं पितृसन्निधौ वा, पितामहान्तिके वा वेदं नाधीतवानिति कथं वदिष्यामः? ज्ञाननिधिरस्य शब्दन्यायादि-शास्त्रेषु गुरुर्भवतु। स भगवान् मीमांसकश्च भवतु। तथापि, तत्काले मीमांसाम्बुधिगम्भीरताभिज्ञः कुमारिल एक एवेति शृण्वता जानतानेन तत् सन्निधौ प्रमाणशास्त्रं पठितमिति वक्तव्ये का

1. यशोवर्मणः कालः अष्टमशतकस्य पूर्वार्धः (700-750) A. D.
2. मालतीमाधवम् I. 10.
3. तत्रैव. I. 9.
4. ,, I. 7.

विप्रतिपत्तिः ? न कापि । सत्यं पठितम् । तेनैवायं प्रमाणज्ञोऽभवत् । अस्य कुमारिलशिष्यत्वं भरतखण्डमासमन्ताद् व्याप्तम् । ग्रन्थलेखकैश्च सम्यक् निगदितम् केषुचिन्मालतीमाधवलिखितपुस्तकेषु अङ्कान्तगद्यान्येवं स्थितानीति शङ्करपाण्डुरङ्गादिमहाशयैः प्रकटितम् ।

"इति श्रीभट्टकुमारिलशिष्यकृते मालतीमाधवे तृतीयोऽङ्क"[1]

"इति श्रीकुमारिलस्वामिप्रसादप्राप्तवाग्वैभव – श्रीमदुम्बेकाचार्यविरचिते मालतीमाधवे षष्ठोऽङ्कः[2]

अथ येनैतत्सर्वमुपपन्नं स्यात्तदुम्बेकसंज्ञाविवरणमद्य क्रियते-खण्डनखाद्यशास्त्रदीपिका-तन्त्रवार्तिक–श्लोकवार्तिक - तत्त्वप्रदीपिकाव्याख्यातार आनन्दपूणरामकृष्णनारायणपरमेश्वरचित्सुखाचार्याः, षड्दर्शनसमुच्चयकर्ता हरिभद्रसूरिश्च स्वेषु ग्रन्थेषूम्बेकनामास्मरन् । उम्बेको गुरुनिर्मितश्लोकवार्तिकैकभागस्य व्याख्यां निर्मितवानिति । तदनन्तरभागस्य कुमारिलभट्टतनयो जयमिश्रः प्रणीतवान् व्याख्यामिति चावगम्यते । नयनप्रसादिनीव्याख्यायां चित्सुखाचार्यः उम्बेकवाक्यमुल्लिख्य, उम्बेको भवभूतिरिति विस्पष्टमुक्तवान् ।[3] गुणरत्नाख्यो जैनपण्डित उम्बेको भवभूतिरिति बुद्ध्यैव "उम्बेकः कारिकां वेत्ति" इति प्रशंसितवान् । अपि च मालतीमाधव–प्रस्तावनायां दृश्यमानः सकलपाठकैः पाठ्यमानः –

"ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः ।

---

1. मालतीमाधवम् mss. Act III Colophon.
2. ,, ,, VI ,,
3. प्रत्यक्षरूपभगवत्कृता चित्सुखीटीका.

उत्पस्यते मम तु कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥"1

इतिश्लोक उम्बेकविरचितायां पूर्वोक्तश्लोकवार्तिका-व्याख्यावतारिकायां प्रत्यक्षीभवति । अयमंश एक एवालं पुष्णात्युम्बेको भवभूतिरिति सिद्धान्तम् । व्याख्याता स उम्बेकोऽन्य इति, यदीयश्लोकं भवभूतिरपहृतवानिति च न कोऽपि वक्तुं शक्यः इति मन्ये । अथ विद्यारण्यकृतशङ्करविजयसप्तमसर्गेऽप्युम्बेकसंज्ञा दृश्यते इति संशयोऽत्र निवार्यः ।

"सुधीश्वरो मण्डनमिश्रनामा......
उम्बेक इत्यभिहितस्य हितस्य लोकै-
रुम्बेति बान्धवजनैरभिधीयमानम् ।"2

अनेनैव ज्ञायते शैशवे बन्धुभिः कृतं कृतकनामेति । तन् मण्डनमिश्रस्याप्यस्तु नाम । न तावता विरोधोऽस्मन्निर्णयस्य । देशे सर्वत्रबालानां बन्धुकृतप्रीतिपूर्वककृतकनामानि विविधानि सन्तीति विदितमेव ।

तस्माद् भवभूतिः कुमारिलशिष्यः इति श्लोकवार्तिक-व्याख्याता यस्तूम्बेकः स एवायमिति च निःसंशयं विश्वसनीयम् ।

काव्यप्रशंसा

प्रतिभाशाली, नाट्यकलाभिमानी, कविरयं मालतीमाधवम्, महावीरचरितमुत्तररामचरितमिति रूपकत्रयं निर्ममे । अत्राद्यमुत्पाद्यवृत्तं, द्वितीयं प्रख्यातवृत्तम्, तृतीयं मिश्रवृत्तम् । आद्ये शृङ्गारः प्रधानः, द्वितीये वीरः, तृतीये करुणः । एवं त्रिविधं

---

1. मालतीमा. I. 8. v.
2. Sankaradigvijaya.

रूपकं प्रणीय, नाट्यसाम्राज्याभिषिक्तोऽयं नटराजराजस्य तृतीयोऽवतार इति राजशेखरेणैवं विनुत: –

"बभूव वल्मीकभवः कविः पुरा,
ततः प्रपेदे भुवि भर्तृमेण्ठताम् ।"
स्थितः पुनर्यो भवभूतिरेखया
स वर्तते सम्प्रति राजशेखरः ॥1"

एतेषु प्रथमं मालतीमाधवमित्यनेन सविनयं सात्मविश्वासमाचरितस्तत्प्रस्तावनाप्रसङ्गः एव कथयति ।

यथा —

"ये नाम केचिदिह नः प्रथयन्त्यवज्ञाम्"2 इत्यादिकं,
"यद् वेदाध्ययनं तथोपनिषदां सांख्यस्य योगस्य च
ज्ञानं तत्कथनेन किं न हि ततः कश्चिद् गुणो नाटके ।3
यत्प्रौढित्वमुदारता च वचसां यच्चार्थतो गौरवं
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः ॥"4

प्रकरणमिदमादितः सामाजिकमनोहरं सहृदयरञ्जकं यथा प्रसरतीत्यत्र व्याख्याबाहुल्यं निदर्शनम् । अस्मिन् वीरकरुणाद्भुताद्यङ्गरसाः, पात्रोचितं वस्तुषोषकं यथा वर्णिता बहुविधदेशाचारमताचारा नागरिकता च प्रदर्शिताः । कवित्वं मृदुमधुरं

---

1. बालरामायणम्. 1· 16,
2. अयं श्लोकः 212 पृष्ठे, समग्रमुदाहृत एव· मा· मा. I.8.v.
3. मा॰ मा. I. 10. v. इतःपूर्वमेव अयं श्लोकार्थः 211 पृष्ठे उदाहृत.·
4; मा. मा· 1. 7. v.

हृदयङ्गमम् । मालती सौन्दर्यरसगर्भितं करुणरसं वर्षतीवेदं माधववचनमत्रोदाहरणम् ।

"असारं संसारं परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं मरणशरणं बान्धवजनम् ।
अदर्पं कन्दर्पं जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ।।"1

भासकवित्वे कालिदास इव, तयोः कवितायामयं च गौरवभावं यत् किञ्चिदनुसरणेन प्रादर्शयत् । यथा–आत्महत्यापरिहारायाविमारको यथा मरुत्प्रपातायोद्युक्तस्तथा माधवोऽपि महामांसविक्रयायोद्युक्तः । तदेतादृशं भावसादृश्यं सर्वकविकाव्यसाधारणत्वेन न गणनीयम् । तथापि यक्षेणेव माधवेनापि दूत्यार्थं मेघः प्रार्थित इति तु गणनीयमनुकरणमेव । यथा —

दैवात् पश्येर्जगति विचरन्, मत्प्रियां मालतीं चेत्
आश्वास्यादौ तदनुकथयेर्माधवीयामवस्थाम् ।
आशातन्तुर्न च कथयताऽन्त्यन्तमुच्छेदनीयः
प्राणत्राणं कथमपि करोत्यायताक्ष्याः स एकः ।।"2

आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ।"3

महावीरचरिते केचन विष्कम्भास्तृतीयाङ्कश्च रूपकोचितत्वेन कल्पिता अपि, प्रधानकथा रामायणीयैव । तथा चेदं

---

1. मा·मा. 5. 30.
2. मालती. IX· 26· v. श्लोक एषः कालिदास–निर्मित मेघदूतस्थस्य प्रतिध्वनिरेव.
3. मे· दू. I. 10· v

रूपकमपूर्वमित्युक्तं प्रस्तावनायाम् । श्रुतिस्मृतिविज्ञानं देशज्ञानं च विशेषतोऽस्मिन् दर्शितम् । प्राग् धर्मस्य भवन्त एव परमं द्रष्टार आसन् इत्यादिना वसिष्ठधर्मसंहिताया आद्यत्वं सूचितम् । अथर्व-महत्त्वं पात्रमुखेन वर्णितं च । मिश्रवृत्ताभ्यां परमेककालसमुत्पन्ने द्वे रामनाटके । तयोर्यशोवर्मणो रामाभ्युदयं सर्वात्मना नष्टम् । महावीरचरितं तु पादतो नष्टम् ।

महावीरचरिते पञ्चमाङ्के "हन्त प्रत्युत दारुणं व्यवस्थितं धिक् सख्यमेवंविधम्" इत्यन्तमेव भवभूतिरचनं दृश्यते । तदनन्तरं लुप्तग्रन्थः सुब्रह्मण्यकविना अर्वाचीनेन पूरितः । तत् सहितमेवेदं नाटकं मुद्रितमभवत् सर्वत्र । घनश्यामेनापि तल्लुप्तग्रन्थः पूरितः। किन्तु न तस्य व्याप्तिः । बहुभिर्लाक्षणिकैः पठितेऽस्मिन् सार्थस्य तदङ्कद्वयस्य नाशने व्याप्तभावो वा, अन्यद्वा कारणं भवेत् । तथापि तञ्जावरभाण्डागारस्थ एकस्मिन् लिखितपुस्तके इदं वाक्यं दृश्यते –

"श्रीवश्यवाचा भवभूतिमहाकविना विरचित—
महावीरचरितमेतावदेवास्मिन् देशे दृश्यते ।
शेषं तु राजशेखरेण दग्धमिति प्रतीतिः ॥[1]

वचनं नेदं विश्वसनीयम् । कथमुत्पन्नोऽयमपवादो न जानीमः । भवभूतिरीश्वरावतार इति स्तुवता राजशेखरेणैतादृशं घोरकर्माऽचरितमिति को नु विश्वसेत् ? स्वीयबालरामायण-नाटकप्रसिद्ध्यै राजशेखरेणेत्थं कृतमिति केनाऽपि कल्पितं भवेत् ।

अथ लोकोत्तरमुत्तररामचरितम्

"यं ब्रह्माणमियं देवी वाग्वश्यैवान्ववर्तत ।
यं ब्रह्माणमियं देवी वाग्वश्येवान्ववर्तत ॥"[2]

---

1. तञ्जाऊरलिखितपुस्तकविवरणपट्टिका VIII–Ms. No. 4435 (3455 पृ.) ; Ms. No. 4438 (p. 3457)
2. उत्तररामचरितम्. I. 2.

इति च पाठोऽस्ति । इत्युक्तवतानेनात्मनो वश्यवाणित्वं येन प्राप्तं, तदादिकाव्यं तत् कर्तृमहत्त्वं चैवं वर्णितं पात्रमुखेन –

"चित्रमाम्नायादन्यत्र नूतनच्छन्दसामवतारः ।"1

"अथ भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणम् प्रणिनाय ।"2

तत्त्वमिदं विदित्वैव 'प्राचेतसेन याऽऽनीता' इत्यादिना नीलकण्ठदीक्षित एनमकीर्तयत् । अपरश्च विद्वानेवमवर्णयत्–

"भवभूतिकवेर्वाचः स्वदन्ते रसरञ्जिताः ।
सुमनोभ्यः सुधास्यन्दिबन्धमाधुर्यबन्धुराः ।।"

अर्वाचीनैरभिनन्दित इति का कथा ? सहवासिना यशोवर्मास्थानकविना वाक्पतिराजेनैवमभिवर्णितः ।

"भवभूतिजलधिनिर्गतकाव्यामृतरसकणा इव स्फुरन्ति ।
यस्य विशेषा अद्यापि विकटेषु कथानिवेशेषु ।।"3

अत्रेतिवृत्तं मिश्रमपि अद्भुतमननुमेयमचिन्त्यसंविधानमिति चित्रप्रदर्शनरङ्गः पञ्चवटीरङ्गोऽन्तर्नाटकं च ब्रुवन्ति । अत्र विप्रलम्भशृङ्गारः प्रधान इति केचिद् वदन्तु नाम । बहुविद्वदभिप्रायज्ञो व्याख्याता वीरराघवार्यः "सूचितं च ... नान्दीस्थम् अमृतामिति पदेन करुण एवास्मिन्नाटके प्रधानम्" इत्यलिखत् । कविः स्वयमस्मिन् करुणः प्रधानमिति पात्रमुखेनाचख्यौ यथा–

1. उ॰ रा॰ च॰ 2. 5;
2. उ॰ रा॰ च॰ 2. 5 5
3. वाक्पतिकवि-विरचित-'गउडवहो' नामक-प्राकृतकाव्यान्तर्गतस्य पद्यस्य संस्कृतच्छाया–799.

"देवि, समाश्वसिहि, समाश्वसिहि, इति रामकृत-
परिसान्त्वनवचनेन प्रथमाङ्कः आरब्धः ।"1

"दुःखसंवेदनायैव रामे चैतन्यमागतम्2
पुटपाकप्रतिकाशो रामस्य करुणो रसः ॥3

भवति ननु लाभो हि रुदितम्4
इदमशरणैरद्यास्माभिः प्रसीदत रुद्यते ।"5

इत्यादिनायकवचनैः सर्वत्र करुणं ज्ञापयन्, तमसामुखेन सुनिश्चिताभिप्रायं व्यजिज्ञपदेवम् –

"एको रसः करुण एव निमित्तभेदाद् ।
भिन्नः पृथक् पृथगिव श्रयते विवर्तान् ।।"6

तदिदमन्तर्नाटकसूत्रधारेण स्थिरीकृतमेवम् । "यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य, पावनं वचनामृतं करुणादुद्भूतरसं च किञ्चिदुपनिबद्धमिति"7 (प्राचेतसवाक्यम्)

एतेन करुण एव प्रधानो वीरश्रृङ्गारौ अङ्गाविति विद्वद्वचनमादरणीयमिति स्पष्टम् । जनापवादकलुषितहृदयस्य रामस्याज्ञया लक्ष्मणेन सीता वाल्मीक्याश्रमान्तिके परित्यक्तेति प्रधानांशमेकमे–

1. उ. रा. च. 7. 1.
2. उ. रा. च. 1. 47.
3. तत्रैव. II. 1. v.
4. ,, 3. 30.
5. ,, 3. 32.
6. ,, III. 47.
7. उ. रा. च. VII. 11.

वोत्तरकाण्डाद् गृहीत्वा, तदन्यं वस्तु दृश्यकाव्योचितमयं प्रतिभामूर्तिः कल्पितवानिति तत् काण्डानभिहितदक्षिणारण्यमार्गवर्णनं, गोदावरीतीरगिरिकाननादिवर्णनं च कथयति । गोदावरी भवभूतेः प्राणप्रिया । तादृशस्वस्थानाभिमानः सहजः खलु ! बहुकृत्वोऽयं तन्नदीतीरेषु, प्रस्रवणादिगिरिषु पञ्चवटी जनस्थानादिषु च सञ्चचारेति तत्तद्विशेषवर्णनैर्बुध्यते । प्रस्रवणादिनिवासं साभिज्ञानं सीतायै ज्ञापयतः श्रीरामस्योक्तिरियमत्रोदाहरणम्—

"स्मरसि सुतनु ! तस्मिन् पर्वते लक्ष्मणेन
प्रतिविहितसपर्यासुस्थयोस्तान्यहानि ।
स्मरसि सरसनीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि ।।"1

"किमपि किमपि मन्दं मन्दमासक्तियोगात्"2 इत्यादिकं च । तृतीयाङ्के जानकीप्रवेशाय जनस्थानरङ्गः केवलं कल्पितः । कुशलवयोस्तत्त्यागात्परं लोकान्तरं गता सीता, पुनः कुत आयास्यति निजरूपेण ? अङ्कोऽयमस्य रूपकस्यायुःस्थानमिव प्रवर्तितः प्रकृतिसौन्दर्यवर्णनैः करुणरसस्यन्दिभाववर्णनैश्च । बाह्यशोभावर्णने सर्वेऽपि क्षमाः । हृदयावस्थाविष्करणे तु भवभूतिरेक एव । जानक्याः हृदयावस्था तमसैवं वर्णिता –

"तटस्थं नैराश्यादपि च कलुषं विप्रियवशाद्
वियोगे दीर्घेऽस्मिन् झटिति घटनास्तम्भितमिव ।
प्रसन्नं सौजन्याद्दयितकरुणैर्गाढकरुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव ।।"3

---

1. उ. रा. च. 1. 26.
2. ,, 1. 27.
3. ,, 3. 13.

एकस्मिन् क्षणे समङ्कुरितपरस्परविरुद्धबहुविकारं हृदयं प्रत्यक्षीकृतमेनं प्रतिभायोगिनमन्तरेण कोऽन्यः शक्तः स्यात् ? अहो! भवभूतेर्ज्ञानदृष्टिः ! एवमेवाकृष्य चित्रप्रदर्शनसमये रामस्य कानन-वासकालिकवियोगदुःखावस्था चाविष्कृता लक्ष्मणेन–

"जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥"1

अत एवास्य करुणरसमर्मज्ञतां जानता गोवर्धनाचार्येणैव-मुक्तम् –

"भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥"2

नायिकानायकयोरुभयोरपि पुनः समागमप्रत्याशा स्वप्नेऽपि नास्तीति सर्वत्र तद्वचनैरेवावगतम् । इतरपात्रवचांस्यपि करुण-स्यन्दीन्येव । अत्रेदं सुमन्त्रवचनम् –

"मनोरथस्य यद् बीजं तद्दैवेनादितो हृतम् ।
लतायां पूर्वलूनायां प्रसूनस्योद्भवः कुतः ॥"3

श्रीराममश्रुकारणं पृच्छन्तं लवं प्रति कुशस्योक्तिष्वपि तदर्थ एव प्रस्फुरत्येवम् –

"विना सीतादेव्या किमिव न च दुःखं रघुपतेः
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति ।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमेवं त्वं पृच्छस्यनधिगतरामायण इव ॥"4

1. उ. रा. च. I. 28, (उत्तरार्धः)
2. आचार्य–गोवर्धन–निर्मिता 'आर्यासप्तशती,' I. 36. V.
3. उ. रा. च. V. 20.
4. तत्रैव. VI. 30,

प्रकृतिशोभासमाकृष्टस्यास्य महाकवेर्नदीषु गोदावरी यथा, तथा गिरिषु प्रस्रवणाद्रिः, वनभागेषु पञ्चवटी, मृगेषु करी हरिणश्च, पक्षिषु हंसो मयूरश्च, वृक्षेषु कदम्बः, वृत्तेषु शिखरिणी चात्यन्तं प्रीतिपात्राणीति पाठकानां विदितमेव ।

भवभूतेः शिखरिणीप्रियत्वमेवं वर्णितं क्षेमेन्द्रेण —

"भवभूतेः शिखरिणी निरर्गलतरङ्गिणी ।
चकिता घनसन्दर्भे या मयूरीव नृत्यति ॥"1
'अद्वैतं सुखदुःखयोः' इत्यादिना दाम्पत्यम्,
'प्रियप्राया वृत्तिः' इत्यादिना सौजन्यम्,

"अन्तःकरणतत्त्वस्य"4 इत्यादिना अपत्यं तारामैत्रीत्यादीनि वर्णयतोऽस्य लौकिकविज्ञानं पाठकैरनुभूतम् । किं बहुना ? उत्तररामचरितगुणवर्णनं नक्षत्रगणनसन्निभं किल ! महाकवेरस्य काव्यान्येतानि त्रीण्येव लोके व्याप्तानि । तथापि, भवभूतिनिर्मिता इव केचन श्लोकाः दृश्यन्ते सङ्कलनग्रन्थेषु । तेषु

"शौर्यं शत्रुकुलक्षयावधि यशो ब्रह्माण्डभाण्डावधि
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः ।
वीर्यं यत् तु गिरां न तत्पथि ननु व्यक्तं हि तत् कर्मभिः
सत्यं ब्रह्मतपोनिधेर्भगवतः किं किं न लोकोत्तरम् ॥5

---

1. सुवृत्ततिलकम्-III. 33. कारिका·
2. उ. रा. च. I. 39. v.
3. तत्रैव II. 2. v.
4. ,, III. 17.
5. 'भवभूतेः' इति सदुक्तिकर्णामृतम् I· 45· 3v. p. 58. Calcutta ed. 1912.

उषसि गुरुसमक्षं लज्जमाना मृगाक्षी
रतिरुतमनुकर्तुं राजकीरे प्रवृत्ते ।
तिरयति शिशुलीलानर्तनच्छद्मताल-
प्रचलवलयमालास्फालकोलाहलेन ।।"1

"भुवां धर्मारम्भे पवनचलितं तापहतये
पटच्छत्राकारं वहति गगनं धूलिपटलम् ।
अमी मन्दाराणां दवदहनसन्देहितधियो
न ढोकन्ते पातुं झटिति मकरन्दं मधुलिहः ।।2

वैकुण्ठस्य करङ्कमङ्कनिहितं स्रष्टुः कपालं करे
प्रत्यङ्गं च विभूषणं विरचितं नाकौकसां कीकसैः ।
भस्म स्थावरजङ्गमस्य जगतः शुभ्रं तनौ बिभ्रतः
कल्पान्तेषु कपालिनो विजयते रौद्रं कपालव्रतम् ।। 3

ब्रह्मवादिनि श्रोत्रियकुले समुद्भूतोऽयं मतेन शुद्धाद्वैती इति स्पष्टम् । तथाप्ययं शिवभक्त इति मालतीमाधवमङ्गलाचरण-श्लोकाः कथयन्ति । रामनाटकनान्दीश्लोकौ अद्वैतभावबोधकावेव । किं च ब्रह्मात्मैकत्वविज्ञानं परमार्थं इत्यस्य विश्वासं विद्याधरोक्ति-रेवं स्पष्टीकरोति –

"ब्रह्मणीव विवर्तानां क्वापि विप्रलयः कृतः ।"

महावीरचरिते जनकवसिष्ठविश्वामित्रादिमहर्षिमुखतश्चा–विष्कृतोऽयमर्थं इत्यलम् ।

— o —

1. "भवभूतेः" इति सदुक्तिकर्णामृतम् II. 141. 4v.
2. 'भवभूतेः'–इति सदुक्तिकर्णामृते-II. 157.
3. „ „ I. 18. (3v.)

(४०) वाक्पतिराजः

भवभूतिवदयं यशोवर्मास्थानकविः, कन्याकुब्जवासी। संस्कृतप्राकृतनिष्णातेनानेन 'गउडवहो' नामकं काव्यं निर्मितम्। न किमप्येतन्निर्मितं संस्कृतकाव्यमस्ति। अनेन कृताः विष्णुस्तवश्लोकाः केचन सुभाषितावल्यादिषु लक्ष्यन्ते। तेष्विमौ –

"सेयं द्यौस्तदिदं शशाङ्कदिनकृच्चिह्नं नभः सा क्षितिः
तत्पातालतलं त एव गिरयस्तेऽम्भोधरास्ता दिशः।
इत्थं नाभिविनिर्गतेन स शिरःकम्पाद्भुतं वेधसा
यस्यान्तश्च बहिश्च दृष्टमखिलं त्रैलोक्यमव्यात् स वः॥1
खर्वग्रन्थिविमुक्तसन्धिविकसद्वक्षः स्फुरत्कौस्तुभं
निर्यन्नाभिसरोजकुट्मलकुटीगम्भीरसामध्वनि।
पात्रावाप्तिसमुत्सुकेन बलिना सानन्दमालोकितं
पायाद् वः क्रमवर्धमानमहिमाश्चर्यं मुरारेर्वपुः॥"2

1. 'वाक्पतिराजस्य'-इति सदुक्तिकर्णामृतम् I. 63 (1v)–p. 80 (B. 1. ed. 1912.

2. 'वाक्पतिराजस्य' इति सदुक्तिकर्णामृतम्–I. 44 (5v.) p. 58. सुभाषितरत्नकोशः v. (p. 208) दशरूपकम्. IV. p. 106.

— ० —

(४१) विशाखदत्तः

उत्तमनाटककर्तृषु परिगणितोऽयं महाकविर्वीररसप्रधानं, राजनीतिप्रयोगबन्धुरं, चरित्रात्मकमपूर्वं मुद्राराक्षसं नाम नाटकं निर्ममे । अस्य देशकालादिकं विमर्शकाभिप्रायभेदसमाकुलं सदद्यापि न सुनिश्चितमिति तथ्यम् ।

अस्मिन् नाटके वर्णितमितिवृत्तं बृहत्कथान्तर्गतम् । तदेवोक्तं धनिकेन दशरूपकव्याख्याने "तत्र बृहत्कथामूलं मुद्राराक्षसम्"1 एतेन नन्दराजमौर्यकथा गुणाढ्यकालस्यैवेतिहासत्वेन व्याप्तेति स्पष्टम् । विमर्शकमते चन्द्रगुप्तकौटिल्यकालोऽपि सन्दिग्धः । तथापि पुष्यमित्रं महाभाष्ये स्मरतः पतञ्जलेः (शा. पू. ४२८) तौ पूर्वाविति विदितमेव । तेनेयं कथा शा. शकपूर्वं सप्तमशतक-वर्तिनी भवेदित्यूहः । कविरयं क्षत्रियः । सामन्तराजस्य वटेश्वर-दत्तस्य पौत्रः, पृथुमहाराजस्य पुत्रः । एतावदेव प्रस्तावनया विदि-तम् । अस्य देशकालादिकं विविधविमर्शकाभिप्रायपुरःसरं चर्चितं मदीयसंस्कृतवाङ्मयचरिते ।2 तत्तद्विमर्शकाशयाश्च लोके विदिता एव । प्रत्यक्षप्रमाणैरस्य देशकालादिकं निर्णेतुमशक्यम् । तथापि यत् किञ्चिदत्र कथ्यते । मुद्राराक्षसद्वितीयेऽङ्केऽमात्यराक्षसं प्रति विराधगुप्त एवमाह –

"प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।

---

1. दशरूपावलोकः–I p. 34.
2. आन्ध्रभाषानिबध्दं सं. वा. चरितम्-II भाग: 1936.

विघ्नैः पुनः पुनरपि प्रतिहन्यमाना:
प्रारब्धमुत्तमगुणास्त्वमिवोद्वहन्ति ॥"1

श्लोकोऽयं 'न परित्यजन्ति' इति पाठभेदेन भर्तृहरिनीतिशतकेऽद्य दृश्यते। धनिकस्तु दशरूपव्याख्यायां2 यथोक्तश्लोकमेव तत्त्वमविज्ञाय, 'यथा वा भर्तृहरिनीतिशतके' इत्युदाहृतवान्; तत्प्रामादिकम्। अनन्तरं येन केनापि विदुषा नीतिशतके 'त्वमिवोद्वहन्ति' इति पाठः सुसङ्गतो न भवतीतिबुध्या, 'न परित्यजन्तीति' पाठः प्रक्षिप्तः स्यात्। न हि तत्रास्ति कश्चन सन्देहः। इतरकविश्लोकाः केचन नीतिशतके तत्काले प्रविष्टा इति च विदितमेव। एतेन धनिकादयं कविः पूर्वः इति स्पष्टम्। अथ वामनानन्दवर्धनाभ्यां मुद्राराक्षसं न स्मृतमिति कृत्वा, ताभ्यामिदं परमिति न मन्तव्यम्। पौर्वापर्यनिर्णये नायं हेतुः समुचितः। सर्वलाक्षणिकैः सर्वाणि काव्यानि द्रष्टव्यानीति को नियमः? काव्यालाभ एवास्मरणस्य कारणं भवतु। तेन मुद्राराक्षसं तयोरपि पूर्वं भवेदित्यूह्यते। तदास्ताम्।

मुद्राराक्षसरचनाकालस्य, मौर्यकथाकालस्य च सहस्रवत्सराधिकमन्तरमस्ति। मूलकथायामिव शकयवनम्लेच्छादयो भारतेऽपि संदृष्टाः। एवं स्थिते, मलयकेतु-सैनिकेषु ये यवनाः ते ग्रीक्-देशीयाः। भरतखण्डे ग्रीक्भटसमागमनानन्तरमिदं रूपकमुत्पन्नमिति, ग्रन्थस्थितबौद्धप्रसक्ति दृष्ट्वा,बौद्धमते वर्धमाने सतीदं नाटकमुत्पन्नमिति च केचन विमर्शकोत्तमाः कथयन्तु नाम। एतादृशयुक्तिवचनैः कालनिर्णयः कथं कर्तव्यः? तद्वचनविमर्शनेन वा कोऽत्र लाभः? काशीनाथत्र्यम्बकतेलङ्गपण्डितः स्वोपलब्धविविधविमर्शनपर्यालोचनं कृत्वैव "मुद्राराक्षसम्" क्रि. अष्टमशताब्दीप्रथमभागे (७४०)

1. मुद्राराक्षसम्-II. 17 v.
2. दशरूपावलोकः-III. p. 36.

समुदितं भवेदित्यभिप्रायमसूचयत् ।[1] तत्कालः शा· ६६२ भवेत् । वामनाचार्यः शा· ७३० समयवर्ती । तस्मादयं कविः किञ्चित्पूर्वः स्यात् । अथवा, तत्काव्यालङ्कारसूत्रवृत्तेर्मुद्राराक्षसं समकालं वा भवेत् । भरतवाक्यान्ते –

'चिरमवतु महीं पार्थिवश्चन्द्रगुप्तः'[2]

इति पाठो मुद्रितपुस्तकेषु दृश्यते । पार्थिवोऽवन्तिवर्मा, रन्तिवर्मा, दन्तिवर्मा इति लिखितपुस्तकेषु पाठाः सन्तीति परिशोधकाः कथयन्ति । एष्वन्तिमपाठं गृहीत्वा, क्रि· ७७०-८३० मध्यकाले यः पल्लवराज्यमपालयत् स राजाऽयं दन्तिवर्मेति भावनया, नाटकमिदं शा· शकाष्टमशतकारम्भे समुत्पन्नमिति कैश्चित्तर्कितम् ।[3] इदमस्मद्भावितपूर्वोक्तकालस्येषद्वैषम्यमनुगुणं भवत्वेव । तथापि नायं पाठः सर्वविमर्शकसम्मतः । भवतु पूर्वोक्तकालान्नेदं परम् ।

अङ्गुलीयकबलाद् मन्त्रिराक्षसवशीकरणमस्मिन् प्रधानप्रयोजनम् । तेनेदं मुद्राराक्षसमित्युक्तम् । कुटिलराजनीतितन्त्रज्ञोऽपि चाणक्यो गुणज्ञ इत्यनेनैव ज्ञायते । कथाकल्पनं यथातिगभीरं, तथा मृदुमधुरं, कवित्वमप्यतिप्रौढम् । बुद्धिमान्, राजनीतिचतुरः, कार्यदक्षो, मन्त्रिराक्षसः । तथापि चन्दनदासविमोचनार्थं परवशः समभवत् । तस्येमानि वाक्यानि –

'किं गच्छामि तपोवनं ? न तपसा शाम्यत् सवैरं मनः
किं भर्तुर्ननु यामि ? जीवितरिपौ स्त्रीणामियं योग्यता ।

---

1. तेलङ्गपण्डितस्य मुद्राराक्षस-भूमिका द्रष्टव्या.
2. मुद्रा. VII· 19·
3. H. C. S. L. p. 605-606; De's H· S. L. pp.262-271.

किं वा सङ्गसखः पताम्यरिबले ? नैतच्च युक्तं भवेत्
चेतश्चन्दनदासमोक्षरभसं रुन्ध्यात् कृतघ्नं न चेत् ॥'1

इमानि चाणक्यवचनानि –

'स हि भृशमभियुक्तो यद्युपेयाद् विनाशं
ननु वृषलवियुक्तस्तादृशेनापि पुंसा ।
'अथ तव बलमुख्यान् घातयेत् सापि पीडा
वनगज इव तस्मात् सोऽभ्युपायैर्विनेयः ॥'2

अमात्य राक्षस ! साधु साधु, मन्त्रिबृहस्पते साधु !

'ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते
तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया ।
भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासङ्गेन निःसङ्गया
भक्त्या कार्यधुरं वहन्ति बहवस्ते दुर्लभास्त्वादृशाः ॥'3

सकलराजनीतिशास्त्रसारेऽस्मिन् मुद्राराक्षसे प्रथमं गणनीयं पात्रौचित्यं, यदापादचूडमप्रतिहतं पोषितं; तत्रेदमेकमुदाहरणम् ।
चाणक्यः – साधु ! चन्दनदास ! साधु !

"सुलभेष्वर्थलाभेषु परसंवेदने जने ।
क इदं दुष्करं कुर्यादिदानीं शिबिना विना ॥"4

महाकविनानेन निर्मितमन्यत् काव्यं दुर्लभम् । तथापि

1. मुद्रा· V. 24 v.
2. मुद्रा· III. 25 v.
3. ,, I. 14.
4. ,, ,,

सुभाषितावल्यादिषु केचन श्लोका अस्येव दृश्यन्ते ।1 तेषु च त्रिचतुराः सन्दिग्धाः । एतदीय इवायं सदुक्तिकर्णामृतेऽस्ति –

"रामोऽसौ भुवनेषु विक्रमगुणैर्यातः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद् यदि परं देवो न जानाति तम् ।
बन्दीवैष यशांसि गायति मरुद् यस्यैकबाणाहति-
श्रेणीभूतविशालविवरोद्गीर्णः शरैः सप्तभिः ॥"2

1. सुभाषितावली, 1548; 1721. vv.
2. सदुक्तिकर्णामृतम्.

(४२-६१) कवयित्र्यः

वैदिकसारस्वते रोमशा, लोपामुद्रा-सूर्यागोधादि ब्रह्मवादिन्यः काश्चन मन्त्रसन्दर्शिन्यः श्रूयन्ते तथा लौकिकसारस्वतेऽपि काव्य-रचना विख्याता विजयाङ्कादिकवयित्र्यः संदृश्यन्ते । तत्र कासांचिद् देशकालनिवासादिवृत्तान्तः सम्यगवगन्तुं न शक्यते । कासांचिद् रचनान्यपि कालगर्भे विलीनानि । तथापि प्राचीनभारतीयस्त्री-कविनामस्मरणार्थं एवायमारम्भः । अत्र तासां कालक्रमो यथालाभं दर्शितः ।

(४२) विजयाङ्का

विज्जा, विज्जिका, विज्जुकेत्यस्या नामान्तराणि । सरस्वतीति बिरुदनाम । विद्या विद्यकेति व्यवहारोऽप्यस्ति ।[1] सदुक्तिकर्णामृते 'विद्या' नाम्ना केचन चाटुश्लोकाः सन्ति । राज-शेखरेण विजयाङ्का नाम, धनिकेन विज्जका नाम च गृहीतम् । केषुचिद् पद्येषु कर्णाटी, कर्णाटराजप्रियेति च व्यवहारोऽस्याः सन्दृष्टः । राजशेखरकृतेयं स्तुतिः सूक्तिमुक्तावल्यां लब्धा –

"सरस्वतीव कर्णाटी विजयाङ्का जयत्यसौ ।
या वैदर्भगिरां वासः कालिदासादनन्तरम् ॥"[2]

---

1. H. C. S. L. 392; Dr. J. B. Chaudhari's "Skt. Poetesses"–Intro. LVII.
2. सूक्तिमुक्तावली-p. 47. (93 v.)

एतेन विजयाङ्का कर्णाटराजपत्नीत्यूह्यते पुनश्च –

"नीलोत्पलदलश्यामां विज्जकां तामजानता ।
वृथैव दण्डिना प्रोक्ता सर्वशुक्ला सरस्वती ।।"1

अनेनेयं श्यामाङ्गी, दण्डयाचार्यात् परा, सरस्वती–बिरुदाञ्चिता, विदुषीति कथिता । अनयाप्येवं कृतात्मस्तुतिः कर्पूरमञ्जरीभूमिकायां दृष्टा यथा –

"एकोऽभून्नलिनात् तथैव पुलिनाद्, वल्मीकतश्चापरः
ते सर्वे कवयो भवन्ति गुरवस्तेभ्यो नमस्कुर्महे ।
अर्वाञ्चो यदि पद्यगद्यरचनैश्चेतश्चमत्कुर्वते
तेषां मूर्ध्नि दधामि वामचरणं कर्णाटराजप्रिया ।।"2

अर्वाचीनकवीनां पद्यगद्यरचनं हृदयरञ्जनं यदि, तेषां वामचरणं मम मूर्ध्नि वहामीत्युक्तवत्या तादृशकवयो न सन्तीति भावः सूचितः ।

तद्वचनेऽहं निरुपमानेत्यहंकारश्च प्रकटितः । अत्र तेषां मूर्ध्नि वामचरणं दधामीत्यन्वयो न कर्तव्यः असमीचीनत्वात् । अनया कर्णाटराजस्य प्रियेत्युक्तमस्मिन् श्लोके । एतावता कः स राजा ? कुत्रत्यः ? कदा वा आसीदिति विज्ञातुमशक्यम् ।

'अथ नायकान्तरसम्बन्धिन्ययोढा' यथा विज्जकाकृतमिमं श्लोकमुदाहृतवान् धनिको दशरूपव्याख्यायाम्3 ।

---

1. सू· मु. p· 47. (96 v.)
2. cf. सुभाषित-रत्न-भाण्डागारम् p· 37. 59 v.
3. दशरूपावलोकः–II. ad Karika 20 (p. 47)

"दृष्टिं हे प्रतिवेशिनि ! क्षणमिहाप्यस्मिन् गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि तद् वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥"[1]

एवमनया जारिणीचार्या वर्णिता । निजतनयायै वेश्यमात्रा-कृतनिजकुलधर्मोपदेशश्चानयैवं वर्णितः । श्लोकोऽयं सदुक्ति-कर्णामृतादिषु लभ्यते –

'वयं बाल्ये बालांस्तरुणिमनि यूनः परिणता-
वपीच्छामो वृद्धांस्तदिह कुलरक्षा समुचिता ।
त्वयारब्धं जन्म क्षपयितुमनेनैकपतिना
न नो गोत्रे पुत्रि ! क्वचिदपि सतीलाञ्छनमभूत् ॥'[2]

एवंविधवर्णनैरियं कर्णाटी कर्णाटराजस्य प्रिया वा, वाराङ्गना वेति संशयः सञ्जायेत । तत्त्वं नावगम्यम् । तथापीयं शृङ्गारकविताप्रवीणेति स्पष्टम् ।

द्वितीयपुलकेशितनयश्चन्द्रादित्यः कर्णाटदेशसीमावर्तिमहा-राष्ट्रदेशभागं क्रि. ५५९ समयेऽपालयत् । तस्य पत्नी विजय-भट्टारिका ; सैवेयं विजयाङ्का स्यादिति केषांचिदूहः ।[3] नायं प्रबलप्रमाणबद्धः । यथाकथंचिदियं दण्डिनः परा, राजशेखरात्पूर्वेति

1. सूक्तिमुक्तावली-p. 301. (7 v)
Skt. Poetesses-Part A. p. 44. (105 v.)
2. सदुक्ति. II. 13. (1 v.) p. 76; Skt. Poetesses p. 45; (106 v.)
3. H. C. S. L. p. 392.

विदितमेतावत् । तेनेयं शा. ७०० समये भवेदिति विश्वसिमः । विजयाङ्कानिर्मिता इव पद्यसङ्कलनग्रन्थेषु बहवः श्लोकाः सन्ति । तत्र पञ्चषा अस्याः कविताचातुरीदर्शनाय –

"किंशुक कलिकान्तर्गतमिन्दुकलास्पर्धि केसरं भाति ।
रक्तनिचोलकपिहितं धनुरिव जतुमुद्रितमनङ्गस्य ॥' 1

अत्रोपमा निरुपमेव भाति –

"कवेरभिप्रायमशब्दगोचरं
स्फुरन्तमार्द्रेषु पदेषु केवलम् ।
वदद्भिरङ्गैः कृतरोमविक्रियैः
जनस्य तूष्णीं भवतोऽयमञ्जलिः ॥"2

अपूर्वमिदं कवित्ववर्णनं विद्याया ध्वनिप्रियत्वमाविष्करोति । तदिदं बालसूर्यवर्णनम् –

'शुकतुण्डच्छविसवितुश्चण्डरुचिः पुण्डरीकवनबन्धो ।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः ॥'3

मन्मथोपालम्भ एवमाचरितः –

'देवेन प्रथमं जितोऽसि शशिभृल्लेखाभृतानन्तरं
बुद्धेनोद्धतबुद्धिना स्मर ! ततः कान्तेन पान्थेन मे ।

1. Skt. Poetesses-p. 55. (128 v)
2. सुभाषिता-158 v. Skt. Poetesses. p. 43. (104 v)
3. शा. पद्धति-86v. p. 12 This verse is under the name of Nagamma किं तु अयं श्लोकः विद्यायाः कृतः इति सदुक्ति. p. 3.

त्यक्त्वा तान् बत हंसि मामतिकृशां बालामनाथां स्त्रियं
धिक् त्वां ! धिक् तव पौरुषं धिगुदयं ! धिक् कार्मुकं !
धिक् शरान् ॥'[1]

इयं तु सखीं प्रति नायिकोक्तिः –

'धन्यासि यत् कथयसि प्रियसङ्गमेऽपि
नर्मस्मितं च, वचनं च, रसं च तस्य ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किञ्चिदपि स्मरामि ॥'[2]

इत्थं सरसकविताचतुरेति विदिता विजयाङ्का सरस्वती-बिरुदेन सत्कृता तत्कालविद्वद्भिरिति किमाश्चर्यम् । एतावदेवा–स्माभिर्लब्धमद्य ।

(४३) शीलादेवी

शार्ङ्गधरपद्धत्यामस्ति कश्चन श्लोकः कवयित्रीप्रशंसात्मक एवम्—

'शीला–विद्या–मारुला-मोरिकाद्याः
काव्यं कर्तुं सन्ति विज्ञाः स्त्रियोऽपि ।

1. सदुक्ति. II. 21. 4 v. p. 82.

2. सदुक्ति. II. 140. 2 v. p. 159; Skt. Poetesses p. 49. 116 v.

विद्यां वेत्तुं वादिनो निर्विजेतुं
विश्वं वक्तुं यः प्रवीणः स वन्द्यः ॥'1

तासु शीलेयं प्रथमा राजशेखरेणैवं स्तुता –

शब्दार्थयोः समो गुम्फः पाञ्चालीरीतिरुच्यते ।
शीला भट्टारिका वाचि बाणोक्तिषु च सा यदि ॥'2

भट्टारिकेति व्यवहृतत्वादियं राजपत्नी भवेत् । अथवा वैदुष्यसम्पदार्जितपूजार्थकं नाम वा भवेत् । भट्टबाणसदृशाया अस्याः पाञ्चालीरीतिभूषितं काव्यं दैवेनापहृतं किल ! सुभाषितावल्यामस्याः श्लोकोऽयम् –

'प्रियाविरहितस्याद्य हृदि चिन्ता समागता ।
इति मत्वा गता निद्रा के कृतघ्नमुपासते ॥3

इमे श्लोकाः सूक्तिमुक्तावल्यादि–सुभाषितकोशेषु सन्ति–

"दूति त्वं तरुणी, युवा स चपलः, श्यामास्तमोभिर्दिशः,
सन्देशः सरहस्य एष, विपिने सङ्केतकावासकः ।
भूयो भूय इमे वसन्तमरुतश्चेतो नयत्यन्यतो
गच्छ क्षिप्रसमागमाय निपुणं, रक्षन्तु ते देवताः ॥4

1. शार्ङ्गधरप. p. 26. (163 v.)
2. सूक्तिमुक्तावली–p. 47. (91 v.)
3. सुभाषिता. 1197 v; Skt. Poetesses. p. 35. (78 v.) शा. प. 3347 v. (p. 504)
4. Skt. Poetesses. p. 35. (80 v.); सूक्तिमुक्ता-p. 145. (11 v.) सुभाषिता-1188 v. शा. प. 3439 v.

यः कौमारहरः स एव हि वरस्ताश्चन्द्रगर्भा निशाः
प्रोन्मीलन्नवमालतीसुरभयस्ते ते च विन्ध्यानिलाः ।
सा चैवास्मि, तथापि चौर्यसुरतव्यापारलीला विधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥[1]

मम्मटाद्यर्वाचीनालङ्कारिकैः स्मृता, राजशेखरेण च विनुता इयं शीलादेवी शा. ८०० समये समासीदिति भाव्यते । उपलब्धवर्णनानि पुरस्कृत्येयं रेवानदीतीरभूभागनिवासिनीति च चिन्त्यते । नातोऽधिकं वेद्यमिदानीम् ।

(४४) विकटानितम्बा

हासजनकं नामेदमागन्तुकं, न तु सहजम् । तथापि रूढं विद्वल्लोके । राजशेखरादिरचिता विकटनितम्बायाः प्रशंसा कवीन्द्रवचनसमुच्चयादिषु दृश्यते । यथा –

"के वैकटनितम्बेन गिरां गुम्फेन रञ्जिताः ।
निन्दन्ति निजकान्तानां न मौग्ध्यमधुरं वचः ।"[1]

अनया निर्मिताः श्लोकाः केचन सुभाषितावल्यादिषु संलक्ष्यन्ते यथा –

"अन्यासु तावदुपमर्दसहासु भृङ्ग !
लोलं विनोदय मनः सुमनोलतासु ।

1. सूक्तिमुक्ता–p. 301. (9 v.); शा.प. 3768 v. सदुक्ति. II. 12 (3 v.)-p. 76; Skt. Poetesses-p. 36. (82 v.)
2. सूक्तिमुक्ता-p. 47 (92 v.) Skt. Poetesses-p. XLVIII.

बालामजातरजसां कलितामकाले
व्यर्थं कदर्थयसि किं नवमल्लिकायाः ॥1

लावण्यसिन्धुरपरैव हि केयमत्र
यत्रोत्पलानि शशिना सह संप्लवन्ते ।
उन्मज्जति द्विरदकुम्भतटी च यत्र
यत्रापरे कदलकाण्डमृणालदण्डाः ॥"2

अनेनेयं सरसोक्तिनिपुणेति ज्ञायते । द्वितीयश्लोको विक्रमादित्यस्येति प्रवादोऽप्यस्ति । तथाप्ययमस्य एवेति निरूपितः सदुक्तिकर्णामृते । एकेन निर्मितश्लोकोऽन्येन निर्मित इव सङ्कलनग्रन्थेषु तत्र तत्र दृश्यते । तादृशप्रमादः सदुक्तिकर्णामृतेऽधिकः– 'कान्ते तल्पमुपागत'3 इत्यमरुकश्लोको विकटनितम्बाकृत इति ; अन्या निर्मिता इति सुभाषितावल्यादिभिः कथिताः केचन विद्यापतिना रचिता इति च यदुक्तं सदुक्तिकर्णामृते तत्प्रामादिकमेव । यद्यपि कष्टसाध्यं चाटुश्लोककर्तृत्वनिरूपणम्, तथापि बहुसम्मतिरनुसर्तव्या खलु ! विकटनितम्बायाः श्लोक इति श्लोकसङ्कलनग्रन्थैः कैश्चिन्निरूपितोऽयं श्लोको रुद्रटस्येति, भल्लटस्येति च पाठद्वयमायातम् । कथमत्र निरूपणम् ?

---

1. सुभाषिता. 735 v. शा. प. 823 v. (p. 128) दशरूपकम्-IV. under कारिका 33. (p. 90)
2. सदुक्ति-II. 4. 3 v. p. 70. काव्यालङ्कारसूत्रवृत्तिः-IV. 3. under का. 4. ध्वन्यालोकः-III. व्यक्तिविवेकः-p. 33 Trivendrum Skt. Series) 1909.
3. Skt. Poetesses p. 58. 137 v.

'अयं वारामेको निलय इति, रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ' ॥1

अस्या जातिनिवासादिकं न किमपि ज्ञातम् । राजशेखरात्पूर्वा इयं शा. शकाष्टमशतकारम्भे स्थितेति तर्क्यते ।

— 0 —

1. सूक्तिमुक्ता-p.97. (18 v.) under Vararuci 108; भल्लट-शतकम्–108 v Kavyamala-IV. p. 188-अयं श्लोकः मालवरुद्रनाम्ना शार्ङ्गधरपद्धतौ समुद्धृतः

(४५) प्रभुदेवी

राजशेखरेण (क्रि. श. ८८०–९२०) विनुता सेयमपि शा. ७-८ शतकमध्यगतैव । तद् विनुतिरियम् –

"सूक्तीनां स्मरकेलीनां कलानां च विलासभूः ।
प्रभुदेवी कविर्लाटी गतापि हृदि तिष्ठति ॥"[1]

अत्र लाटी,[2] लाटदेशीयेति लाटराजपत्नीति च सूचयत्यर्थद्वयम् । लाटदेशीयैव भवतु । तावता किमायातं फलम् ? अस्याः कवित्वं विज्ञातुमेकोऽपि श्लोको नावशिष्टः खलु !

–०–

1. सूक्तिमुक्ता-p. 47. Skt. Poetesses-Intro. p. LVI. सुभाषितहारावली-Ms. folio 34. (132 v.)
2. लाटाः – गुर्जरदेशः

(४६) सुभद्रा

राजशेखरकृतकविरहस्योद्यमादनेकपूर्वकविनामान्युपलब्धानीति विदितमितः पूर्वम्। तेष्विदमेकं महिलाकवेर्नाम। तेनेत्थं कीर्तितेयं तस्मात् पूर्वेति स्पष्टम् –

"पार्थस्य मनसि स्थानं लेभे लघु सुभद्रया।
कवीनां च वचोवृत्तिचातुर्येण सुभद्रया।"1

(४७) जघनचपला

इदमपि परिहास्यं नाम लोके व्याप्तम्। केनापि परिचितेनेयं परिहसिता श्लोकरूपेणैवम् –

'दुर्दिननिशीथपवने निःसंचारासु नगरवीथीषु।
पत्यौ विदेशयाते परं सुखं जघनचपलायाः॥'2

नेयं राजशेखरेण विनुता न कुत्राप्येतदीयं पद्यम्। पद्यवेणीनामकग्रन्थेऽस्याः श्लोकाः सन्ति।

1. H. C. S. L. 392. There is a mention of her name; Skt. Poetesses. p. 38. 85 v. सुभद्रायाः श्लोकः–"दुग्धं च यत्तदनु"–सुभाषिता p. 537. 3259 v.
2. Skt. Poetesses p. 15. 35v. सुभाषितरत्नकोशः सुभाषितहारावली Ms. folio 24a, 65 v. पद्यवेणी ; पद्यरचना– p. 52. 36 v.

(४८) इन्दुलेखा

अस्याः कालदेशनिवासादिकमवेद्यम् । अपि तु नार्वाचीना । सुभाषितावल्यां दृष्टादस्मात् पद्यादियं विदुषी, सुकविताचतुरेति ज्ञायते । तदिदं सूर्यास्तमयवर्णनमेतत्कृतकाव्यान्तर्गतं वा, चाटुवचनं वा भवेत् । यथा –

"एके वारिनिधौ प्रवेशमपरे लोकान्तरालोकनं
केचित् पावकयोगितां निजगदुः क्षीणेऽह्नि चण्डार्चिषः ।
मिथ्या चैतदसाक्षिकं प्रियसखि ! प्रत्यक्षतीव्रातपान्
मन्येऽहं पुनरध्वनीनरमणीचेतोऽधिशेते रविः ।।"1

(४९) मारुला

अस्याः उदन्तोऽपि मृग्य एव । नालङ्कारिकैरियं प्रशंसिता । तथापि नात्यन्तमर्वाचीना । अस्याः कवित्वं श्राव्यमपि न लभ्यम् । पद्यद्वयं तु सुभाषितावल्यादिष्वस्ति । चिराय देशान्तरादागत्य, भार्यामापृच्छ्य, तच्चर्यां स्मरतः कस्यचिदुक्तिरियम् –

"कृशा केनासि त्वं ? प्रकृतिरियमङ्गस्य ननु मे
मला धूम्रा कस्माद् ? गुरुजनगृहे पाचकतया ।

1. सुभाषिता-p. 323 (1902 v.); Sanskrit Poetesses p. 14. (34 v.)

स्मरस्यस्मान् कच्चित् ? नहि नहि नहीत्येवमगमत् ।
स्मरोत्कम्पं बाला मम हृदि निपत्य प्ररुदिता ।।"1

(५०) मोरिका

अस्याश्चरितमपि न ज्ञेयम् । काव्यशेषस्त्वेक: 2 श्लोक: सुभाषितावल्यां दृश्यते ।

"मा गच्छ प्रमदाप्रिय ! प्रियशतैर्भूयस्त्वमुक्तो मया
बाला प्राङ्गणमागतेन भवता प्राप्नोति निष्ठां पराम् ।
किञ्चान्यत् कुचभारपीडनसहैर्यत्नप्रबद्धैरपि
त्रुटयत्कञ्चुकजालकैरनुदिनं निःसूत्रमस्मद्गृहम् ।।"3

विटान् वशीकुर्वत्या वृद्धवेश्याया भाषितमिदम् ।

---

2. शा. प. p. 520 (3532 v.) सुभाषिता-p. 221 (1326 v.) Sanskrit Poetesses. p. 19 (45 v.) 'गोपायन्ति विरह-जनितम्'–इत्यादिश्लोक: अपर: सुभाषितावल्याम् (p. 182, 1095 v.), सुभाषितहारावल्याम् (Ms. Folio. 32b; 50 v.) लभ्यते.

1. मोरिकाया: श्लोका: त्रयो लभ्यन्ते सुभाषितावल्याम्–(1050; 1072; 1396)

2. शा. प. p. 513 (3496 v.); सुभाषिता.–p. 175 (1053 v.) सूक्तिमुक्ता-p. 156 (2 v.) Skt. Poetesses p. 21 (48 v.)

[५१] भावदेवी

रसिकजनरञ्जकशृङ्गारभाववर्णनेन सार्थकनामधेयेय-मविज्ञातचरितेति चिन्ता। अस्याः कानिचिन्मनोहराणि पद्यानि सङ्कलनग्रन्थेषु सन्ति। तेष्वपि द्वित्रा अन्यस्य शिरस्यारोपिताः कैश्चिदित्यपरा चिन्ता। अधोलिखितश्लोकोऽनया रचिता इति सुभाषितावली, अमरुकनिर्मित इति सदुक्तिकर्णामृतम्। किं तु मुद्रितामरुकशतकेषु नायं श्लोको दृश्यते। तस्मादस्या इति निश्चिनुमः –

"पुराऽभूदस्माकं प्रथममविभिन्ना तनुरियं
ततो नु त्वं प्रेयानहमपि हताशा प्रियतमा।
इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं
मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम्॥"1

एतन्मानवतीवचनसम्बन्धीव दृश्यतेऽधोलिखितश्चापरः श्लोकः। अयं भावदेवीनिर्मित इति बहुग्रन्थाः प्रवदन्ति –

"किं पादान्ते पतसि ? विरम स्वामिनो स्वतन्त्राः
कञ्चित्कालं क्वचिदसि रतस्तेन कस्तेऽपराधः।
आगस्कारिण्यहमिह मया जीवितं त्वद्वियोगे
भर्तृप्राणाः स्त्रिय इति ननु त्वं मयैवानुनेयः॥"2

---

1. सुभाषिता p.275 (1622v.) किंतु 'तथाभूदस्माकम्' इत्यादिः शा॰ प॰ सूक्तिमुक्ता॰ सु॰ र॰ कोश; Sanskrit Poetesses– p. 2 (3 v.)
2. सदुक्ति॰ p. 100 (II. 231 v.) पद्यावली-p. 174 (381v.)- S. K. De's ed. 1934. Sanskrit Poetesses p. 2 (4v.)

अथ श्लोकोऽयं राजशेखरस्येत्येको ग्रन्थः, अस्या इत्यपरे। यथा –

"सजन्मानौ तुल्याभिजनभुवा जन्म च सह
प्रवृद्धौ नाम्ना च स्तन इति समानावुदयिनौ।
मिथः सीमामात्रे यदिदमनयोर्मण्डलवतो –
रपि स्पर्धायुद्धं तदिह हि नमस्या कठिनता॥"[1]

मोरिकेवेयमपि नातिपूर्वा, नाप्याधुनिका। एवंविधस्त्रीकविकाव्यानि नष्टानि दुर्दैवात्। एवमेव पुरा स्त्रीकवित्वं शृङ्गारमयं दृश्यते सर्वत्र। तावता रसिकपुरुषैर्निर्मिता इमे श्लोकास्तत्तत्कान्तानां वाचि विनिहिता इति सम्भावनं तु न कदापि समुचितम्। तथाप्येतावत् प्रशंसितानां स्त्रीकवीनां कुलस्त्रीत्वं शङ्कनीयमिति तत्तद्वर्णनापेक्षया स्फुरति चेत् सहृदयानां हृदये स्फुरतु नाम। तदनिवार्यमनिर्णेयं चास्माकमित्यलम्।

(५२) प्रियंवदा

सेयं प्राग्वङ्गदेशीया फरीदपुरनिवासिनी शा. १५२० समयवर्तिनी। अस्याः पिता शिवरामः, भर्ता रघुनाथः। अनया श्यामरहस्यं नाम पद्यकाव्यं निर्मितम्। तन्मुद्रितमिव न दृश्यते। तत्रायं श्रीकृष्णस्तवः –

"कालिन्दीपुलिनेषु केलिकलनं कंसादिदैत्यद्विषं
गोपालीभिरभिष्टुतं व्रजवधूनेत्रोत्पलैरर्चितम्।

3. सु. र. को. Sanskrit Poetesses-p. 1. (2. v.)

बर्हालङ्कृतमस्तकं सुललितैरङ्गैस्त्रिभङ्गं भजे
गोविन्दं व्रजसुन्दरं भवहरं वंशीधरं श्यामलम् ॥"1

(५३) वैजयन्ती

इयमपि प्राग् वङ्गीया। फरीदपुरमण्डले धनुकपुरमस्या जन्मस्थानम्। जनकोऽस्याः पण्डितमूरभट्टः। दुर्गाप्रसादतर्कवागीशस्य तनयः कृष्णनाथोऽस्याः पतिः शा० १५६० समवर्तिनावुभौ दम्पती संस्कृतसाहित्यनिधी, तर्कमीमांसाभिज्ञौ, कवी च। उभाभ्यामानन्दलतिकाचम्पूर्निर्मितेत्यनेन ज्ञायत एवम् –

"आनन्दलतिकाचम्पूर्येनाकारि स्त्रिया सह।"2

अनया कृतं नायिकावर्णनमिदम् –

"अहिरयं कलधौतगिरिभ्रमात्
स्तनमगात् किल नाभिह्रदोत्थितः।
इति निवेदयितुं नयने हि यत्
श्रवणसीमनि किं समुपस्थिते "3

नेदं वर्णनमपूर्वम्। किन्तु पूर्वालङ्कारकैरुदाहृतस्य कस्यचिन्नायिकावर्णनस्य केवलमनुकरणम्। यथा –

....

1. This Poetess is also called Rasavati Priyamvada Vide Sanskrit Poetesses p. 33.
2. Sanskrit Poetesses-Part A. Intro. p. 57.
3. Sanskrit Poetesses Part A. Intro. p. 57.

"गङ्गावर्तसमाननाभिविलसद्वल्मीकरन्ध्रान्तरात्
तन्वी श्यामलरोमराजिभुजगी निर्गत्य बाले तव ।
वक्त्रेन्दुं ग्रसतीति पन्नगभिया पीनौ कुचौ सङ्गता-
वित्याख्यातुमिदं त्वदक्षियुगलं कर्णान्तमाशिश्रिये ।।"

[५४] गङ्गादेवी

मधुराविजयकाव्यनिर्माणेन देशविख्यातेयं विदुषीमणिः । विजयनगरसाम्राज्यस्थापकस्य प्रथमबुक्करायनृपतेर्द्वितीयपुत्रो वीरकम्पररायभूपतिरस्याः पतिः । अस्य सभायामेव सायणाचार्येण स्वनिर्मितसुभाषितसुधानिधिः श्रावितः । अयमेव शा· १२८० समये दक्षिणदेशं स्वायत्तीकृत्य पालितवान् । भर्तृकृतदक्षिणदेशविजयोदन्त एवानयास्मिन् काव्ये वर्णितः ।2 सुलताननामकप्रतिवीरनाशानन्तरं दक्षिणदिगङ्गनैवं स्थितेति वर्णितमत्रान्ध्रकवयित्र्यानया –

'प्रशान्तदावेव वनान्तलक्ष्मीः
गतोपरागा गगनस्थलीव ।
कलिन्दजामर्दितकालियेव
दिग् दक्षिणासीत् क्षतपारसीका ।।'3

नवसर्गमिदं काव्यं सग्रन्थपातं मुद्रणाय लब्धम् । अस्याः कवित्वं मृदुलम् । तात्कालिकस्त्रीकवीनामियं रसोचितवर्णने समर्था । अत्र गुरूपदेशवर्णनमिदमुदाहरणम् –

---

1. Skt. Poetesses p. LVIII.
2. MadhuraVijaya.

'गुरूपदेशः किल कथ्यते बुधै-
रकर्कशं किञ्चन रत्नकुण्डलम् ।
अमेचकं नूतनमञ्जनं सता
मजातगात्रक्षयमद्भुतं तपः ॥'

[५५] तिरुमलाम्बा

इयमान्ध्रस्त्रीकविः सुगृहीतनामधेयस्य वीराधिवीरस्य, विजयनगरसाम्राज्यपालकस्य श्रीकृष्णदेवरायमहाराजस्य तनूजा, अलियरामराजस्य भार्या च ।1 पितुरन्तिके, पितृव्यस्याच्युतराय-नृपतेरन्तिके च संस्कृतविद्यामभ्यस्य, साहित्ये कवितायां च विमलं विज्ञानमर्जितमनया । शा. १४२० समये लब्धजन्मेयं कुमारी, सुकुमारकोमलाङ्गी, गुरुजनप्रेमपात्रमपि नियमपूर्वकविद्यास्वीकारे ऽनलसा बुद्धिमती विदुषीरत्नमभवत् ।

अस्याः पितृव्यस्य पाणिगृहीती वरदाम्बिका । तयोर्विवाह-वृत्तान्तं प्रधानीकृत्य वरदाम्बिकापरिणयं नाम पद्यकाव्यमियं निर्ममे । अस्मिन् प्रथमतः पितामहीपितामहयोः ओबाम्बानरस-राजयोः परिणयवृत्तान्तो वर्णितः ।

ततः कथानायकयोर्विवाहोऽभिवर्णितः । अनन्तरं तयोः पुत्रस्य चिनवेङ्कटाद्रेर्जन्मादिवर्णनं कृतम् ।2 इदं काव्यं लाहोरनगरे मुद्रितम् ।

1. Tanjore Catalogues VII p. 3244, 45 mentions her as the wife of Acyutaraya. Also cf. Skt. Poetesses. Part A. p. LIX.
2. Edited by Dr. Laksmana-Svarup. 1938.

[५६] रामभद्राम्बा

तञ्जावूरपालकेषु नायकराजेषु कविः, विद्वत्कविपोषको वीरो विद्वान्, रघुनाथराजो विख्यातकीर्तिः। सोऽयमान्ध्रराजः शा. १५३६-१५५५ मध्यकाले दक्षिणदेशमपालयत्। तस्य धर्मपत्नीयं कवयित्री। भर्तारं नायकीकृत्य रघुनाथाभ्युदयनामकं द्वादशसर्गं काव्यं प्रणिनाय ।। काव्येऽस्मिन् श्लोकसंख्या ६००।

संस्कृतप्राकृतभाषाभिज्ञेयं चतुर्विधकविताचतुरा प्रतिभाशालिनी च। अस्याः वैदुष्यादिकं सर्गान्तिगद्यान्येवं निगदन्ति। अष्टभाषाकल्पितचतुर्विधकवितानुप्राणितसाहित्यसाम्राज्यभद्रपीठा – रूढरामभद्राम्बाविरजिते2 अस्मिन् काव्यमणिदर्पणे रघुनाथजीवितचरितं सुष्ठुप्रतिफलितम्। कवित्वं सुरुचिरं प्रसादगुणविशिष्टं च–

"अधिकश्रियमच्युतेन्द्रसुनुं
रघुनाथं रघुनाथमेव साक्षात्।
हृदये कलयन्ति ये महान्तः
परमानन्दभरात्त एव धन्याः ।।"

एतत्काव्यरचने भर्तृसाहाय्यमेवं न्यवेदयत् –

'शब्दार्थयोर्मर्मसमप्रधानं
वशंवदं यस्य वदन्ति सर्वे।

---

1. M. K. p. 230 ; Skt. Poetesses. LIX.
2. K. Sitaramayya : Some Tanjore Poets and Scholars p. Skt. Poetesses (Vol. A. 5. p. LIX)

कृती स एवात्र कृतौ सहायो
नाथो मम श्रीरघुनाथनेता ॥1'

चन्द्रगिरिपालकस्य वेङ्कटपतिराजस्य पारसिकैः सह संग्रामः सम्प्राप्तः। तदा चन्द्रगिरिराजेन प्रार्थितोऽच्युतनायकः स्वपुत्रमेनं रघुनाथनायकं तत्र प्रेषितवान्। तदुदन्तोऽत्र सम्यग् वर्णितः –

"कर्णाटरक्षाकरणे नितान्तं
विचारवान् वेङ्कटदेवरायः।
गन्धान्धभूमीधवगन्धनाग-
कण्ठीरवं शौर्यकथानिदानम् ॥

रणे सहायं रघुनाथदेव –
मयाचतोर्जस्वलमच्युतेन्द्रम्।
गुरोर्निदेशाद् गुरुराज्यकार्य-
निर्वाहको नीतिपराङ्वनीनः ॥

सामन्तभूपालशतानुयातो
जयप्रयाणाय समुद्यतोऽभूत्।'2

काव्येऽस्मिन् यथावैदुष्यं तथा पतिभक्तिरपि प्रदर्शिताऽनया कविताभद्रया।

1. History of Nayak Kings of Tanjore (in Telugu) by K. Sitaramayya.

2. History of Nayak Kings of Tanjore.

[५७] मधुरवाणी

सेयमान्ध्रवाराङ्गना पूर्वोक्तरघुनाथनायकस्य पाणिगृहीता। रामभद्राम्बायाः सपत्नीप्राया, विदुषी, संस्कृतान्ध्रभाषाभिज्ञा, तदुभयकविमित्रं च। रघुनाथनायकेन निर्मितमान्ध्ररामायणकथासारकाव्यमनया संस्कृतीकृतमिति तेनैव नायकेनैवमुक्तम् –

'रसोत्तरं रामकथानुबन्धं काव्यं मया कल्पितमान्ध्रवाण्या।
कार्यं कया संस्कृतवाग्भिरेतदित्येव चित्ते गणयन्निवासीत् ॥'1

'अजहदलङ्कृतिक्रममनेकरसोल्लसितं
सरसपदार्थसङ्गति समग्रगुणानुगुणम्।
रघुरमणप्रबन्धतिलकं रसिकाभिमतं
सुदति ! विधीयतामिति सुधीरगदीन् नृपतिः ॥'

स्वस्मै प्रियेण मधुरवाणी - बिरुदो दत्त इत्येवमगददियं सुदती। नास्याः सहजं नाम वेद्यम्।

"चतुरमधुरवाणीं सम्यगाकर्ण्य यस्याः।
सरसमधुरवाणी नाम दत्तं त्वयैव ॥'2

सङ्गीतसाहित्ययोर्निपुणा परमष्टावधानविधानचतुरा अधीतव्याकरणशास्त्रा प्रज्ञाशालिनीयं रराज रघुनाथराजसभायाम्। अनया यन्त्रप्रतिमाचरितचामरचालनमेवं वर्णितम् –

---

1. Some Tanjore Poets and Scholars; Skt. Poetesses p. LIX ;
2. Some Tanjore Poets and scholars; Skt. Poetesses p. LIX ;

"यदन्तरावर्तितनर्तनाननां
सीमन्तिनीनां श्रममाक्षिपन्ति ।
पर्यन्तयन्त्रप्रतिमाकराग्र-
प्रकीर्णजाताः पवमानपोताः ॥"

स्वप्रियस्य तञ्जापुरपालनमेवं वर्णितम् –

"कञ्जातसूतिः प्रमदाङ्घ्रिभूषा,
शिञ्जारवोदारवचाः स राजा ।
पुञ्जानमूल्यान् दधतीं मणीनां,
तञ्जापुरीं शास्ति तरङ्गितौजाः ॥"[1]

रामकथामृतं बहुवारमास्वाद्यमानमपि सदा रुचिं जनयत्यभिनवामिवेति वर्णितमित्थम् –

"हरेश्चरित्रं बहु तत्र राम-
कथासुधा कर्णरसायनं नः ।
आस्वाद्यमानापि सहस्रवार-
मयातयामैव सुखस्य दोग्ध्री ॥"

एवमस्याः कवित्वं मनोहरमित्यस्य द्वावपरौ श्लोकौ —

"संख्यावतां सर्वपथीनधीभिः
संशोधिता चेत् कविता कवीनाम् ।
कस्तूरिकाचन्दनकुङ्कुमाद्यै-
रुद्वर्तिताङ्गी युवतीव दीव्येत् ॥

मध्येमणीभित्त्यनुबिम्बितं स्वं
मत्वा रमां चात्र विनन्तुकामा ।

1. Some Tanjore Poets and Scholars; Skt Poetesses P. LIX

करे तदीये कमलं तदानी-
मनीक्षमाणा त्रपते नताङ्गी ॥"1

[५८] लखीना

ठाकुराणीति प्रसिद्धेयं मिथिलानिवासिनी नातिपूर्वा । तथाप्यस्याश्चरितं नोपलभ्यम् । सेयमुत्तरदेशीया काचन सामन्त-राज्ञीव दृश्यते । संस्कृतसाहित्ये, जातकस्कन्धे च प्रवीणयाऽनया कृतं काव्यं मृग्यम् । एकश्चाटुश्लोक आकर्ण्यते कर्णोपकर्णिकया—

'आक्रान्ता दशमध्वजस्य गतिना सम्मूर्च्छिता निर्जले
तुर्यद्वादशमद्द्वितीयमतिमन्नेकादशाभस्तनी ।
सा षष्ठी, कटिपञ्चमी च नवमभ्रूः सप्तमीवर्जिता
प्राप्नोत्यष्टमवेदनां त्वमधुना तूर्णं तृतीयो भव ॥'2

एका दूतिका नायिकाविरहव्यथां नायकाय विज्ञापयति अत्र । द्वादशराशयोऽङ्गेभ्यः सूचिताः । तथा दशमध्वजस्य दशमो मकरः मकरध्वजस्य मन्मथस्येत्यर्थः, एवमुत्तरत्राप्यूह्यम् । हे द्वितीयमतिमन् वृषभबुद्धे नायक ! सत्वरं गच्छ, तृतीयो भव, मिथुनं भव, तथा सह वर्तस्व तदेतच्चित्रकविताचातुर्यम् ।

[५९] त्रिवेणी

इयं यादवराघवपाण्डवीयकर्तुरुदयेन्द्रपुरोपनामकस्यानन्ता-चार्यस्य दुहिता श्रीपेरुम्बुदूरनिवासिनि । प्रतिवादिभयङ्करवेङ्कटा-र्थस्य धर्मपत्नी ।3 सेयं विदुषो सजीवा शा. १७३९–१८०५

1. M. K. p. 231.
2. M. K. H. C. S. L. p. 395 (para 378)
3. " " " " 379)

मध्यकाले । आदौ गुरोरधीतं काव्यनाटकालङ्कारसाहित्यमनया । ततः पत्युरधीतं वेदान्तशास्त्रम्- तत्त्वज्ञा वैष्णवीयं कवयित्री रङ्ग-नाथसहस्रं, लक्ष्मीसहस्रं, रङ्गाभ्युदयं, सम्पत्कुमारविजयं, रङ्ग–राट्समुदयं, तत्त्वमुद्राभद्रोदयं, शुकसन्देशं, भृङ्गसन्देशं हारती-पञ्चकं च क्रमश्चकार। श्रीरङ्गस्वामिसेवापरतन्त्रा त्रिवेणी तत्कालमैसूरमहाराजेन सत्कृता । स्वार्जितं वित्तं स्वामिसमाराधनाय विनियुज्य विष्णुसायुज्यं गता । अस्याः कृतयः तञ्जापुर-सरस्वतीनिलये सन्ति । नैकं काव्यमपि मुद्रणभाग्यमगमदद्यापि ।

[६०] ज्ञानसुन्दरी

सेयं वाराङ्गना दाक्षिणात्यकुम्भकोणपुरवासिनी शा· १७६० समये सञ्जाता शा· १८३० समये दिवं गता । विदुषीयं विद्वद्–रञ्जनकविताशालिनी तत्कालमैसूरमहाराजेन सत्कृता कविरत्न-बिरुदेन । बहूनि काव्यानि निर्मितान्यनया । तेषु हालास्यचम्पू–र्लब्धा, मुद्रिता चाद्य । यौवनदशायामियं मधुरपुरे न्यवसत् कविता-गानं, वीणागानं च कुर्वती मीनाक्षीसुन्दरेश्वरसेवामाचरन्ती, अनया मीनाक्षीसुन्दरेश्वरपरिणयकाव्यं निर्मितम् । भाषा सुलभा, वर्णनानि च मनोहराणि । तत्रेमौ श्लोकौ–

"मधुरीकृतगरलत्वात् मधुराभिख्या तदादि सा नगरी ।
निजसीमस्थफणित्वाद्विभाति हालास्यनामतश्चेह ।।
तस्या ललाटलीनस्वाहापतिरेव शान्तसन्तापः ।
रेजे कुङ्कुमतिलकव्याजान्नूनं बुधा हि कालविदः ।।"[1]

---

1. M. K. H. C. S. L. p. 396 (para 382)

[६१] पुष्पदन्तः

लोकोत्तरस्तुतिकाव्यगणनायां प्रथमतः स्मृतिपथमारोहति महिम्नस्तोत्रम् । अस्य महिम्नमिति व्यावहारिकं नाम । कोऽस्य कर्ता ? पुष्पदन्त इति जगद्विदिता प्रतीतिः । कोऽयं पुष्पदन्तः ? महेश्वरस्य प्रियकिङ्करः प्रथम इति जयद्रथविरचितहरचरितचिन्तामणिः । कश्चन गन्धर्वराज इति स्कन्द-पद्म-देवी भागवतादि–पुराणानि । शिवरहस्यनामके ग्रन्थे पुष्पदन्तचरितं समहिम्नस्तवमस्तीति केचन । अधोक्षजफक्किकया पुष्पदन्तनाम स्मृतम् –

"वाक्पतिं पुष्पदन्तं च काण्वं सोममथर्वणम् ।
हेमचन्द्रं नमस्कृत्य, वक्ष्येऽधोक्षजफक्किकाम् ।।"

एतेषु कस्य वचनं ग्राह्यम् ? अयं कविर्देवयोनिर्वा ? उत मानवो ? अपि च शिवभक्तः, परतत्त्ववेत्ता पुष्पदन्तो नाम कश्चन प्राचीनः पुरुषोऽस्तु नाम । स एवायं स्तोत्रकर्तेति कथं वाच्यम् ? उच्यते नायं प्रमथः, न च गन्धर्वः, किन्तु मानव एव । यस्तु भक्तिज्ञानसम्पन्नोऽधीतवेदवेदाङ्गः, सन्ततशिवाराधनेन महिमाढ्यः समभवत् स विद्वत्कविः पूर्वपुरुषो महिम्नस्तोत्रकृत् पुष्पदन्त इति, अस्य महत्त्वमेवार्वाचीनैर्बहुधा वर्णितमिति च ज्ञेयम् । महिम्नस्तोत्रस्य प्राचीनत्वं, पुष्पदन्तकर्तृत्वं च शिवपञ्चस्तवीप्रकाशकैस्तत्पीठिकायां स्वोपलब्धप्रयाणपुरःसरं यन्निरूपितमान्ध्रे तदत्र संगृह्य कथयामि –

भरतखण्डमध्यभागे नीमाडनामकमण्डलान्तर्गत ओङ्कार–क्षेत्रेऽमरेश्वरलिङ्गालयोऽस्ति । तस्याग्नेयप्रदेशे मान्धातृमण्डप–मस्ति । तस्य शिलामयभित्तिषु महिम्नस्तोत्रं लिखितम् । तदेकांश-प्रतिबिम्बं च प्रकटितं शिवपञ्चस्तव्याम् शिलालेखनकालः विक्रम-

संवत् ११२० शा. ९८६ । एतेन बहोः कालाद् विद्वत्परंपरासमागत-मिदं स्तोत्रं तत्काले शिलासु लिखितमित्यवगम्यते देशे सर्वत्र, तत्रापि महाराष्ट्र देशे रुद्राभिषेकसमये रुद्रानुवाकेन सङ्गच्छतीत्येतच्छिष्टाचारोऽप्यस्य प्राचीनत्वे निदर्शनम् । अथ –

जगद्गुरुशङ्कराचार्यादिदमतीव पूर्वमिति प्रतीतिश्चास्ति विद्वल्लोके । दक्षिणामूर्त्यष्टकव्याख्याता स्वयंप्रकाशस्वामी 'भूरम्भांसीति' व्याख्यानेऽयं श्लोकः 'त्वमर्क' इत्यादिमहिम्नस्तवश्लोकमनुकरोतीत्युक्तवान् । तदुक्तिरपि पूर्वप्रतीतिं समर्थयति । पुष्पदन्त-शङ्कराचार्यश्लोकाविमौ –

"त्वमर्कस्त्वं सोमस्त्वमपि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत् त्वं न भवसि ॥1

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात् परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥"2

विद्वन्मण्डलमण्डनेन जगद्गुरुणा कृतमिदमनुकरणं भक्तिज्ञाननिष्ठ इति तत् कालप्रसिद्धे पुष्पदन्ते गौरवद्योतकमिति मन्तव्यम् । एवमेव शिवानन्दलहरीश्लोकेष्वपि महिम्नस्तोत्रपद्यानु-

1. शिवमहिम्नःस्तोत्रम्-26 v.
2. दक्षिणामूर्तिस्तोत्रम्-9 v. (p. 623 of Brhat-stotra-ratnakara vol. II)

करणं क्वचित् क्वचित् स्फुरत्येव। अनामयस्तवकर्त्रा दण्डिना तदीयाद्यदशश्लोकरचने महिम्नस्तवोऽनुकृत इति। कालिदास-रघुवंशदशमसर्गीयोऽयं श्लोकः पुष्पदन्तकृतं 'त्रयी सांख्यम्' 1 इत्यादि श्लोकमनुचकारेति च शिवपञ्चस्तवीप्रकाशकाभिप्रायः –

"बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥"2

दण्डिनः सोऽयमभिप्रायः परिशोधकैरादृतश्चेदयं कालि-दासाच्च पूर्वं इति वक्तुं शक्यते। तत् साध्यं, प्रमाणान्तरालाभात्–

तथापि पुष्पदन्तः शङ्कराचार्यात् पूर्वं इति वक्तुं शक्यते। महाकविरयं वेदवेत्तेति मधुसूदनसरस्वतिना 'भूरम्भांसीति' श्लोकार्थः 'इन्द्रं मित्रं वरुणमग्निमाहु'3 रिति ऋङ्मन्त्रार्थमनुगच्छतीत्युक्तम्। तदेतन्महिम्नस्तोत्रमेकत्रिंशत्पद्यात्मकमपि वेदान्तसारभूतमित्यत्र न कश्चन सन्देहः।

काव्येऽस्मिन् अन्यरचितश्लोका अन्ते प्रविष्टा इति यदुक्तं परिशीलकैस्तत्सत्यम्। मधुसूदनसरस्वतिना तु न ते श्लोका व्याख्याताः स्तुतेरस्याः केवलशिवपरार्थः प्रतिपादितो द्वाविंशति-व्याख्यातृभिः। मधुसूदनसरस्वतीश्रीधरस्वामिभ्यां शिवकेशवपरत्वेन प्रतिपादितः। काव्यमिदं बहुदेशभाषासु परिवर्तितम्। शिखरिणी-छन्दोबद्धमिदं पठितृणां श्रोतृणां च समुत्साहजनकं गम्भीरार्थं सत् परतत्त्वबोधकमाद्यं भवति स्तुतिकाव्येषु। सकलशास्त्रप्रस्थान-परमार्थसारोऽधोनिर्दिष्टः श्लोकः सर्वविदुषां वाचि नृत्यति खलु –

---

1. महिम्नस्तोत्रम्–7v.
2. रघुवंशम्-10.26.
3. ऋ. 1. 164. 46.

'त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्नो प्रस्थाने, परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥' 1

पूर्वोक्तरघुवंशश्लोके एतदनुकरणं दृश्यत इति निर्णेतुं नालं साधनसामग्री । अनेन महाकविना गणेशस्तुतिर्निर्मितेति श्रूयते । न तत् काव्यं मया दृष्टम् ।

पुष्पदन्तो नाम गन्धर्वः कस्यचिद्राज्ञः पुष्पवने कुसुमापचयार्थं गतः । तदा शिवनिर्माल्योल्लंघनेन शक्तिहीनः समभवत् । तदुपवनरक्षकात्तद्विषयं विज्ञाय, पश्चात्तप्तोऽयं महेश्वरं स्तुत्वा, पुनः शक्तिसम्पन्नोऽभूत् इति काचन कथा चास्ति लोके । सेयमयं कविरत्यन्तं प्राचीन इत्यस्य ज्ञापिका । भवतु । अस्य स्तवस्य महत्त्वमेवं वर्णितं केनचित् पूर्वभक्तेन –

'महेशान्नापरो देवो, महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो, नास्ति तत्त्वं गुरोःपरम् ॥'

— ० —

1. महिम्नःस्तोत्रम्–7 v.

[६२] अमरुकः

'पुण्यैर्यशो लभ्यते' इत्युक्तेरुदाहरणभूतेषु महाकविष्वयमेकः। एकेन श्लोकशतकेन सर्वं लोकमावृत्य, प्रकाशतेऽयं पुरुषः। अखिल-लाक्षणिकस्तुतिपात्रममरुकः कदा वा, कस्मिन् देशे न्यवसदित्यस्य न लभ्यं समुचितमुत्तरम्। तथाप्यस्य शङ्कराचार्येण सम्बधोऽस्तीति काचन कथा विद्वल्लोके प्रसरति। तदित्थम् जगद्गुरुरद्वैतप्रचारार्थं देशयात्रां कुर्वन् मध्येमार्गं माहिष्मतीपुरं गत्वा, तत्र शास्त्रवादे मण्डनमिश्रं जिगाय। तदा तस्य पत्नी भारती भर्तृकृते शङ्करेण वादं कुर्वती क्रमशः कामशास्त्रप्रसङ्गमादाय, तस्मिन् पूर्वपक्षं चकार। तदाऽऽचार्यो विस्मितस्तदुत्तरं वक्तुं मासमवधिमभ्यर्थ्य, सशिष्यो नर्मदातीरकाननं प्राप्य तत्रैकस्मिन् जरठवृक्षकोटरे प्रविश्य, मत्प्रत्यागमनं प्रतीक्षमाणाः सावधानमिमं देहं रक्षन्त्विति छात्रा-नादिष्य, स्वशरीरं परित्यज्य, तत्समये मृतस्य तद्देशपालकस्यामरु-कस्य काये प्रविष्टः। तद्राजबन्धवो मन्त्रिणश्च राजा पुनरुज्जी-वेति सन्तुष्टास्तं राजप्रसादमानिन्युः।

परेद्युरेव मन्त्रिणः सम्यक् परिशील्य स्वभावं, सम्भाषणं च नायममरुकः, यःकोऽपि महान् जीवात्माऽस्मद् राजकलेवरे सन्निविष्टः इति निश्चित्य "यत्र कुत्रापि गहनगिरिकन्दरेषु मानव-मृतशरीरः सन् दृष्टश्चेद् दह्यतामिति गूढचारानाज्ञपयन्। शङ्करस्तु राज्ञ्या क्रीडन् वात्स्यायनकामशास्त्रसूत्रभाष्यार्थं विस्पष्टीकुर्वन् शृङ्गारशतकं निर्ममे। तस्मिन् समये शङ्करगुरुर्नायातः, अवधिः पूर्णः" इति पर्याकुलमनसो शङ्करशिष्याः राजप्रासादाङ्गणं गत्वा; दक्षिणामूर्त्यष्टकं पठन्त आसन्। आचार्यः शिष्यकण्ठध्वनिं श्रुत्वा, तद्देहमुत्सृज्य, यावन् निजशरीरं प्राविशत् तावदेव राजभटाश्चिता-

मारोप्य, वह्निमज्वालयन् । आचार्यः सशरीर उप्लुत्य, बहिरागत्य, दग्धाङ्गबाधानिवृत्तये "लक्ष्मीनृसिंह मम देहि करावलम्बम्" ।1

इत्यादिध्यानश्लोकैरिष्टदेवतां स्तुत्वा, स्वस्थशरीरः, शिष्यैः सह मण्डनमिश्रगृहं गत्वा, तद्भार्यां कामशास्त्रवादे जिगाय, इति एतेन शङ्करोऽमरुकशतककर्तेति प्रतीतिरुद्गता । इममंशं वर्णितवान् शङ्करविजये विद्यारण्योऽप्येवम् ।

वात्स्यायनप्रोदितसूत्रजातं
तदीयभाष्यं च विलोक्य सम्यक् ।
स्वयं व्यधत्ताभिनवार्थगर्भं
निबन्धमेकं नृपवेषधारी ॥'2

अत्र निबन्धस्यामरुकशतकमर्थ इति कथाविदः श्रीशङ्कराचार्यस्य योगमहत्त्वप्रतिपादनपरेयं कथा विश्वास्या, न वेति विचारो न कर्तव्योऽस्माकमद्य । परन्तु शङ्करसमकालोऽमरुक इत्येतावदेव ग्राह्यम् । आनन्दवर्धन-मम्मट-ध्वनिकाराद्यालङ्कारिकैः स्वेषु ग्रन्थेषूदाहृता अमरुकश्लोका इति विदितमेव । किंच, शा. ६७७–७०८ मध्यवर्तिना, जयापीडनृपास्थानमन्त्रिणा महालाक्षणिकेन वामनाचार्येणायं श्लोकः यथेत्युदाहृतस्तृतीयाधिकरणे –

'दृष्ट्वैकासनसङ्गते प्रियतमे पश्चादुपेत्यादरा –
देकस्या नयने निमील्य, विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः, सुपुलकः, प्रेमोल्लसन्मानसा –
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥'3

---

1. संकष्टनाशनलक्ष्मीनृसिंहस्तोत्रम्;
2. शंकरविजयम्. 12. 71.
3. Amarukasataka, v. 16; Vamana's काव्यालङ्कारसूत्रवृत्तिः III. 2. 4;

दण्डिभामहाभ्यां तु न क्वापि स्मृतमेतच्छतकम् । तस्माद् भामहवामनाचार्ययोर्मध्यकाले शा॰ ५७०–६५० समये अमरुकोऽस्तीति सम्भावनमुचितमिति मन्ये ।

अस्य शतकस्य विंशत्यधिकानि व्याख्यानानि सन्ति । एतदेव ख्यापयत्यस्य महत्त्वम् । अर्जुनवर्मदेवः स्वीयरसिकरञ्जन्यामेवं स्तुतवान् ।

'अमरुककवित्वडमरुकनादेन विनिह्नुता न सञ्चरति ।
शृङ्गारभणितिरन्या धन्यानां श्रवणयुगलेषु ॥'1

सर्वासु व्याख्यासु वेमभूपालनिर्मिता शृङ्गारदीपिका बहुत्रव्याप्ता । विविधशृङ्गारनायिकानायकबहुविधभावचेष्टानामिदं शतकं प्रदर्शनशालेव विराजते । व्यंग्यस्योदाहरणत्वेन बहुभिः संगृहीतोऽयं श्लोकः –

'निःशेषच्युतचन्दनं स्तनतटं निमृष्टरागोऽधरो ।
नेत्रे दूरमनञ्जने, पुलकिता तन्वी तवेयं तनुः ॥
मिथ्यावादिनि दूति ! बान्धवजनस्याज्ञातपीडागमे ।
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥'2

नेदं शतकमात्रम् । किन्तु शृङ्गारलघुकाव्यानां शतकमिति वक्तुमलम् ।

— ० —

1. Introductory verse of रसिकसञ्जीवनी.
2 अमरुकशतकम्–105v.

[६३] श्रीशङ्कराचार्याः

"आनन्दवर्षिनी यस्य वाणी चिद्रूपधारिणी ।
तं वन्दे जगदावासं भगवत्पादशङ्करम् ।।"[1]

जगद्गुरोरस्य जननादिवृत्तान्तो महामहिमसम्पन्नश्चित्रं वर्णितः संस्कृतादिसकलभाषासु । तदत्र तच्चरितांशसंग्रहः क्रियते–केरलदेशे (मलबार) पूर्णानन्दीतीरे वृषाद्रिसमीपे वर्तमानः कालडी-नामकोऽग्रहारोऽस्य जन्मस्थानम् । महाविद्वान् विद्याधिराजोऽस्य पितामहः पण्डिताग्रणीः शिवगुरुरस्य पिता, सतीमणिरार्याम्बास्य माता ।[2] गर्भाष्टमेषूपनीतोऽयं प्रतिभाशाली गुरूपदेशमात्रेणैव समधिगतवेदवेदाङ्गादिविविधविद्योऽभवत् । गोविन्दभगवत्पादाचार्यशिष्योऽभूद् ब्रह्मविद्यारहस्यविज्ञाने । 'यदहरेव विरज्येत्तदहरेव प्रव्रजेद्' इति[3] न्यायमनुसृत्य ब्रह्मचर्य एव सन्न्यस्य वैदिकधर्म-रक्षणाय परतत्त्वज्ञानबोधनाय च धृतदीक्ष आसेतुहिमाचलं सञ्चचार ब्रह्मज्ञानमूर्तिरयम् ।

अस्य जीवितकालो द्वात्रिंशद्वत्सरमितः । तत्रानेन निर्मिता अष्टकशतकलघुकाव्य-व्याख्यानभाष्यादयो ।

विंशतिसम्पुटात्मिकाः कृतयः प्रसरन्ति विश्वस्मिन् विश्वे । सोऽयं षट्त्रिंशत् समायुरिति च मतान्तरमस्ति । तथाप्यल्पायुः किल ! प्राचीनार्वाचीनगुरुविजयशङ्करविजयद्वारकादिमठचरित्र-

---

1. शांकरदिग्विजय–Introduction.
2. H. C. L. p. 320.
3. जाबालोपनिषद्. 4.

ग्रन्थाः केचन कथयन्ति जगद्गुरुरयं कलियुगे २५९३ (क्रि. पू. ५०९ तमे) समये जन्म लब्ध्वा २६२५ (क्रि. पू. ४७७ तमे) समये ब्रह्मीभूत इति ।1 सेयमतिशयोक्तिरिति मत्वा नवीन विमर्शकाः केचनामुं क्रिस्तात् परं प्राहुः । तत्रापि बह्वो मतभेदाः सन्ति पञ्चममारभ्य दशमाब्दशतकपर्यन्तम् । तादृशमतभेदान् वेङ्कटेश्वरपण्डितः क्रि. ८०५ – ८८९ मध्यकाले शङ्कराचार्यो जिजीवेत्यलिखत् । पण्डितभाण्डारकरतेलङ्गमहाशयादयस्तु जगद्-गुरुकालं क्रि· ५९० प्रान्तं निरदिशन् । बहवः परिशोधका अयं क्रि· सप्तमाष्टमाब्दशतकान्तवर्तीति मन्वते ।

आदिशङ्करविजयोक्ति प्रमाणीकृत्य तदनन्तरशङ्करविजयादि-ग्रन्था अस्य कालविषये भ्रान्तिमापन्ना इति स्पष्टम् । अयमाचार्यः शङ्करावतारो भवतु । तथापि नात्यन्तं प्राचीनः तत्काले जैनबौद्ध-मतेऽधःकृत्य वैदिकमतोद्धरणाय बद्धकङ्कणः कुमारिलभट्टः आसेतु-हिमाचलं चकार । नास्तिकवादनिरसनेनाद्वैतमतस्थापनं कर्तुमभितो भरतखण्डं मतविजययात्रां चकारायं महात्मा । पूर्वोत्तरमीमांसा–प्रचारकावुभौ कुमारिलशङ्करौ स्वकृतिषु परस्परनामग्रहणं कुर्वाणा-वपि समकालाविति वक्तुं शक्यते । तत्र कुमारिलो वृद्धः शङ्करस्तु युवा । गुरुद्रोहदोषशान्तये कुमारिलं तुषाग्निं प्रविशन्तमुपागम्य स्वभाष्यस्य वार्तिकं रचयेत्याचार्यः प्रार्थितवानिति च यदुच्यते शङ्करविजयादिभिस्तदविश्वसनीयमेव2 । तथाप्येतदुभयोः समकाल-वर्तित्वज्ञापनायालमिति मन्तव्यम् । एतेन कुमारिलभट्टेनारब्धं परमतविदलनकृत्यं जगद्गुरुणा पारं नीतमिति सम्भावनायां न कापि विप्रतिपत्तिरित्यूह्यते । ततः कुमारिलात् किञ्चित्परः तत्समकालो वा जगद्गुरुः शा. ६७०–७२० मध्यकाले द्वात्रिंशद्वर्षपरिमितायु-

---

1· H. C· L. p· 320·

2· शंकरविचयः 7. 29 v.

भूतले न्यवसदिति भावयामः बहुपरिशोधकानुरोधेन। मतोद्धर्तारो मतग्रन्थकर्तारश्चानेके सन्ति। ते सर्वे पूज्यपादा वन्द्या एव। तथापि जगद्गुरुणा लब्धं लोकातीतं यशस्तु न केनापि प्राप्तम्। अमृतास्य वाणी वश्यवाचः भाषितं तु भाष्यं वा भक्तिकाव्यं वा तदेवायुषोऽल्पत्वेऽपि शताधिकग्रन्थकर्तृत्वे कारणम्। परितो भरत-खण्डं परिभ्रम्याद्वैतमतव्याप्तये शृङ्गेरीजगन्नाथद्वारकाबदरीकेदारेषु मठस्थापनमेवास्य महिम्नः परं द्योतकम् 1। चित्सुखाचार्यशङ्करा-नन्दगोविन्दनाथवल्लीसदानन्दानन्दगिरिचिद्विलासविद्यारण्यादिपुण्य-पुरुषप्रणीतानि2 शङ्करविजयकाव्यान्यन्येवास्य लीलामानुषविग्रह-त्वमभिवर्णयन्ति। किमनेन विख्यातवृत्तकथनेन पुरतोऽभिज्ञानाम्। शङ्करः शङ्करः साक्षादिति शम्।

ब्रह्मजिज्ञासायां साधनचतुष्टयसम्पत्तिमानधिकारी। तेनैव प्रत्यगभिन्नब्रह्मगोचरा परोक्षज्ञानजनकवेदान्तविचारः कर्तव्यः। तदधिकारिता न सुलभसाध्या। तस्माल्लोकानुग्रहकांक्षी भगवत्पाद-स्तत्साधनत्वेन भक्तिमार्गमुपदिशन् स्तुतिकाव्यान्यरचयत् सुलभ-शैल्या। तत्काव्यजातमखिलमपीश्वराराधनपरं सदात्मज्ञानबोधकं मुक्तिदायकं च भवति। अपि च आराध्यदेवतास्तु नामतः प्रभिन्ना अपि परमार्थतः परमात्मनोऽभिन्ना इति विज्ञानं च भक्तानां सञ्ज-नयति। आचार्येणोपदिष्टं शाक्तं प्रकृतिपुरुषतत्त्वज्ञानपरम्।

"मन्त्रांस्तान्त्रिकवैदिकान् परिपठन् सानन्दमत्यादरात्
स्नानं ते परिकल्पयामि जननि स्नेहात् त्वमङ्गीकुरु।3
मम न भजनशक्तिः पादयोस्तेन भक्तिः
न च विषयविरक्तिः ध्यानयोगे न शक्तः।

---

1. H. C. L. p. 320.
2. ,, 322.
3. शिवानन्दलहरी.

इति मनसि सदाहं चिन्तयन्नाद्यशक्ते
रुचिरवचनपुष्पैरर्चनं संचिनोमि ।।"1

इत्यादिमानसिकपूजाविधानं मनोनिग्रहमूलम् । अस्य शिवानन्दसौन्दर्यलहर्यां अर्थतः शब्दतश्चानन्दसौन्दर्यराशी । भज गोविन्दस्तुतिस्तु भक्तिज्ञानवैराग्यवसतिः । यथा—

"नरीस्तनभरनाभीदेशं दृष्ट्वा मा गा मोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचिन्तय वारं वारम् ।।"2

आत्मबोधदक्षिणामूर्त्यष्टकमनीषापञ्चकादीनि ब्रह्मानन्द-रसस्यन्दीनि । तत्र द्वौ श्लोकौ –

"जाग्रत्स्वप्नसुषिप्तिषु स्फुटतरा या संविदुज्जृम्भते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी ।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चेत्
चाण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ।।"3

"नानाछिद्रघटोदरा स्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत् समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।"4

भक्तसन्तरणार्थाय लब्धजन्मायं महात्मा बदरीनारायण-सन्निधौ शरीरं परित्यज्य ब्रह्मीभूतः सच्चिदानन्दमूर्तिर्भगवान् शङ्करभगवत्पादः सर्वान्तर्यामीति शिवम् ।

---

1. त्रिपुरसुंदरीमानसपूजास्तोत्रम्. 1 v.
2. मोहमुद्गरः v. 3. (शंकराचार्यप्रकरणग्रन्थाः P. O. B. A. 1952)
3. मनीषापंचकम् 1 v. (शंकरप्रकरणग्रन्थाः)
4. दक्षिणामूर्तिस्तोत्रम् 4 v. ,,

(६४) सुबन्धुः

बाणो वा सुबन्धुर्वा कः पूर्व इति बहुभिश्चर्चितमद्यावधि। अत्र चर्चायाः कारणमिदं हेतुत्रयम्। महाभाष्ये "लुबाख्यायिकाभ्यो बहुलम्" इति[1] वार्तिकस्य विवरणे पतञ्जलिनोदाहृता वासवदत्ता बाणभट्टहर्षचरितावतारिकायां कस्मिंश्चिल्लिखितवासवदत्तापुस्तकान्ते चायं श्लोकोऽस्ति।

"कवीनामगलद्दर्पो नूनं वासवदत्तया।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम्॥"[2]

सुबन्धुकविकृतं गद्यकाव्यं दृश्यते मुद्रितम्। पतञ्जलिना वासवदत्तेति ग्रन्थनाम स्मृतम्। न तु तत् कर्तृनाम। तत्कर्ता सुबन्धुरिति निर्णेतुमशक्यम्। तत्काव्यस्य नष्टत्वात्। उपलभ्यमानवासवदत्तागद्यकाव्यकर्ता सुबन्धुरपि नायं महाभाष्यस्मृतवासवदत्ताकाव्यकर्ता भवति। एतन्मुद्रितकाव्ये न रघुवंशशाकुन्तलमहावीरकथांशाः स्मृताः।

यथा –

"मुधैवेन्दुमती महिष्यप्यजानुरागिणी बभूव"
"विफलमेव दुष्यन्तस्य कृते दुर्वाससः शापमनुबभूव शकुन्तला"
"सदा रामाश्रितैर्महावीरचरितैरिव नारीकेलिधरैः"

एतेन दृश्यमानवासवदत्ता न पतञ्जलिस्मृतेति, अस्याः कर्ता सुबन्धुर्भवभूतेरपि पर इति च स्पष्टम्। मालतीमाधवे यद्यपि

---

1. M. Bh. IV. 3. 87.
2. H. C. L. p. 443 ; 3.

वासवदत्तानाम गृहीतं तथापि सा तु उदयनस्य भार्येति मुद्रितकाव्ये वर्णिता वासवदत्ता कन्दर्पकेतुभार्येति च विदितत्वान्नेदं मुद्रितवासवदत्ताकाव्यं शक्यते। अथ द्वितीयो हेतुः– पतञ्जलिनोदाहृता वासवदत्ता बाणभट्टेन पठिता वा श्रुता वेति न वयं जानीमः। यथा कथंचित्तन्महत्त्वं जानतैव तेन "कवीनामगलद् दर्पः" इति सा प्राचीनवासवदत्ता प्रशंसितेति विद्वल्लोके प्रतीतिः। सोऽयं श्लोकोऽर्वाचीन वासवदत्तापाठकेन केनचित्तदन्ते प्रक्षिप्तो नामैक्यभ्रान्त्येति स्पष्टं ज्ञायत एव। तस्मादियं मुद्रितवासवदत्ता न पतञ्जलिस्मृता न च बाणप्रशंसितेति, एतत्कर्ता सुबन्धुर्नकेवलं बाणभट्टात् किं च भवभूतेरप्यर्वाचीन इति च विश्वसनीयं भवति। किन्तु काव्यालङ्कारसूत्रवृत्तावुत्कलिकाप्रायस्योदाहरणत्वेन "कुलिशशिखरखरनखरप्रचण्डचपेटापाटितमत्तमातङ्गकुम्भस्थले"2 इत्यादिकं मुद्रितवासवदत्ताकाव्यवाक्यदृष्टत्वाद् वामनाचार्यादयं कविः किञ्चित्पूर्व इत्यवगम्यते। तेनायं सुबन्धुः शा. ६७० प्रान्ते स्थितोऽभवदित्युच्यते। एतेन –

"सुबन्धौ भक्तिर्नः क इह रघुकारे न रमते।
सुबन्धुर्बाणभट्टश्च कविराज इति त्रयः॥"3

इत्यादिषु सुबन्धुनाम प्रथमतो निर्दिष्टं, तस्मादयं प्राचीन इत्युच्यमानहेत्वाभासाः परास्ता भवन्ति। मुद्रितवासवदत्तापीठिकाकारैः कृष्णमाचार्यैश्च सुबन्धुरयं बाणभट्टवामनाचार्यमध्यवर्तीति निर्दिष्टम्।4

प्रौढगद्यकाव्येषु कादम्बर्या अनुपदं वासवदत्ता गण्यते सारस्वताभिज्ञैः। कविरप्येवमुक्तवान्।

1. H. C. L. p. 469.
2. काव्यालङ्कारसूत्रम्. p. 13 (N. S. P. ed. 1953)
3. राघवपाण्डवीये.
4. H. C. L. p. 469.

"प्रत्यक्षरश्लेषमयप्रपञ्चविन्यासवैदग्ध्यनिधि प्रबन्धम्।
सरस्वतीदत्तवरप्रसादश्चके सुबन्धः सुजनैकबन्धुः ॥"1

अस्मिन् वर्णिता कथा गुणाढ्यवासवदत्ताकथातः प्रभिन्ना। तस्यां नायिकायाः पितोज्जयिनीराजो महासेनः प्रद्योतः। अस्यां तु कुसुमपुरराजः शृङ्गारशेखरः। एकत्रास्मिन् ग्रन्थे "अपूर्वा बृहत्कथा मया श्रुता प्रत्यक्षीकृता च"2 इत्येकं वाक्यमस्ति। तथापि वर्णितकथाविषयस्तु ततः पृथगेव। तस्यामुदयनो वासवदत्ताया भर्ता। अस्यां तु कन्दर्पकेतुः। भासकालिदासभवभूत्यादिपूर्वकविभिरुदयन एव वासवदत्तापतिरित्युक्तम्। एवं नायिकानायकवृत्तान्तौ काव्ये सर्वत्र स्वतन्त्रौ।3 न तु प्रसिद्धकथानुसारिणौ। तथापि काव्यं सरसं मनोहरवर्णनाञ्चितं विद्वद्रञ्जकम्। कविरयं काश्मीरीय इति उज्जयिनीप्रान्तवासीति च मतभेदोऽस्ति तथाप्यौत्तराह एव। अद्वैतवैदिकाचारसम्पन्नः पवित्रचरित्र इति तत्तद्वर्णनाभिः अवगम्यते। अस्य काव्यस्य श्रीकृष्णसूरिजगद्धरत्रिविक्रमतिम्मय्यसूरिशिवरामादयो बहवश्चक्रुर्व्याख्यानम्। इदमेव ज्ञापयतीदं काव्यमाजन्मदेशमभितः पठनपाठनवशेन व्याप्तमिति मंखराजशेखरादिभिरयं कविरभिष्टुतः। वामनबाणभट्टो भट्टबाणं स्तुवन्नेवं सुबन्धुममुं सस्मार।

"प्रतिकविभेदनबाणः कवितातरुगहनविहरणमयूरः।
सहृदयलोकसुबन्धुर्जयति श्रीभट्टबाणकविराजः ॥"4

— 0 —

1. वासवदत्ता. v. 13. (chowkhamba ed. 1954)
2. ,, p. 85.
3. H. C. L. p. 472.
4. H. C. L. p. 470.

(६५) हलायुधः[1]

ब्राह्मवैष्णवसर्वस्वादिनिर्माता कातीयश्राद्धकल्पसूत्रभाष्यकर्ता हलायुध - नामा कविरर्वाचीनः । तदन्योऽयमभिधानरत्नमालेति–प्रसिद्धनिघण्ठुकारः । तस्मात् पूर्वः शिवभक्तो हलायुधकविः वङ्गदेशीयदक्षिणराढमण्डलान्तर्गतनवग्रामोऽस्य प्रथमनिवासः (अयं हुग्लीजनपदे खृर्षुत्परगणान्तर्वर्ती ग्रामः) अधीतविद्यः प्राप्तयौवनः केनापि कारणेन स्वदेशं परित्यज्य दक्षिणापथं गत्वा तत्र मान्य-खेटपालकस्य राष्ट्रकूटराजस्य कृष्णराजस्यादरं लब्ध्वा तदास्थान-कविरभवत् । एतच्चरित्रांशबोधकः श्लोकोऽयं हलायुधस्तवान्ते दृश्यते ।

"द्विजो दक्षिणराढीयो नवग्रामविनिर्गतः ।
हलायुधबुधः शम्भोरिमां स्तुतिमरीरचत् ॥"[2]

एतत्कविनिर्मितकविरहस्याख्यग्रन्थान्ते चायं श्लोकोऽस्ति ।

"इति समाप्तमवाप्तगुणोदयं
कविरहस्यमिदं रसिकप्रियम् ।
सदभिधाननिधानहलायुध -
द्विजवरस्य कृतिः सुकृतात्मनः ॥"[3]

आभ्यां श्लोकाभ्यामभिधानरत्नमालारचनेन प्रसिद्धो हला-युध एव शिवस्तवकविरहस्यकाव्यद्वयकर्तेति स्पष्टीकृतम् । कवि-रहस्यस्य कविगुह्यमपशब्दाभासकाव्यं चेति नामान्तरे स्तः । अस्या व्याख्याता रविधर्म एवमाह ।

---

1. H. C. L. p. 793. Dasgupta p. 617.
2. H. C. L. p. 793.
3. कविरहस्यम्. last verse.

"अर्थतः शब्दतो वापि समान् धातून् निबध्नता ।
तथा हलायुधेनेदं कृतं कविरहस्यकम् ॥
आभासन्ति पदान्यत्र प्रचुराण्यपशब्दवत् ।
तद्वैषम्यं स्वभावेन निबन्धनमपेक्षते ॥
कविगुह्यं प्रसक्त्यादिभावगम्यमनेकधा ।
यस्य येनोपसर्गेण धातोः कविपदं च यत् ॥"1

अपशब्दाभासाख्ये काव्ये कविरहस्यं समाप्तम् ।2 राष्ट्रकूटराजेश्वरस्य कवेः पोषकः कृष्णराजः प्रथमः । न तु तृतीयकृष्णराज इति चरित्रज्ञाः कथयन्ति । तदेव समञ्जसमित्यस्य कारणानि –

ओङ्कारक्षेत्रेऽमरेश्वरमण्डपे शिलासु लिखितः पुष्पदन्तमहिम्नस्तव इति पूर्वं पठितम् । तथैव हलायुधकृतशिवस्तवोऽपि तत्रैव शा. ६८५ वत्सरे शिलासु लेखितः । बसवपुराणादिषु हलायुधसम्बन्धिनी कथा दृश्यते आभ्यां हेतुभ्यां शा. ६८२–७०२ मध्यकाले मान्यखेटराज्यं पालयितुः कृष्णराजस्यास्थाने हलायुधो बभूवेति ज्ञायते शिवपञ्चस्तवीपीठिकाकारमतानुरोधेन च ।

पिङ्गलनागकृतछन्दोग्रन्थस्य टीकानेन रचिता । तदुक्तमनेनैवम् –

"पिङ्गलाचार्यरचिते छन्दःशास्त्रे हलायुधः ।
मृतसञ्जीविनीं नाम वृत्तिं निर्मितवानिमाम् ॥" 3

---

1. रविधर्म at H. C. L. p. 793.
2. ,, ,,
3. पिङ्गलछन्दःसूत्रम्. p. (196 Ed. 1938)

हलायुधस्तवस्य मध्यभारते विशेषः प्रचारोऽस्ति। पुष्पदन्तकृतस्तव इव शिवभक्तैः पूज्यतेऽस्य स्तवोऽपि। तदीयं श्लोकत्रयमिदम् –

"बन्धच्छेदादिह तनुभृतां यत् त्वया साकमैक्यं
सा चेन्मुक्तिः शिव ! किमनया यातु यद्वान्धकूपम् ।
त्वं मे स्वामी भवदनुचरः शर्व ! यत् सर्वदाहं
तद्धि श्लाघ्यं स्वपतिपदवीं कामयन्ते न भृत्याः ॥"

कालेन नीतः सर्वोऽपि पुनरावर्तते जनः ।
महाकालेन नीतस्य नावृत्तिर्विद्यते पुनः ॥

"ज्ञानं न स्यात् क्वचिदपि किल ज्ञेयसम्बन्धशून्यं
ज्ञेयं सत्तामपि न लभते ज्ञानबाह्यं कदाचित् ।
इत्यन्योन्यग्रथितमुभयोर्व्यापकं यत् स्वरूपं
तत्ते प्राहुः प्रकृतिपुरुषस्यार्धनारीश्वरत्वम् ॥"

— ० —

(६६) शिवयोगी

प्राचीनोऽयं वीरशैवाचार्यः । एतन्निर्मितसिद्धान्तशिखामणिश्लोकाः केचन श्रीपतिपण्डिताराध्येन तत्पूर्वेण श्रीकण्ठाचार्येण च स्वीयशैवसूत्रभाष्ययोरुदाहृता दृश्यन्ते । तेन तयोः पूर्वोऽयं कविः शा. ७०० प्रान्तवर्तीत्यूह्यते । रेणुकाविजयकर्तुः सिद्धनाथात् पूर्वः सिद्धनाथोऽस्य पिता ।

सिद्धान्तशिखामणिरेकविंशतिपरिच्छेदः षट्स्थलतद्भेदविवरणपरो वीरशैवविज्ञाननिधिरिव शैवैराराध्यते । कवित्वं च मृदुलम् ।

"अज्ञानतिमिरं चित्तदर्पणं यो विशोधयेत् ।
प्रज्ञाविभूतियोगेन तमाहुर्गुरुसत्तमम् ।।
अपरोक्षितत्वस्य जीवन्मुक्तस्वभाविनः ।
गुरोः कटाक्षसंसिद्धौ को वा लोकेषु दुर्लभः ।।"[1]

अनामयस्तवकर्तुः दण्डयाचार्यात् पूर्वमेव वीरशैवमुत्पन्नमिति, शिवयोगिनः पितृपितामहकाले तन्मतसारस्वतमङ्कुरितमिति च शैवानामाशयः ।

---

1. H. C. L. p. 632.

(६७) मायुराजः

मायुराजनामा राजकविरुदात्तराघवकर्तेति पूर्वलाक्षणिकवचनैरवगतम् । तन्नाटकं तु मृग्यम् । अस्य देशकालनिवासादिवृत्तान्तश्च विचिकित्सामधिरोहति समुचितप्रमाणाभावात् । तथाप्यद्य नवीनपरिशोधनैरस्योदन्तः पाठकानाचकर्षेति कृत्वा तद्विचारः कश्चिदत्र क्रियते ।

मायुराजस्यानङ्गहर्ष इति नामान्तरमस्तीति प्रथमं परिशोधनबीजम् । ततस्तदङ्कुरादयः । यथा –

चेदिमण्डलस्य माहिष्मती राजधानी । तत्पालकस्य कलचूरीराजस्य नरेन्द्रवर्धनस्य पुत्रोऽनङ्गहर्षः स एव मायुराज इति1 । सोऽनङ्गहर्ष एव कुट्टिनीमते (श्लो· ७७७) दामोदरगुप्तेन वेश्याप्रसङ्गे –

"वयमपि देवनिकेतनमनङ्गहर्षे गते त्रिदिवलोकमिति प्रशंसित" इति

मुरारिकविनानर्घराघवसप्तमाङ्केऽप्यनङ्गहर्ष एवानङ्गनाम्ना व्यवहृत इति2 । तन्निर्मितोदात्तराघवनाटके ईर्षयाऽनर्घराघवकर्त्रा तथा निन्दित इति च हेत्वाभासकल्पनं कृत्वाऽयमनङ्गोऽनङ्गहर्षो मायुराज इत्यभिप्रायः प्रकटितस्तन्नवीनपरिशोधनैः3 ।

1. H. C. L. p. 632.
2. अनर्घराघवम्–VII.
3. आश्लेषचुम्बनरतोत्सवकौतुकादिक्रीडादुरोदरपणप्रतिभूरनङ्गः ।
भोगः स यद्यपि जये च पराजये च यूनां मनस्तदपि वाञ्छति जेतुमेव ॥

एतदद्भुतकल्पनं पाठकेभ्यः कथं रोचते? नाहं जानामि। दामोदरगुप्तवर्णितोऽनङ्गहर्ष एव मायुराज इति वक्तुं वा विश्वसितुं वा न किमपि दर्शितं बलवत् प्रमाणम्। पूर्वालङ्कारिकेषु नैकेनाप्ययं तन्नाम्ना व्यवहृतः। पूर्वोदाहृतमुरारिश्लोकवर्णितविषयं पश्यतां तत्रत्यानङ्गशब्दोऽनङ्गहर्षनामकराजं सूचयतीति भाव एव न कदापि स्फुरति खलु! अथ कथं विश्वसनीयं तत् कल्पनम्? अथ तापसवत्सराजकर्तृत्वम्।

आनन्दवर्धनादिभिरेतन्नामाङ्कितं नाटकं स्मृतं ध्वन्यालोकादिषु। तेनेदं पूर्वविद्वद्भिरत्यन्तमादृतं सरसं रूपकमित्यङ्गीकार्यं. तथापीदानीं चेन्नपुर्यां मुद्रितम्। तापसवत्सराजमनेन मायुराजेन निर्मितं वा नवेति संशयग्रस्तं भवति। न केनापि लाक्षणिकेन तापसवत्सराजं मायुराजनिर्मितमिति सूचितम्। यथा मायुराजस्येत्युक्त्वा हेमचन्द्रधनिकादिभिरुदाहृतानि वाक्यान्युदात्तराघवीयानीति न तु तापसवत्सराजीयानीति स्पष्टमेव[1]। मायुराजनामग्रहणपूर्वकं तापसवत्सराजरूपकाख्यं धनिकेन दशरूपकव्याख्यायामुदाहृतमिति यदुच्यते तदसत्। तेनैतन्नामैव न गृहीतम्। अपि च भोजेनैकः श्लोक उदाहृतः श्रृङ्गारप्रकाशिकायाम्। [2]तदुत्तरार्धस्तथैव दृश्यते

---

1. H. C. L. p. 632.
2. सन्ध्याकालकशायितेन नभसा प्रत्यक्षसन्नंशनै –

   नींलावेश्मनि दीपरश्मिजटिलं नीलं तमो जृम्भते।

   वेलद्बाहुलताविलोलवलयस्वानैरितः सूचित –

   व्यापाराः प्रणियोजयन्ति विविधा वाराङ्गनावर्णकान्॥

   (उदात्तराघवे)

मुद्रिततापसवत्सराजे। 1तेन भोजेनोदाहृत उदात्तराघवश्लोकः, तत्कर्ता मायुराज एवास्यापि कर्ता भवतीत्येकस्तर्कः।

अतिचित्रोऽयमूहः श्लोकोऽयमुदात्तराघवीय इति न भोजराजेनोक्तः। नान्येन निरूपितः। अथापि मुद्रिततापसवत्सराजमनेन निर्मितमिति निर्णेतुं आनन्दवर्धनादिभिः प्रशंसितं तन्नाटकमिदमेवेति निश्चेतुं च न दृश्यते प्रत्यक्षं प्रमाणम्। तादृशप्रमाणलाभपर्यन्तं मायुराजशिरस्येतत्कर्तृत्वारोपणं शूद्रकादिषु पद्मप्राभृतिकाद्यारोपणमिव विश्वासयोग्यं न भवतीति मन्ये।

नायं मायुराजोऽनङ्गहर्षो वा अनङ्गो वा, न चेदिमण्डलेश्वरो वा, किन्तु नाम्ना क्षत्रिय इति वक्तुं शक्यते। कुत्रत्यो वा न ज्ञायते। आनन्दवर्धनात्पूर्वः "यदि क्षुण्णं पूर्वैरिति जहति रामस्य चरितम्" इति मुरारिणा स्मृतेषु रामकाव्येषु उदात्तराघवमप्यासीदिति मत्वा तस्मादयं पूर्वं इति भावनं नानुचितं स्यात्। तेनायं कविः शा· ७०० प्रान्तवर्तीति मन्यामहे।

कैश्चिल्लाक्षणिकैरुदात्तराघवादेकैकं वाक्यं गृहीतम्। धनिकेन त्वस्य कवित्वचातुर्यं किञ्चित् प्रदर्शितम्। तेन तद्वस्तुपात्ररसौचित्यं यत्किञ्चिदवगम्यते। यथा2 चित्रमायः –

---

1. प्रारब्धो मणिदीपयष्टिषु समं पातः पतङ्गैरितो
गन्धान्धैरभितो मधुव्रतकुलैरुत्पक्ष्मभिः स्थीयते।
वेल्लद्बाहुलताविलोलवलयस्वानैरितः सूचित –
व्यापाराः प्रतियोजयन्ति विविधा वाराङ्गना वर्णकान्॥
(तापसवत्सराजे)

cf· H. C. L. p. Dr· De : p· 298, 686.

2. दशरूपके - प्रका ४–प्रका ३.

(ससम्भ्रमम्) भगवन् कुलपते रामभद्र परित्रायताम् (आकुलतां नाटयति)। चित्रमृगरूपं परित्यज्य विधाय विकटं वपुः। नीयते राक्षसानेन लक्ष्मणो युधि संशयम्।

रामः —

"वत्सस्याभयवारिधेः प्रतिभयं मन्ये कथं राक्षसात्
त्रस्तश्चैषमुनिर्विरौति मनसश्चास्त्येव मे सम्भ्रमः।
मा हासीर्जनकात्मजामिति मुहुः स्नेहाद् गुरुर्याचते
न स्थातुं न च गन्तुमाकुलमतेर्मूढस्य मे निश्चयः॥"

वानरः– (प्रविश्य पटाक्षेपेण सम्भ्रान्तः) महाराज! एतत्खलु पवननन्दनागमनेन प्रहर्षः ...... देवस्य हृदयानन्दजननं विदलितं मधुवनम्।

अनिष्टश्रवणोदाहरणम् —

राक्षसः प्रथमः —

तावन्तस्ते महात्मानो निहिताः केन राक्षसाः?

द्वितीयः—गृहीतधनुषा रामहतकेन।

प्रथमः—किमेकाकिनैव?

द्वितीयः—अदृष्ट्वा कः प्रत्येति? पश्य

प्रथमः—सखे यद्येवं तदाहमेवंविधः किं करवाणि नायकरसविरुद्धं परित्याज्यमित्यस्य –

"यथा छद्मना वालिवधो मायुराजेनोदात्तराघवे परित्यक्तः।"

वस्तुसूचनस्य –

"रामो मूर्ध्नि निधाय काननमगान् मालामिवाज्ञां गुरोः
तद्भक्त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम्।

तौ सुग्रीवविभीषणावनुगतौ नीतौ परां सम्पदं
प्रोद्वृत्ता दशकन्धरप्रभृतयो ध्वस्ताः समस्ता द्विषः ॥"

मायोत्थापितं वस्तु –

"जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभिः
भास्वन्तः सकला रवेरपि रुचः कस्मादकस्मादमी ।
एतच्चोग्रकबन्धरन्ध्ररुधिरैराध्मायमानोदरा
मुञ्चन्त्याननकन्दरानलमुचस्तीव्रा रवाः फेरवाः ॥"

एतैर्वाक्यैरुदात्तराघवं रसोदात्तमित्यवगम्यते । काले-नैतादृशमपि दिव्यनाटकमपहृतं हन्त !

— ० —